भारत सरकार
GOVERNMENT OF INDIA
राष्ट्रीय पुस्तकालय, कलकत्ता
NATIONAL LIBRARY, CALCUTTA

वर्ग संख्या
Class No. A.C
पुस्तक संख्या
Book No. 340.0954 J

रा० पु०/N. L. 38. V. 3&4

MGIP (F. U.), Sant.—34 NL/93—9-6-94—50,000


Vivādabhaṅgārṇava

THE
NATIONAL LIBRARY
OF
INDIA

Asutosh  Collection

Asutosh Mukhopadhyay

v.3+1

अथ दायभागः ॥ तत्र नारदः ॥ विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ॥
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥ यत्र यस्मिन् व्यवहारपदे प्रकल्प्यते क्रि
यते इति ॥ रत्नाकरः ॥ पितृत आगतं पित्र्यं तच्च पितृमरणोपजातस्वत्वमुच्य
ते ॥ पित्र्यस्येति पुत्रैरिति च द्वयमपि सम्बन्धिमात्रोपलक्षणं सम्बन्धिमात्रध
नविभागेपि दायभागपदमुपक्रम्य नारदोपि मात्रादिधनविभागमप्युपद
र्शितवान् तथा मनुरपि पित्र्यादिपदमहत्त्वैव ॥ एष स्त्रीपुंसयोरुक्तो धर्म्मो वो
रतिसंहितः आपद्यपत्यप्राप्तिश्च दायभागं निबोधत ॥ इत्युपक्रम्य यावत्सम्ब
न्धिधनविभागमुक्तवान् इति जीमूतवाहनः ॥ अर्थो धनं पित्र्यं पितृत्वसम्ब
न्धात्प्राप्यं इति स्मार्त्ताः तथाच सम्बन्धाधीनस्वत्ववद्धनस्य विभागो विभजनं
यत्र धने कल्प्यते तद्धनं दायभागनामकं विवादपदं फलतो दाय एव विवादप
दमिति पर्य्यवसितं इदं दायांशकल्पनं अयोग्यमिदं दायांशकल्पनं योग्यमि
त्यादिकानां वादिप्रतिवादिनो विरुद्धानां विषयत्वरूपपदत्वस्य अंशकल्पन इ
व दायेपि सत्वात् ॥ यौगिकं विवादपदत्वं दाये ॥ स्त्रीपुंधर्म्मो विभागश्च इति म
नुवचनेन विभागपदस्य रूढिहितो भावो द्रव्यत्वादिति न्यायेन कर्म्मव्युत्पत्त्या
त्या विभजनीयदायपरत्वान्न दोषः इति केचिद्वदन्ति तन्न एतद्विवादपदस्य वि
शेषसंज्ञायाः स्पष्टमकथनात् मनुवचने च ऋणादानादीनां वेतनादानस्येपा
दीनां च सप्तदशानां धर्म्मपरत्वेन एकस्य धर्म्मिपरत्वे च सन्दर्भविरोधापत्तिः
ऋणादानपदार्थस्य तत्तदुत्तमर्णकत्वादिधर्म्मपरत्वं पूर्वमेव व्याख्यातं ॥
रूढिरभिहितद्रव्यत्वादिन्यायेन क्रियाया एकत्वादिभिर्वैयाकरणैः द्रव्यतुल्यत्व
स्वीकारेण द्विवचनबहुवचने एव स्वीक्रियेते न तु द्रव्यवाचकत्वं तथात्वे धात्वर्थ
मात्रवाचकत्वाभावे भावप्रत्ययस्य भावविहितत्वानुपपत्तिः स्यात् ॥ एवं कर्म्मणि प
ञः स्वरसतः सर्वैरस्वीकार्य्यत्वाच्च इति यथाश्रुतं कथनं ॥ यत्तदोर्नियतसम्बन्धात्तस्य
धनस्य तत्पूर्वोक्तविभजनं दायभागः इति प्रोक्तविवादपदं तथाच विभजनीयदा
यश्चेत्तद्विभाग एव दायभागसंज्ञकं विवादपदमिति फलमिति फलितोऽर्थः ॥ न
नु दायविभाग एव दायभाग इत्युच्यतां किमेतावता गुरुतरलक्षणानुसरणेन
न च पौनरुक्त्यं दायभागसंज्ञकत्वस्यैव विधेयत्वादिति चेन्न मुनेः स्वतन्त्रेच्छ
त्वात् न दोषः अथवा दायपदार्थपरिचयाय एतावत्पर्य्यन्तानुधावनं न त्था
हि पित्र्यागत पुनर्विभज्यमानधनवृत्तिविभागस्य दायभागत्वकथने न तादृश

NATIONAL LIBRARY
No. 3286
Date 29.1.85
... COLLECTION
39x27cm

धनस्य दायत्वमायातं तत्र चा॥ विभज्यमानेपि दायशब्दप्रयोगदर्शनात् विभ
ज्यमानत्वमविवक्षितं विवक्षितं तु भज्यमानत्वमिति अपरे तु पद इत्यर्थस्य पांसुपा
यत्र इत्याह: तथा च यो विभागः कल्प्यते स दायभागः इत्यर्थः/ अन्ये तु पस्थितिवा
पाठं कल्पयन्ति॥ संप्रदायिकास्तु यत्र इति निमित्तसप्तमी यत्पदार्थश्च विवाद
पदं विभागरूपवचनं स्यात् विभागपदं करणव्युत्पत्त्या विभागसाधनं परं त
था च विभागस्वरूपय द्विवादपदनिमित्तं विभागकरणं गुटिकापातादि प्रक
ल्प्यते तद्विभागस्वरूपं दायभागसंज्ञकं विवादपदत्वेन धर्म्मपरत्वं सुघटम
तो न दोषः एवं च दायस्य विभागो विभज्यमानदायो वा यथामतं दायभागपदा
र्थः स एव विवादपदमिति स्मार्त्तजीमूतवाहनादीनां मतं॥ ० ॥ वस्तुतस्तु
पित्र्यस्य पितृत आगतस्य पितृमरणादिना विनष्टपितृस्वत्वस्येति यावत् ता
दृशस्य अर्थस्य विभागः भाजनं स्वामित्वविशिष्टं विवादपदं तथा च विशे
षणत्वात्॥ स्वामित्वस्यापि विवादपदत्वेन नष्टस्वामिकधनस्य सम्बन्धी
नां स्वामित्वमेव दायभाग इति अथवा यत्रेति आश्रयणीयत्वे सप्तमी गुणेव
सतीतिवत् विभागपदार्थश्च वण्टनं तथा च यत्स्वामित्वमाश्रित्य पुत्रैर्वण्ट
नं कल्प्यते तत् दायस्वामित्वमेव दायभागसंज्ञकं विवादपदमित्यर्थः दायवं
टनाश्रयत्वं उपलक्षणं तत्रैव हेतुः अतो विभज्यमानदायस्वामित्वस्यापि दाय
भागत्वमक्षतं एवं च॥ सनसंगजे सुतद्गामिस्वेर्थो भवतीति बौधायनः
वचनस्यापि तदभावेपि तद्गामितदभावे मातृगामीति विष्णुः सूत्रादीनामपि
दायभागः निरूपकत्वं संगच्छते इत्यलं पल्लवितेन॥ ननु वण्टनमेव किं यदि
विभागशब्दपर्य्यायत्वात् विभक्तावयवत्वं द्विधाकरणमिति तदा धननाशा
पत्तिः यदि च भ्रातॄणां परस्परधने नासंयुक्तत्वं तदानीं एतत्स्वत्वकेपि भ्रात्र
न्तरधनसंयुक्ते धने वण्टने व्यवहारानुपपत्तिः॥ अत्रोच्यते॥ स्वत्वनिर्णीय
कव्यापारः स्वत्वनिर्णयो वा वण्टनं स एव विभागः॥ तथाहि पितर्य्युपरते तत्
स्वत्वं नश्यति तत्पुत्रादीनां च स्वत्वं जायते तत्र अनेकपुत्रस्थले येन येन
पुत्रेण यद्गृहं लप्स्यते तत्र तत्रैव तस्य तस्य स्वत्वं जायते किन्तु तस्याती
न्द्रियत्वेन च क्षुणादीनां ग्राह्यदत्वात् गुटिकापातादिना अनुमानेनैव नि
र्णयो भवति स एव निर्णयः तज्जनकव्यापारो वा गुटिकापातादिर्विभागपदा
र्थः। यच्च प्राणैकेव दासीगवादौ वापि त्र्यधनं तत्रकागति गुटिकापाताद्यसं

भवादिति चेत्॥ अत्राह बृहस्पतिः॥ एकांस्त्रीकारयेत्कर्म यथांशेन गृ
हे गृहे॥ इति युक्त्या विभजनीयन्तदन्यथानर्थकं भवेदिति अत्र एकस्यामेव
दास्यां सर्वेषामेव दास्यां सर्वेषामेव स्वत्वं यथा यस्य पंचपुत्राः तस्मिन्मृते
न दास्यां आद्यो दिनषट्कं ज्येष्ठस्य तदुत्तरं दिनषट्कं तदनुजस्येत्यादि
रित्यैव वाच्यं कालबोधकपत्रोपरि वा गुटिकापातेन तथाच प्रथमदिनषट्का
त्तरं ज्येष्ठस्य स्वत्वं दासीगतं नश्यति उत तत्रैव तिष्ठतीति सन्देहे केचिदाहु
ः॥ एकस्यामेव व्यक्तौ कालिकाव्याप्यवृत्तीनि नानास्वत्वानि स्वामित्वानि।
वा पुत्रेषु प्रागेवोत्पन्नानि तेषामेकैकस्यानंतरं भावि मध्यस्थवचनेन का
लविशेषतद्व्याप्तिनिष्ठत्वेनावधारितत्वं तत्र तादृशमध्यस्थवचनमेव त
त्तद्विभागो व्याहत इति भावः इति तत्र च प्रागेवोत्पन्नानीति स्वरसात्पुनः
स्वत्वनाशोत्पत्तिकल्पनाव्यावृत्तिः॥ एवंच मध्यस्थवचनोपदिष्टतत्तद्दि
नवृत्तित्वनिर्णयविषयीभूतस्वत्वं दास्यां वर्त्तते॥ तच्च कालिकाव्याप्यवृ
त्तीनीति लिखनात् तत्तद्दिनोत्तरं तत्तद्दासीनकर्म्मकारयेदिति जीमूतवाह
नमतं॥ अत्र स्वत्वमेव किं द्रव्यादिसप्तपदार्थान्तर्गतं अतिरिक्तं वा अत्र पितामह
चरणाः स्वत्वं नाम तत्तद्द्रव्यवृत्तिसंस्कारविशेष इति मीमांसकमतभाष्ये
त्याहुः नैयायिकमते तु तत्तद्द्रव्यनिरूपितस्वामिवृत्तपूर्वमेव स्वामित्वं तच्च नि
रूपकतासम्बन्धेन द्रव्यवृत्तिरित्याहुः तदेव सम्यक् न तु यथेष्टविनियोगा
र्हत्वेन शास्त्रसम्यत्वं वा स्वस्वत्वे सति यथेष्टविनियोगार्हं च स्वामित्वा त्माश्र
यात् शास्त्रेणापि स्वस्वत्वास्पदीभूतस्यैव यथेष्टविनियोगो बोधित इति तथै
वान्माश्रयाच्च अतएवातिरिक्तपदार्थ एव स्वस्व मिति पदार्थतत्त्वे शिरोमणिः
तस्य च संस्कारत्वकल्पने प्रामाण्याभावात् गुणत्वादौ च प्रमाणाभावात् स
प्तपदार्थातिरिक्तपदार्थत्वमिति तस्याभिप्रायः तच्च सुवर्णरजतगवादिरू
पद्रव्यवृत्ति श्रीकृष्णतर्कालंकारस्तु स्वत्वं यथा द्रव्यागतं तथा गुणगतमपि
यथा नीलं वृषमुत्सृजेदित्यादौ नीलगुणविशिष्टवृषोत्सर्गबोधनात् त
त्र गवि स्वत्वं विना न संभवतीति विशिष्टत्वं स्वीक्रियते॥ तथाच विशेषेण
नीलगुणे विशिष्ट्ये च गवि स्वत्वस्य सिद्धत्वात् यथा पुत्रविशिष्टपिता आगत इ
त्यादौ इत्याहुः॥ तन्न अन्यत्र कुत्रापि गुणगतस्वत्वादर्शनात् नीलं वृषमुत्
सृजेदित्यादौ दण्डीपुरुष कुण्डलीतिवत् नीलगुणसमानकालीनोत्सर्ग

प्रत्ययेनेपिस्वतिविरहान् तथाचत्यागस्तु गौरवनीत्वगुणस्य तत्तत्कालेगवि
सत्वंनियामकमितिभावः॥ नैयायिकास्तु उपचयापचया [illegible] दिनात
स्यावस्पनानात्वस्वीकारान् नानास्वत्वकल्पनारूपगौरवभयेनपुरुषगत
मेवस्वामित्वंकल्प्यतेततन्निरूपकत्वंचस्वरूपसम्बंधरूपंनानारूपाप
न्नतद्द्रवनिष्ठंस्वीक्रियतेइत्याहुः अप्यधनगतंस्वत्वंपुरुषगतंवास्वामित्वं
भवतुतत्रकारणंकिं अत्रापि नामहचरणाः अर्ज्जनमेवस्वत्वहेतुस्तच्चार्ज्ज
नंशास्त्रोक्तार्ज्जयितृव्यापारएवसोपित्रिविधः। कायिकवाचिकमानसिकःय
थाकृषिवाणिज्यादिः कचिद्वाचिकः यथाप्रतिग्रहनिःक्षेपहरणादिः
दायस्थलेतुकचिज्ज्ञानेनैवार्ज्जनमितिस्मरणात् उत्पत्त्यैवार्थस्वभेनेतिगौत
मवचनाच्चपुत्रत्वीतिसंवंधाद्वौवपुत्रादीनामुत्पत्तिरेवार्ज्जनंतदपिचका
यिकमेवेतिवदन्ति॥ अत्रच अर्ज्जनस्यनानाविधस्यस्वत्वंप्रतिग्रहेतुत्वंतृ
णारणिमणिन्यायेनयथावह्निसामान्येनतृणंहेतुःतृणंविनापिमणितोवह्नि
तुपादर्शनात् एवंनमणिरपिनापिवा अवणिसंज्ञकःकाष्ठविशेषः तस्मा
त्ववह्निविशेषंप्रतितृणादिकंहेतुःतथास्वत्व [illegible] विशेषंप्रतिकृष्यादेर्हेतुत्वं
तथाचधान्यादेरुत्पादकस्यैवआदौस्वत्वंततःक्रेतुग्रहीत्रादिनामितित
त्रचपूर्वस्वामिनस्तुइच्छावत्तादेवस्वत्वनाशः साचमूल्यग्रहणपुण्यकाम
नादितोभृत्यादितोः स्वामिमनक्रियानिष्पत्त्यादितोपिभवति॥ तत्रकेतुःस्वत्वं
मूल्यदानसंकल्पद्रव्यस्वीकाराभ्यामेवजायतेप्रतिग्रहीतुश्चद्रव्यस्वीकारा
देवतस्यार्ज्जनान्तराभावात् भृत्यादिनांचभर्त्तुरिच्छाद्वारातत्कर्मकरणादे
वभवत्तवाभृत्यादीनामपिद्रव्यस्वीकारोपिस्वत्वहेतुरितिदायस्थलेउत्पत्तिरे
वकारणंसोचशरीरात्मसंवन्धविशेषएवनत्वाद्यक्षणसम्बन्धः॥ ननुजीवतः
पितुर्धनेपुत्रस्यस्वत्वंस्यात्नचेष्टापत्तिःशास्त्रविरोधात्॥ पितुर्प्यूर्ध्वंरतेपु
त्राविभजेयुर्धनंपितुः॥ अस्वाम्यंहिभवेदेषांनिर्दोषेपितरिस्थिते॥ इतिदे
वलेन॥ पुत्राणांजीवतिपितरितद्धनेअस्वामित्वमुक्तमितिचेन्नदेवलवच
नेनिर्दोषेपितरिस्थितेअस्वाम्यकथनेनपितृमरणस्यापिफलतपुत्रस्वत्वं
प्रतिकारणत्वकथनात् तत्रचनिर्दोषइतिदर्शनात् पितृयातित्यस्यापिपु
त्रस्वत्वहेतुत्वमुक्तंतयोरननुगमात्स्वत्वनाशरूपकव्यापारजनकत्वे
नैवकारणत्वेकल्प्यमानेगौरवात् अन्यंप्रतिकारणत्वेनैवकारणत्वेअ

न्यथा। सिद्धत्वाच्च नदुपेक्ष्य पितृस्वत्वनाशत्वेन हेतुत्वमिति फलितं॥ ननु तथा
सति पितृमरणोत्तरं तदीय धने पुत्रस्य प्रतिक्षणं स्वत्वापत्तिः पितृस्वत्वानाशस्य
पुत्रत्वसंबन्धस्य च सर्वदा सत्वात् न च उत्पत्तिकालीनत्वविशिष्ट पितृस्वत्वना
शत्वेनैव हेतु त्वान्न दोष इति वाच्यं तथापि जीवता ब्राह्मणेभ्यः पित्रा दीयमा
ने धने पुत्रस्वत्वापत्तेर्दुर्वारत्वात् इति चेदत्रोच्यते अदत्तेपि धने मूल्यसंक
स्वीकाराभ्यां क्रेतुः स्वीकाराच्च प्रतिग्रहीतुः स्वत्वापत्त्या स्वत्वं प्रति स्वत्वं त्वेन प्र
तिबंधकत्वकल्पनात् न प्रतिक्षणं धारावाहिक स्वत्वोत्पत्त्यापत्तिः पित्रा दीयमाने
च ब्राह्मणस्येदं भवतु इत्याकारिकायाः पितुरिच्छाया प्रतिबंधकत्वकल्पनादे
व पुत्रस्य न स्वत्वं एवमुपेक्ष्यास्य। तं विशेषेपि यथा परेण भुज्यमानां भूमिं विंश
ति वर्षं पि नोपेक्ष्य पितो येक्ष्यते तत्रापि पितुः स्वत्वनाशात् पुत्रस्य स्वत्वमिति न जायते
पितृज्ञात परभोगत्वेन एव पितृसम्बंधाधीन स्वत्वं प्रति प्रतिबंधकत्वात् एवं दुहि
त्रादि स्वत्वं प्रति च पुत्रत्वादि संबधाधीन स्वत्वेनैव कार्य्यकालवृत्तितया प्रतिबंध
कत्वादेव सत्यपि पुत्रात्वेपि न धने न दुहित्रादेः स्वत्वं एवं च प्रतिस्वत्वनाशत्वेन
का कारणत्वान्तरं न कल्पनीयं देवल वचनस्य तादृश कार्य्यकारणस्य भावे नुग्रा
हकत्वमेव यथा यदि प्रतिस्वत्वे सति पुत्रस्वत्वं न जायते तदा तु सुतरां पि तरि जी
वति पुत्रस्य अस्वामित्वमिति प्रतिपादितं अत्र जीमूतवाहनः॥ प्रतिग्रहो न स्व
त्व हेतुः प्रयात्वे स्वत्वोत्पादक व्यापारत्वेन प्रतीग्रहीतुरेव दातृत्वापत्तेः॥ किंतु
दानमेव स्वस्वत्व ध्वंस इव परस्वत्वोत्पत्तारपि हेतुः। न च ग्रहणं स्वीकारः स्वी
कारश्च अस्वस्य स्वस्वत्वानास्पदीभूतस्य स्वकरणं स्वस्वत्वास्पदीकरण व्यापा
रः स च व्यापारः ग्रहणमेव एवं च ग्रहणात् पूर्वं स्वस्वत्वानास्पदत्वं तद्दाने स्फु
टमेव ग्रहणेतु जायते तस्य स्वत्वास्पदत्वं भवतीति ग्रहणमेव स्वत्वहेतुरिति वा
च्यं स्वीकारघटकीभूत स्वत्वस्य यथेष्ट विनियोगार्हत्वरूपत्वात् तथाहि संप्र
दानस्य परोक्षे दत्ते तस्य सत्वे जाते पितस्य यथेष्ट विनियोग न भवति॥ अज्ञानस्व
त्व कत्वानु ज्ञाने व दानेदं ममैवेति ज्ञानं भवति तदैव च ग्रहणं ततः स्वकीयत्व
तज्ज्ञानात् अन्यानुमतिमनपेक्ष्य स्वरावयथेष्टं विनियुङ्क्ते इति॥ न च याजनध्यापन
प्रतिग्रहैर्ब्राह्मणो धनमर्जयेदिति स्मरणात्। प्रतिग्रहस्यार्ज्जनरूपत्वं तथा
च आर्ज्जनं स्वत्वजनकत्वेनेति वाच्यं॥ अत्रार्ज्जयेदित्यस्य स्वत्वं जनयेदिति नार्थः
परंतु सत्वजनकं व्यापारं दानत्यागं उपपादयेदिति॥ तथाहि यथा अध्यापय

नेनयाजनेनवादानादंदानोनुक्तहृत्यदात्तस्यागं संपादयेत् अन्यथा विषया
प्रसिद्धतया आपभिसंधानमेव नस्यादिति॥ ननु अर्ज्जयेदित्यस्य स्वत्वंज
नयेदित्यर्थः याजनादौ वस्वत्वजनकत्वं स्वीक्रियते एवं चाकामेनापि प्रति
ग्रहस्य स्वत्वजनकत्वं वाच्यमिति चेत् स्वीकर्तुरपि दानत्वापत्तिः॥ तथाहि
परस्वत्वापत्तिस्वरूपफलजनकत्वं दानत्वं तच्च सम्प्रदानएववर्त्तनेइति॥ नच
परस्वत्वजनकत्वेन दानत्वं दानस्य परस्वत्वंजनकत्वे प्रामाणाभाव इतिवा
च्यं प्रदनिस्वा म्यंकारणमितिमनुना प्रदानस्यैव संप्रदान स्वत्वकारणत्व
स्योक्तत्वादिति॥ जीमूतवाहनमतं॥ अत्र पितामह चरणाः। प्रदानं स्वाम्यका
रणमितिमनुना प्रदानस्यापि संप्रदानस्वत्वे सहकारित्वमुक्तं तच्च पूर्वस्वामि
स्वत्वनाशद्वारा प्रतिग्रहस्तु स्वत्वकारणं याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो
धनमर्ज्जयेदिति स्मृत्यपाणिध्नतस्मृति वचनवलात् याजनाध्यापनयोः परंप
रया स्वत्वजनकत्वेनमर्ज्जनत्वं सिद्धं प्रतिग्रहस्य च भाविनस्तदाज्ञानविषयत्वा
संभवेनार्ज्जनरूपत्वासंभवात् पूर्वोक्तयुक्तिरपि शिथिलीकृता॥ अतएव सामा
न्यतोब्राह्मणोद्देश्यक दानेपियस्य कस्यचित्ब्राह्मणस्यैव भोगो भवति अन्यथा
विनिगमनाविरहात् सर्वब्राह्मणस्वामिकद्रव्यस्यएकेन संग्रहे साधारणद्रव्यस्ये
वसर्वेभ्यो दाप्यत्वापत्तिः न च येन पश्चात् ग्रहीष्यतेन तस्यैव स्वत्वं जातमिति कल्प
यितुं शक्यते प्रमाणाभावात् न च काशीस्थं ब्राह्मणमुद्दिश्य एतद्देशे दत्तं द्रव्यं
तत्स्वीकारात् प्राक् अपहारतोपि न चौर्य्यदोषः स्यादितिवाच्यं दृष्टापत्तोप्र
तिविरहात्॥ अथवा परद्रव्यग्रहणमित्यनेन परस्वत्वास्पदीभूतद्रव्यवत्
परस्वत्वोद्देश्यकेच्छाविषयद्रव्यापहरणस्यापि चौर्य्यत्वस्वीकारे दोषविरहा
त् अथा॥०॥ परोक्षे कल्पितं दानं पात्राभावे कथं भवेत्॥ गोत्रजेभ्यस्तथा
द्यात्तदभावे स्वबन्धुषु॥ इति धौम्यवचनेन॥ स्वीकाराभावेपित्यक्तद्रव्यस्य
तदुद्देश्यसम्बधर्पणनियमात् दानमात्रेणैव स्वत्वमवगम्यते अन्यथा उद्दे
श्यसम्बन्धिमात्रानुधावनं कथं स्यादिति चेत् वैपरीत्यमवेहि तथाहि यदि
प्रतिग्रहं विनापि दानमात्रात् उद्देश्यस्य स्वत्वं भवति तदा तस्य पित्र्यधनत्वात्
अवश्यं पुत्रादिना लभ्यमेव इति किमर्थं धौम्यवचनारंभः॥ ननु जीवत्स्व
भ्योत्याम्नतमेव ब्राह्मणमुद्दिश्य दत्तं धनं पुत्रादिभ्यः समर्पयेदित्येतदर्थकमे
वतचन इति चेत् किं नायानमेतेन प्रतिग्रहात् पूर्वं स्वत्वोत्पत्तेन स्माघट

द्विश्यदत्तंतत्रप्रत्यर्पणाभावे दानस्यासम्यकत्वंशास्त्रबोधितेअतः प्रत्यर्पणम
वश्यंकर्त्तव्यंनत्रतस्यदानात्पूर्वंपरतोवामरणेकुत्रार्पणंकर्त्तव्यमित्तिसंदे
हे एवधौम्यवचनेनपुत्रादिष्वपर्णंकर्त्तव्यमित्युक्तं देवोद्देशाकदत्तनैवेद्यादि।
ब्राह्मणादिस्वर्पणमिवइतिनतु॥प्रमादतस्तुतन्नष्टंतावन्मात्रंनियोजयेत्
॥अन्यथास्तेययुक्तः स्याद्देव्यदत्तेविनाशिनी॥इतिमत्समासतनत्वधनव
चनेनदत्तानर्पितहेम्नोविनाशेस्तेयत्वकथना तत्स्तेयस्यचपरद्रव्यहरणरू
पत्वात्दत्तेद्रव्यंस्वीकारोत्प्रागपिपरद्रव्यमेवतथाचसुतरांसंप्रदानद्र
व्यमितिस्वीकारात्संप्रदानस्वत्वमितिस्पष्टमायातमितिएतदपिदत्तो
त्तरंतच्चेत्तत्दानीसंप्रदानस्वत्वास्यदीभूतंतदानस्यस्तेयसामान्यव
चनेनैवस्तेयत्वासिद्धेर्वचनारंभवैयर्थ्यात् तस्माद्धोणस्तेयबोधकमि
दंवचनं अस्वीकृतस्यापितदुद्देश्यकत्यक्तद्रव्यस्यपरद्रव्यस्यमान्यत्व
साधकमिति वोद्धव्यंतस्यसंप्रदानस्वत्वस्वीकारेपि दात्राअपहरणभा
वेनभवन्नतिपिप्रकृतस्तेयलक्षणनाक्रान्तत्वात् तस्माद्दत्तापहरणंप
रद्रव्यंहयमपिगौणमितिभावः॥ ननुयत्रदात्रावि प्रमुद्दिश्यकिंचिद्दत्तं
प्रत्यर्पणात्प्राकसंप्रदानेमृतेततपुत्रा॥भ्योःपर्यदिसत्तंतत्रचकिंपु०
त्रयैवकिंवापुत्रपौत्रदौहित्रादिभ्यः सर्वेभ्यः अथवापुत्रसत्त्वेपिदौहि
त्रादिभ्योःर्पणफलसिद्धिरितिसन्देहेउच्यते॥ गोत्रजेभ्यः तथादद्यात्त
दभावेःस्यबंधुष्विति क्रमदर्शनात् असासात्क्रमेपूर्वा[illegible]पूर्वाभावएव
परस्यदद्यात् इतिक्रम श्चदायभागक्रमवत्वेदितव्यः ननुदाय
भागस्यलीयक्रमोःन्योस्तुअन्नगोत्रजानांबंधुनांचक्रमदर्शनात्
आद्यैगोत्रजायपस्मैकस्मैचिद्देयंतदभावेबंधुभ्यइतिक्रमतवांगीकरणी
यः इतिचेन्न॥ब्राह्मणस्यचयद्दे यंसानुयस्यनवास्तिसः॥सकुल्येभ्योऽथ
निनयेत्तदभावेःस्वबंधुषु॥यदातुनसकुल्या॥ स्युर्नचसम्बंधिबांधवा
॥तदादद्यात्द्विजातिभ्यस्तेषसत्स्वप्सुनिःक्षिपेत्॥इतिनारदः॥वच
नेनन्ततक्रमस्याप्यनंगीकारात्तस्माद्दाय भाग क्रमयेवांगीकार्य्यः एतद्द्रव्य
स्यपित्स्वत्वास्यदीभूतद्रव्यतुल्यत्वात्। तथाच आद्यैपुत्रयोरप्रपौत्रेभ्यस्त
दभावेपत्न्यैदत्यादिस्वीकारात्प्राकसत्त्ववादिमतेचसुतरांतथैवकल्पनात्॥
अथसचेदेकस्मैएवपुत्रायप्रत्यर्पयामासअन्येचपुत्राःसंतितदास्वीकर्त्तु

वे वोपार्ज्जकत्वात् अन्येषां तत्रानधिकारः पित्रुद्देशेस्य स्वत्वमूलकत्वात्स
र्वेषामधिकारेपि यत्र समर्पितं तत्रार्ज्जकत्वात् घंशभागित्वमस्तु नचेष्टा
पत्तिः जीमूतवाहनादि विरोधात् तथाहि तन्मते अपर्णात् पूर्वमेव स्वत्व
स्वीकारात्तद्द्रव्यस्यपैतृकत्वेन सर्वेषां समांशित्वमिति चेन्नउच्यते तादृश
द्रव्यस्य परेणग्रहणे द्रव्यात्प्योदत्वाग्रहणेपि दाप्यत्वेव भवति यदित्व
शाच्या तत्पितरमनभिधाय स्वयमेवग्रहणाति तदानुवहुभ्योदत्तं अन्यैरू
पेक्षितं एकेनगृहीतमिव भवति अत्रेदमवधेयं दानात्तु सर्वेभ्यः पुत्रेभ्योः
र्पयेत् अन्यथाफलहानिः स्यात्तेनपुत्रसत्वेदौहित्राय नार्पयेत् इतिएवं के
नचित्कस्मैचित्प्रेषितंद्रव्यं यथापरः पथिहरति सचौरवद्दण्ड्योभवति द्र
व्यंचउद्देश्येन चौरात्स्वस्वं लब्धव्यमिति च तस्मात् दानस्थले स्वीकारएव
सत्वजनकः अतएव अचेतनस्य न स्वत्वं उत्पत्तिप्रयोजकत्वेष्टादि स्वी
कारपर्यन्तव्यापारविरहात्॥ ॥दानमात्रजन्यस्वत्ववादिमते तु मंत्रा
त्मकदेवतायैदत्तेन तत्स्वत्वंस्यात् नचदैवतानां चेतन्यवादिनां कागतिः
ः इतिवाच्यं तन्मते तु देवतानां चैतन्यं सत्वेपि स्वीकाराणां गीकारेण समाधे
यत्वात् एवं सर्वभूतोद्देश्यकोत्सृष्टजलादौ नकीटादेः स्वत्वमिति॥ स्वस्व
त्वध्वंसफलकपरस्वत्वोद्देश्यकत्याग एव दानं नत्कर्तृत्वंच नस्वीनकर्तृरिद
तितस्यनदातृत्वं नच परस्वत्वोत्पत्तिफलकत्वां नभीवेनैवदाधातुरस्ति
रस्तु इति वाच्यं गौरवात् विषयताविशेषरूपोद्देश्यता मपेक्ष्यकार्य्यत्व
रूपफलत्वस्य गुरुत्वात् न च तथासति स्वस्वत्वध्वंसविषयकत्वमेवोच्य
तां किंफलत्वनिवेशेनेति वाच्यं तथासति फलस्य धात्वर्थानंतर्भावेन धात्वर्थी
तावच्छेदकीभूतफलशालित्वरूपकर्म्मत्वासंभवात् दाधातेवकर्मक
तास्यात्॥ नचैवं विनिगमनाविरहः फलत्वं स्वस्वत्वध्वंसे परस्वत्वेवा
च्यं दानस्य स्वत्वोत्पादकत्वेपि प्रदानं काम्यकारणमिति मनुवचनं शा
स्त्रमस्ति इति वाच्यं नस्य पूर्वस्वामिस्वत्वनाशद्वारा परस्वामिस्वोत्पा
दकत्वनात्यर्थ्यकत्वेपि क्षतिविरहात्॥ अस्तुवा घटंजानातीतिवत्विषय
त्वरूपमेव कर्म्मत्वं तथाचस्वस्वत्वध्वंसपूर्वकत्वविशिष्टपरस्वत्वोद्देश्य
कत्यागत्वं दाधात्वर्थः॥ अथवा स्वजन्यपूर्वस्वामिस्वत्वध्वंसोत्तरपरस्व राम ।
त्वोत्पत्तिफलकत्याग एव दाधातोरर्थः अतएव गां ददातीत्यत्र गां स्वत्वनि ४

र्मुक्त्वा परस्वं करोतीत्यर्थः। नु भूय नेताद्दश दानकर्त्तृत्वं च नस्वीक
र्त्तरि तस्य पत्न्याभावात् तेन पूर्वस्वत्वनाशाजननाच्चेद्रतिएवं च मनुवचने
स्वाम्यकारणमितियथाश्रुतार्थकमेव॥ अतएव स्वस्वत्वध्वंसद्दारापरस्व
त्वप्रयोजिकायामुपेक्षायां मन्त्रं न दानत्वाप[illegible]त्तिरितिनिरस्तं। तत्र च प
रस्वाम्यं प्रति साक्षात्कारणत्वस्य निविष्टत्वादितिबोध्यं। विक्रयादिस्थले
पिमूल्यं गृहीत्वा गां ददातीति प्रयोगात् न तत्र दोषः एवं याचमानाय दा
तव्यमप्रकाशकृतमस्तांदूति॥ ऋणशोधनेन स्त्रीभ्यो दासचान्येभ्यः
प्रदधात् किंचिदुद्दृतं। इतिऋण प्रयोगे च दाधातुप्रयोगः सेगच्छते किं
तु भोज्यं दद्यात् द्विजातये इत्यादौ दाधातोः प्रदानमेवार्थः तच्च विक्रयादि
व्यावर्त्तक अदृष्टार्थकत्वादिरूपविशेषणक्रोडं तवेदितव्यं। त्यागत्वनिवे
शाच्च म्रियमाणोपि नरीनदंदातीति प्रयोगः एवं प्रव्रज्यादौ च ज्ञेयं यदितु
प्रव्रजिष्यन्वा अभिसंधत्तेपि नाए तावद्धनं मयोपेक्ष्यते मम पुत्राणामेव
भवतु इति तदापुत्रस्य सर्वस्वं दत्वा म्रतः प्रव्रजितो वा इत्यादि प्रयोगो भव
त्येव अतएव जीमूतवाहनादिभिः॥ दायभागपदव्युत्पत्तिकरणेदीय
ते इति व्युत्पत्त्यासौ दायशब्दो दाती प्रयो[illegible]गांत गौणः मृतप्रव्रजिता
दिस्वत्वनिवृत्तिपूर्वकपरस्वत्वापत्तिफलस्याम्यात् न तु मृतादीनां त्याग
स्तत्रास्तीत्युक्तं न तु मृतादीनां स्वस्वत्वध्वंसफलकोनममेदमिति संकल्पा
त्मकस्त्यागस्तत्रास्तीतिस्मार्त्तः॥ तथा च त्यागपदं संकल्पमाह संकल्प
श्चेच्छाइतिबोध्यं॥ एतत्पर्य्यंतपितामहमतानुसारेण उक्तं अत्र जी
मूतवाहनमतान् विशेषः प्रतिग्रहात् प्राक् दत्तद्रव्ये स्वत्वं न भवती
ति सच सूक्ष्मानुभवगम्यः युक्तिश्च समाना तथा च स्वीकारपदेन सम्भ
तिरुच्यते यथा नैयायिकाः अतिथिं परमेश्वरं स्वीकुर्वीतिइतिएवं च द्र
व्यं स्वीकरोतीत्यत्र दानेन जातं स्वस्वत्व[illegible]मन्यते तेनोपेक्षते इत्यर्थः प्रति
ग्रहस्य अर्जनरूपत्वं याच्ञ्याहृतम् अयाचितमाहस्यले तु प्रतिग्रहस्या
र्जनत्वाभावेपि न क्षतिः इत्यपि वक्तुं शक्यते॥ ननु एवं सती भागीरथी ती
रे केन चित् दत्तं ममेदं भवतु इत्याकारकप्रतिग्रहाभावेपि ममेदमिति
ज्ञात्वा यथेष्टं विनियुंक्तामिति चेत् का क्षतिः अथवा पूर्वप्रतिगृहीतप

रदत्तधनस्यविनियोगनिषेधोपि तीरेप्रतिग्रहस्याज्यइतिवचनेन लक्ष
णयावोधितइत्यलमतिविस्तरेण॥ //P.11 ततश्चपूर्वस्वामिसम्बन्धाधीनं नत्स्वाम्यो
पवनेयत्रद्रव्येस्वत्वं तत्रनिरूढोदायशब्दइतिजीमूतवाहनः॥ संबंधाधी
नमितिविशेषणात्तद्दत्तादिधनेदायपदप्रयोगापत्तिवारणं सम्बंधश्चउत्प
त्तिपाठविवाहादिघटितः पुत्रत्वसहाध्यायित्वपत्नीत्वादिरूपः॥ तत्स्वा
म्योपरमेइत्यनेनदम्पत्योर्मध्यगं धनमितिवचनात् जीवतिभर्त्तरितद्
द्धनेपत्न्या अधिकारात्तत्रदायपदप्रयोगवारणं इतिश्रीकृष्णतर्कालं
कारः॥ नत्रननुस्वत्वं प्रतिस्वत्वत्वेनप्रतिबंधात्कथंजीवतःस्तुधने
पत्न्या अधिकारइति चेन्नतेः पित्यमरणादेवेवप्रत्येकंतन्तद्व्यवहितो
त्तरैस्वत्वंप्रतिग्रहेत्तत्वोपगमनेस्वत्वत्वेनप्रतिबंधकत्वास्वीकारात्।
एतन्मतेतुअगत्याविवाहस्यपूर्वस्वत्वनाशकत्वंतादृशपत्नीस्वत्वान्यस्व
त्वंप्रतिवाधकत्वमिति॥ पितामहचरणास्तु॥ तत्वतदानीपत्न्याः स्वत्व
मेवनस्वीक्रियतेनदृश्यतेचोपविष्टात् तन्मतेतत्स्वाम्योपरमेइतिन
देयमेवइतिध्येयं॥ सोयंदायस्तस्यभागोभजनमधिकारः स्वामित्वंवा
इतियथामतंवोध्यञ्चमित्युक्तंभाकदृश्यतेत्वभजधातोरधिकारार्थत्वं॥ या
ज्ञवल्क्यवचने यथा॥ एषामभावेपूर्वस्यधनभागुत्तरोत्तरः इतिधनभाक
धनाधीकारीत्यर्थः॥ अतएवमनुरपिदायभागं निवोधतेत्युक्ता॥ ऊ
र्द्ध्वंपितुश्चमातुश्चसमेत्यभ्रातरःसमं॥ भजेरन्पैत्रकं रिक्थमनीशास्ते
हि जीवतोः॥ इत्यनेनपुत्राणां धनाधिकारमात्रमुक्ताः ज्येष्ठएवतुगृह्णी
याद्वित्यादिनाएवंसहवसेयुर्वा इत्यंतेनसहवासंनिरूच्यते। पृथग्वाधर्म
काम्ययाइत्यादिनाविभागंतनुमुपक्रमेतत्रमातुरूर्द्ध्वमितिमातृधना
।धिप्रायेण अतएवकुल्लूकभट्टेनपैत्रकत्वंरिक्थमितिमातृकस्यापिग्र
हणमित्युक्तं॥ अतएवबौधायनोपि।मतस्वंगजेषुतद्गामीस्वार्थीभव
नीत्यनेनपुत्राणां केवलंपित्र्यधनेऽधिकारमेवस्कानइत्यलमतिरेकेण
॥ जीमूतवाहनस्तु॥ नानापुत्राणंतत्तद्धनगतनानास्वत्वानांनिर्णाय
काभावेनएतद्धनमस्येत्यनिर्णीतानांगुटिकापातादिनाएतद्धनमस्येति
विशेषज्ञानंविशेषज्ञापनंविशेषज्ञापकागुटिकापातादिर्वाविभागइत्यु रामः

श्लोकः २७

त्कृवान्।। स्मार्त्तास्तु।। पितृमरणोत्तरं जातत्तदीयाखिलधने खिलपुत्र
निरूपितः स्वत्वनाशानंतरं गुटिकापाताद्दिनात्तदूनेन तत्पुत्रस्यैवैक
निरूपितस्वत्वं तज्जनगुटिकापातात्द्वितीयभागपर्यायीरत्याहुः।। जीमू
तवाहनस्यायमभिप्रायः पितुर्निधनानन्तरं तत्स्वत्वनाशानान्तरं पुत्रत्वा
दिसम्बंधात्पुत्राणां स्वत्वं जायते तच्च सत्संगजेषु तद्गामीति बौधायनव
चनाद्वगम्यते पुत्रस्वत्वस्य पितृस्वत्वनाशानंतरमेव संभवात् पितृस्वत्वना
शोपीति विभागानन्तरं पुत्राणां समुदायिकस्वत्वनाशे स्वात्वान्तरे तत्र तौच
प्रमाणाभावं।। विभागबोधकशास्त्राणामेव तद्बोधकत्वे पि एकस्वत्वनाशाय
रस्वत्वोत्पत्तिकल्पने गौरवमिति न स्मात्तत्र यस्य गुटिकापातो न विष्वितित
त्रैव तस्य स्वत्वं कल्प्यते तेन स्वचामन्यस्य त्वेन निश्चेतुमशक्यतया गुटिकापातेन
निर्णयकर्त्तव्यस्य एवं विभा८ग इति स्मार्त्तानामाशयः स्तु।। गुटिकापातस्य व्यंज
कत्वं तु अनुमानविषयस्यैव वाच्यं तच्च यथा वह्निं विनधमो न तिष्ठति अ
न्यथा को धूमं जनयेदिति नियमात् धूमात् वह्नि निर्णयः न यानतत्स्वत्वं वि
नात्मनामा गुटिकापातो न भवतीत्यत्र प्रमाणाभावः।। न नु दिव्यस्थले यथा
ग्निः पापिनमेव दहति न निष्पापमिति नियमो द्रो धर्माधिष्ठानात् तथा
गुटिकायां धर्माधिष्ठानात्यत्र यस्य स्वत्वं तत्रैव तस्य गुटिकापात इति क
ल्पनीयं इति चेन्न परिदृष्टस्थले मुनिवचनैरेव निष्पापस्यादाहकत्वबोध
नात् तत्र तु कल्पकाभावान्।। यद्दितु गौरवभयात्तथा कल्प्यते इति वक्तुं
शंक्यते तदापि गुटिकायां तादृश धर्माधिष्ठान कल्पने पुनः गौरवं ए
व पितृमरणे सम्बंधसाम्यात् सर्व धनस्यैव सर्वेषां स्वत्वापत्तिवारणाय तत्
त्स्वत्वं मतितरस्य स्वत्वव्याप्तिमाभावत्वेन प्रतिबंधकत्व कल्पने च महा
गौरवं एवं पितुर्निधनानंतरं तदीयास्वयोरेकमादाय भ्रात्राय दर्जितं
तत्रार्ज्जकस्य त्वावं शावपरस्यैकः सर्वसम्मतः तत्र यदि प्राचीनधनवि
भागे गुटिकापातार्ज्जके तस्य एवाश्वः पश्चाल्लुब्धतदा मादेशिकस्वत्ववा
दिमते प्रागप्यर्ज्जकस्यैवसोश्व इति तेनार्ज्जितधनस्य समभागो युक्तः।।
एकस्यत्वायासेनापरस्याश्वासासेनार्ज्जकत्वात् इति अत्र श्रीकृष्णतर्का
लंकाराः साधारणधनोपष्टंभकत्वेन अनिर्णीतस्वत्वं धनोपष्टंभस्यैव बोध

नान्यत्र व्यवहारविरोध इत्याहुः अनयोर्मतयोः समुदायिकस्वत्ववादि
स्मार्त्तमतमेव हरिनाथमिताक्षराकाराभ्यां च स्वमति मिश्रभवदेवादीनां सम्म
तमित्यवगंतव्यं॥ तर्कालंकारैस्त्वेतदेव मतं भंग्या स्वीकृतमिति मंतव्यं॥ वृ
हस्पतिः॥ एकां स्त्रीं कारयेत्कर्म्म यथांशेन गृहे गृहे इति॥ ननु यदि कश्चित् भ्रा
तास्वविभागार्हदिने नांशदासीं विक्रीणीते तदा तदुत्तरं अन्येषां भ्रातृणां स्वांशयो
ग्यदिने दासीकर्म्म कुर्य्यान्न वा इति संदेहे उच्यते विक्रेतुर्यद्दिवसं स्वत्वमासी
त् विक्रयेण तत्क्रेतुरपि तावद्दिवसं स्वत्वं भवति अतो मासमध्ये अंशक्रमेण ताव
द्दिनान्येव क्रेता भुंजीत॥ अत एवान्यस्मात् क्रीते राज्ञा एव तत्र करग्रहणोपयु
क्तमेव [illegible]ति तत्रैव भोक्तुः शस्यभोगोपयुक्तं स्वत्वं भवति राज्ञस्तु करग्रहणो
पयुक्तं स्वत्वं तिष्ठतीति अत एव यो राजकरं दत्वा यां भूमिं कर्षति तदुत्पन्नं श
स्यं च भुंक्ते तत्र कर्षकस्य स्वत्वं स्वीक्रियते न तु अस्य एव कर्षको यदि तां भूमिं वि
क्रीणीते तत्र क्रेतुस्तावद्दशमेव स्वत्वं भवति येन राज्ञः करसमर्पणानंतरं तस्या
भोगः सम्पद्यते इति न तु तत्र कर्षकस्य अस्वामित्वं व्यवहारविरोधात् तथा
च सति एकस्मिन् एकद्रव्ये एकदैव नानास्वत्वस्वीकारात् सजातीयस्वत्वं प्रति
सजातीयस्वत्वस्य न प्रतिबंधकत्वं कल्पनीयं एतदेवोक्तं श्रीकृष्णतर्कालंका
रः समानजातीययोर्व्याप्यनयोर्विरोधादिति॥ अत्र सत्सु स्वांगजेषु तन्नाभिस्वार्थी
भवतीति बौधायनवचनेनापि तद्धने पुत्राधिकार उक्तः स बाधिकारः पितु
र्निधनानंतरमेव॥ ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समं॥ भजे[illegible]रन्
पैतृकं रिक्थं अनीशास्ते हि जीवतोः॥ इति मनुभन्याः पितुरूर्द्ध्वमेव पि
तृधनभजनकथनात् अत्र समानएवामीषामधिकारः विंशोद्धारादिस्तु ज्ये
ष्ठादीनां गुरुत्वात् मानरक्षार्थं स्नेहेन चान्यैर्भ्रातृभिर्दीयते इति भावः॥ च
एडेश्वर रत्नाकर भवदेवाचस्पतिमिश्रजीमूतवाहनस्मार्त्तमतमेतत्॥ भ
जेरन् इत्यादिना विभाग उक्तः॥ पितुरूर्द्ध्वं विभागकथनेनापि तु रूर्द्ध्वं स्वामि
त्वमायातं अन्यथा पूर्वं कथं न विभजेयुरित्याहुः विंशोद्धारस्य गुणवज्ज्ये
ष्ठविषयत्वात् विंशोद्धारकांक्षि ज्येष्ठपरत्वात् अत्र समभाग उक्तः विं
शोद्धारणाकांक्षिः निर्गुणज्येष्ठपरः इति तेषामभिप्रायः सममिति आदौ
विंशोद्धारं कृत्वा पश्चात् समविभागः कर्त्तव्यः इत्युरयकरः हलायुध एमः ६

पारिजाताभ्यां सममिति स्थाने सहेति पठितं । व्याख्यातं च पारिजाते सहपर
स्परमिति ॥ पैतृकमित्यत्रापि त्रायिरित्यर्थं कृते कशेषपितृमातृशब्दा
न्नाद्वितः तथा च पैतृकं चेत्सर्वैः इति हलायुधः चण्डेश्वरश्च स्पतिभव
देवाद यः ॥ कुल्लूकभट्टस्याप्ययमेवाशयः ॥ मातृपुत्रेषु त्राणामधिकारे विशे
षस्याग्नवबोधनात् ॥ पैत्रिकमिति नामहमपि विवक्षितं द्रव्ये पितामहोपात्ते इ
त्यादिवाक्येन तत्रापि भागस्य बोधनात् इत्यपरः इति चण्डेश्वरः अत्र
पित्र्यस्य पुत्रैरिति च यथासम्बन्धमात्रोपलक्षणमुक्तं तथा त्रापि पितुश्च
मातुश्चेति पैतृकमिति च सम्बन्धिमात्रोपलक्षणं व्यैयाच दायरूपं यस्य य
स्य धनं भजनीयं तस्य तस्योर्द्धमेव इति तन्मतमिति ब्रुमः जीमूतवाहनस्मा
र्त्तादयस्तु मातुश्चेति कथनात् मातरि जीवन्त्यां पुत्राणां विभागे न धर्म्मः तथा च
अरक्थमूलं हि कुटुम्बमस्वतन्त्राः पितृमतोः मातुरप्येवमवस्थितायाः इति
शंखलिखितौ इत्याहुः तथा च मातरि जीवन्त्यां पुत्राणामस्वतन्त्रेण विभागे
पितुरनुज्ञां विना कर्त्तुं न युज्यते मातुर्महागुरुत्वादिति शंखवचनपर्य्यवसा
नमनुवचनमपि तत्रैव नेयं इति तेषामाशयः ॥ अत्र केचित् अनियामत्त्वादिजी
वतो वितिदर्शनात् पितरि जीवति तद्धने स्वत्वमस्त्येव किन्तु पित्राज्ञां विना
तत्र यथेष्टविनियोगं कर्त्तुं न शक्नुवन्ती त्याहुः तत्र जीमूतवाहनेनोक्तं तदा
नीं पुत्रस्वत्वे प्रमाणाभावादिति स्पष्टमाह ॥ देवलः ॥ पितर्युपरते पुत्रा विभ
जेयुर्द्धनं पितुः ॥ अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते ॥ निर्दोषे इति क
थनात् सदोषे पितरि स्थिते पितृधने पुत्राणां स्वामित्वमिति प्रतिपादितं तथा
च दोषेणैव स्वत्वनाश इत्यवगम्यते एवमेव स्मार्त्तादयः । अथ दोषकः इत्य
पेक्षायां ॥ नारदः ॥ विनष्टे वाप्यहरणे पितर्य्युपरतो स्पृहे ॥ इति विनष्टपतिते
इति स्मार्त्तः तथा च दोषपदेन पातित्यमेवोक्तमिति भावः ॥ अपरणेऽस्पृहस्या
श्रीमरहिते ऽउपरतस्पृहे सत्यपि स्वत्वे स्वगतधनेच्छाविरहिते चेति स्मार्त्ताः अ
त्राप्युपरतस्पृहत्वादिना पुत्राणां स्वत्वं पितृधने भवतीति ज्ञापनात् इति जीमू
तवाहनः चण्डेश्वरस्तु ॥ उपरतस्पृहे विषयस्पृहाविच्छेदवतीत्यर्थमाह ॥
निवृत्ते वापि मरणे पितर्य्युपरतस्पृहे इति पाठं निवृत्ते रमणे भवति सामा
र्थ्ये निवृत्ते इत्यस्यापि व्यापारांकाहमित्यप्येवं हलायुधस्तु निवृत्ते वापि मरणादि
ति पाठमाह तदर्थश्च जीमूतवाहनोक्तः मरणान्निवृत्ते जीवतीति उपरतस्पृ

हेइत्यस्य विशेषणं अन्येपि पाठः। प्रकाशकारसम्मतः साच जीमूतवाहना
नभिप्रेतः जीमूतवाहनमते उपरतस्पृहत्वेपितुः स्वत्वनाशः स्फुटएवोक्तःच
तदेश्वरादीनांमतेपितथाकल्प्यति॥ स्मार्त्तमतेतु उपरतस्पृहत्वेपि स्वत्वमस्ती
तिज्ञायतेस्पृहायाविषयेच्छाया उपरमो ध्वंसः स चप्रतिप्रतिक्षणमेव वर्त्तइतेइ
च्छायाहिलक्षणंस्थायित्वात् तस्मात्त्वरमस्पृहयोः ध्वंसोवाच्यः तथासतिपि
ताआदौविषयाद्युपरामततो विषयंउपेक्षितवान्तदुत्तरंपुनर्विषये मिच्छति
तत्रकिंपितुःउपरतस्पृहत्वंभवतीतिसन्देहेस्वयमेवाह अत्रोपेक्षयास्वत्वना
शितेपुनरिच्छयनेस्वत्वमितिवोध्यमितितद्देतदुपयुक्तमुपरतस्पृहत्वमाहस्व
त्वसमानकालीनेच्छाध्वंसवत्त्वमुपरतस्पृहत्वमिति॥ तथाचउपेक्षायाःपूर्वया
वत्यःइच्छाभूताःताश्चतत्प्रागभावाश्चस्वत्वसमानकालीनाः तदानीउपेक्षाया
अभावात्स्वत्वानिवृत्तेः तादृशप्रागभावानां असमानकालीनाइच्छाच उपेक्षापू
र्वकालीनेच्छानांचरमातस्याध्वंसः एव उपरतस्पृहत्वंएवंचयादृशविषयस्पृहो
त्तरंमध्येपुनस्पृहा न भवतितदुत्तरमुपेक्षातदुत्तरंस्पृहायांभविष्यंत्यावातीद
शस्पृहानाशेसतिपुत्रैर्विभागः कर्त्तव्यः इतिकेचित्तस्मात्तो भिप्रायःमाद्गुः
तत्वसुन्दरंपितुश्चस्वत्वेवर्त्तमानेपुत्राणांस्वेच्छाकृतविभागासंभवात्पितुरुप
रतस्पृहत्वेनविभागस्पृहाअप्यसंभवात्पितृकृतविभागासंभवाच्च उपेक्षांवि
नाविषयस्पृहायाश्चवमत्वज्ञानासंभवाच्चवस्तुतः उपरतस्पृहत्वमेवस्वत्वनाश
कं उपेक्षायामेवपर्य्यवसन्नंतथाहि अतऊर्द्ध्वंविषयकर्म्मणाकरिष्यामीतिसंकल्प
सहितविषयस्पृहानाशः धेनेस्वत्वंनाशयतितदुत्तरवर्षचतुष्टयमतीत्यपुनर्य
दिविषयमिच्छतितदापितत्रनस्वत्वंएवंचवर्षचतुष्टयउत्तरभाविस्पृहायाः
प्रागभवसत्वात्संकल्पकालीनइच्छाध्वंसेउपरतस्पृहत्वेसंपत्तयेस्वत्वसमा
नकालीनेतीच्छाविशेषणंएवंचसंकल्पकालीनइच्छाध्वंसेनैवतदुत्तरक्षणेस्वत्व
नाशजननात् इच्छाध्वंसक्षणेविभागाधिकारयेसत्यपिस्वत्वइत्युक्तं इतिवर
।न्तितदपिनमनोरमः पूर्वोक्तदूषणाभासात् तस्माज्जीमूतवाहनादीनांमतमे
वसम्यक् उपरतस्पृहेसतिस्त्री भोगादिवासनारहितेसतीत्यर्थस्तुमातुर्निवृत्ते
रजस्मीत्यनेनसमानेभवतिनिवृत्तेवापिमरणेइतिपाठेयदिनस्यादिति॥ केचित्तु
सत्यपिस्वत्वेइत्यादिविषयकर्म्मणिइच्छारूपस्पृहायाआत्यंतिकध्वंसेकथंचितज्ञा
तेपुत्राणांविभागःशास्त्रानुमतः तदानीचसमधनंमांतुइत्याकारकउपेक्षामरणं रामः

घभावात्पितुस्स्वत्वं विघ्नं तएवनचतदानींपितृस्वत्वेऽविभागानुपपत्तिरितिदू
षणमुक्तमितिवाच्यं उपरतस्पृहेऽपिविभागस्यशास्त्रानुमतत्वात् उपरतस्पृह
शब्देनस्पृहामकृत्वातदुत्तरंचस्पृहयतिनदाउपरतस्पृहाः विच्छेदानंतरंमम
धनंमास्त्वित्यनेनधनमुपेक्षते तदातुउपेक्षयास्वत्वनाशः तदुत्तरंचस्पृहाज
ननेऽपिनपुनस्स्वत्वंइत्यत्रोच्छेवस्वत्वसमानकालीनेस्याघनुसरणं उपरतस्पृह
त्वज्ञानंचतदुचनैवभवतीतिस्मार्त्तमतमपिसाधीयः॥एवंचउपेक्षायाः॥संग्रहः
उपलक्षणतयैव अशरणोऽस्यनेनैववा वृद्धाश्रमंवागच्छेत् इतिहारीतवचन
स्यवेदासंन्यासित्वेनपुत्रैश्वर्येवासोवृद्धाश्रमइतिप्रकाशकारव्याख्यानुसारी
पन्थाः अयंइत्याहुः॥पातित्येतुस्वत्वनाशः प्रायश्चित्तश्रवणात् इतिस्मार्त्त
श्रीकृष्णतर्कालंकारादयः॥पितामहचरणास्तु पातित्यप्रव्रज्ययोः पूर्वोत्प
न्नस्वत्वनाशकत्वमेव अन्यथा पतितप्रतिग्रहनिषेधकशास्त्राणां संन्यासिध
नाधिकारबोधकशास्त्राणां चाप्रमाणं स्यात् एवंचप्रायश्चित्तवैमुख्याभावेऽपिपू
र्वधनस्वत्वनाशेऽपि तदानिअंनतः पुत्रादितोभिक्षितो धने नप्रायश्चित्तधनेनास्ति
इप्रायश्चित्तान्यथानुपपत्तिवरनास्तीत्याहुः॥श्रीनेदमवधेयंप्रायश्चित्तंचिकीर्षी
रपियतितस्यपरिस्वत्वंनश्यतितदापतित्यदशायांनष्टस्वत्वेधनेकृतोप्रायश्चि
त्तेऽपिनस्वामीस्यात् तदानींस्वामित्वसाधकहेत्वभावदिष्टापत्तौचशिष्टाचारवि
रोधादितिनस्मात्पातित्यपूर्वोत्पन्नस्वत्वनाशंप्रतिप्रायश्चित्तवैमुख्येपातित्यंहे
तुरत्रमूलंशिष्टाचारविरोधइतिएवंप्रव्रज्यायांउपेक्षेवस्वत्वनाशकानतुप्रव्र
ज्यायाः स्वातंत्र्येण त्वनाशंप्रतिहेतुत्वंकल्पनीयमिति॥नारदः॥पितर्यूर्ध्व
गतेपुत्राविभजेयुर्धनंपितुरिति॥तथाचपितुरूर्ध्वगमनोत्तरंपुत्राणांविभाग
कथनात् तदानीमेवपुत्राणांस्वत्वंजायतइतिच्छलतोनारदेनोक्तं शंखलिखि
तौ अतऊर्ध्वम् क्रमभागेनजीवतिपुत्राविकहविभजेरन्नजघपिस्यात्पश्चादधि
गतंनेवनहीःपुत्रा अर्थधर्मयोरस्वातंत्र्यात्॥ अतः पितुरूर्ध्वंतन्मरणादारि
तिभावः॥भागः दायभागः॥ ननुऊर्ध्वमित्यत्रएवकारः पूरयितुंनशक्यतेजीवत्यपि
पितुरिच्छयाविभागदर्शनात् तथाचजीवतिपितरिपुत्राविभजेरन्नवाइत्यत्राहन
जीवतीतिपुत्रास्तुपितुरननुमत्यातस्मिन्जीवतिपितरिक्थंनभजेयरितिभावः॥
केचित्तुपितुरूर्ध्वंगमनेसत्येवयतः पुत्राणांदायाधिकारः अतः जीवतिपितरिन
रिक्थंविभजेरन्नितिहेतुपूरणेनव्याख्यानमाहुः पश्चादधिगतंपितृनिरपेक्षे

विद्यादिभिर्मिलित्वा अ[illegible]र्ज्जितमिति रत्नाकरः पश्चादधिगतमित्यनेनैव पि
तृनिरपेक्षेणैवार्ज्जितमित्यायातं इति तस्याशयः पितृनिरपेक्षमर्जनं कथं संभव
तीत्याकांक्षा निवृत्तये विद्यादिभिरिति मिलित्वा इति अमिलित्वा वा इत्यपि द्र
ष्टव्यं तदुक्तिफलं तु निश्चिन्मः ॥ हारीतः ॥ जीवति पितरि पुत्राणामर्थादानविस
र्गाक्षेपेषु स्वातंत्र्यं कामदाने पोषिते आर्त्ते गते वा ज्येष्ठ एवार्थांश्चिन्तयेत् ॥ अथा
दानं पितृनैरपेक्ष्येण साधारणधनग्रहणं अर्थार्ज्जनमिति पारिजातः ॥ तथा च
पित्रनुमतिं विना पुत्रोऽर्थार्ज्जनाय व्यापारं न कुर्यादित्यर्थः तथा च तदानीमर्ज्जिते
धने स्वातंत्र्यं नास्तीति पूर्ववचनोक्त एवार्थ इति भावः ॥ विसर्गो दानं आक्षेपः क्र
णिकहस्तात् उद्धृतो [illegible] ग्राहणं तेषु न स्वातंत्र्यं न पित्रनुमतिं विना कर्त्तुं क्षमता । का
मदाने काममात्राद्वदानतरि धर्मार्थयोरुपयापायावनपेक्ष्यैव इच्छामात्रे
ण दानशीले इत्यर्थः । पितरि इति विशेषः इति चण्डेश्वरः व्याख्या कामदाने काम
दाने पितरि ज्येष्ठस्य अर्थचिंतनकथनेन अन्येभ्योऽधिकं प्रभुत्वं पुत्राणामर्थेषु द्यो
त्यते इति न हि यदृच्छया ददतं धनस्वामिनं अन्यो वारयितुं शक्नोति ॥ न चात्र शं
क्यं ज्येष्ठस्यार्थचिंतनमेवोक्तं न तु कामदानवारणमिति यतो ज्येष्ठस्यार्थचिं
तनकथनेन पितुरर्थाचिंतनमुक्तं तेन च पितुरश्रेयावशीकरणमायातमिति
प्रकाशकारेणुकामंजीमूतवाहनाभिमतं श्चायं पाठः अत्र हारीतवचनेन
जीवत्येव पितरि कथंचित्कार्याक्षमे ज्येष्ठ एव व्यवहारमर्हतीति प्रतिपादि
तं ॥ मनुना तु प्रसन्ने पितरि तद्वृत्ते सर्वेषां भ्रातृणां तुल्येऽधिकारेऽपि ज्येष्ठ एव पि
तृवदर्थव्यवहारं कुर्यादित्युक्तं तथा ॥ ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशे
षतः । शेषास्तमुपजीवेयुर्यथैव पितरं तथा ॥ उद्वृत्ते पितुश्च मातुश्चेद
ति प्र[illegible]क्रान्तं ज्येष्ठ एव तु गृह्णीयादिति सकलज्येष्ठगुणवान् ज्येष्ठो विभाज्यपि
तृधने पितृवत्स्वतंत्रः स्यादित्यर्थ इति रत्नाकरः ॥ तथा चापि तरि प्रते ज्येष्ठपु
त्रस्यैव सर्वधनाधिकारित्वं निरस्तं उद्वृत्ते पितुश्चेति पूर्ववचने वक्ष्यत्वविशिष्टपुत्रा
णामधिकारबोधनात् शेषास्तदनुजाः तं उपजीवेयुः ग्रासाच्छादनार्थमिति विशे
षः तथा च ज्येष्ठानुमतिं विना न तदनुजाः किंचिद्धनव्ययमपि कुर्युरिति भावः । तमुप
जीवेयुः तत्कृत्यकृत्या वर्त्तेरन्निति रत्नाकरः ॥ अथ सहवासविधिः ॥ ननु पितृ
धने यदि सर्वेषां पुत्राणां तुल्योऽधिकारस्तदा कथं ज्येष्ठ एव तत्र स्वातंत्र्यं कुर्यादित्य
पेक्षायामाह ॥ स एव ॥ ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ॥ पितृणामनृण

श्चैव सतस्माद्सर्वमर्हति। यस्मिन्नृणं सन्नयति येन चानंत्यमश्नुते॥ सएव धर्म्म
जः पुत्रः कामजानितरान् विदुः। पुत्री भवति पुत्राभावमयुक्तानिमुक्तो भवतीत्यर्थः स
चीनीष्टः पुत्राभावे स्वर्गाभावबोधकश्रुतिबोधितः पुत्रपलोकाभाव इति कुल्लूकभ
ट्टः॥ तथा च पुत्राभावेन मन्दपालऋषेः पुरापलोकगमननिराकरणं महाभारते आ
दिपर्वविशेषे उक्तं कृतपुण्यस्यापि जनस्य स्वर्गाभावे मूलं पितृऋणापरिशोधनं महा
भारते तथैव बोधनात् अतएव तस्मात् पुत्रे जाते पितृऋणशोधन भवतीत्यवगम्यते।
तदेव स्पष्टमाह पितॄणामनृणश्चेति जातमात्रेणेति मात्रपदात् पुत्रस्य वैदिककर्म्म
कारणापेक्षा संस्काराद्यपेक्षा च नास्तीति व्यंजितं अनएव यदि पुत्रो जातमात्रो मृतः
तथापि पितुर्ऋणमोक्षो भवतीति अत्र पुत्रे जाते पितुर्ऋणं जाते च तत्शोधनं श्रु
तिरेव बोधयतीति तस्मात् कारणात् पितुर्वा सर्वं धनमर्हति प्राप्तुमिति शेषः इयं च
ज्येष्ठपुत्रस्तुतिः न फलं न तः सर्वपुत्राणामेकतमस्य स्वातंत्र्ये कल्प्यमानेकस्य कल्पनी
यमित्यपेक्षायां विनिगमनाप्रमाणाभूता ज्येष्ठपुत्रस्यैव स्वातन्त्र्यं कल्पयतीति भावः
। ज्येष्ठपुत्र एव धर्म्मजः स्वर्गभोगसंपादककुम्भाद्दृष्टजन्य इत्यनेन पुनरपि ज्येष्ठपु
त्रं स्तौति यस्मिन् ऋणमित्यादि ऋणं सन्नयति यस्मिन् आत्मन् अर्पयत्वं यस्मिन्नोज
तीत्यर्थः॥ येन चानन्त्यमश्नुते आनन्त्यं मुखस्य इति शेषः। अश्नुते प्राप्नोति ऋणमुक्त
त्वादिति भावः॥ केचित्तु आनन्त्यं पौत्रद्वारा इति वक्ष्यते यथा। पुत्रेण लोकान् जयति
पुत्रेणानन्त्यमश्नुते॥ अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपं। व्याख्यातं च कुल्लूकभ
ट्टेन लोकान् स्वर्गादिलोकान् पौत्रेणानेनैव चिरकालं तिष्ठतीति तथा चात्रायं स्व
रसो लक्ष्यते ज्येष्ठपुत्रस्य ज्येष्ठपुत्रेणैव आनन्त्यं चिरकालावस्थानं भवतीत्याहुः कु
ल्लूकभट्टेनानन्त्यमश्नुते अमृतत्वमश्नुते इति व्याख्यातं श्रुतिश्च प्रमाणीकृता तद
नेन च ऋणसन्नयनं ज्येष्ठपुत्रस्य पितृस्वर्गद्वारकपातनप्रयोजककुम्भाद्दृष्ट
जन्यत्वेहेतुविधया उपन्यस्तं अतोनयोरान्तर्यं इतरान् कामजानकामवशतामाप
द्यस्त्रियं संभुंजानेन जनितान् विदुः मुनयो जानंति एतदपि स्तुतिवादमात्रं न त्याच॥
तथ्यव्यवहारः पुत्राः यद्यपि कोगयां त्रजेदिति न तु यद्येवं तर्हि ज्येष्ठपुत्रो यदि सर्वमेव
धनं न लात् छलाद्वा गृह्णाति तदा दोषो न भवतीति इति मैवेतदाह स एव। पितेव पा
लयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः पुत्रवच्चापि वर्त्तेरन् ज्येष्ठे भ्रातरि धर्म्मतः।
पिता पुत्रान् पालयेदिव ज्येष्ठभ्राता यवीयसो भ्रातॄन् पालयेत् न तु प्रतारयेत्
पुत्रवत् वर्त्तेरन् अन्ये भ्रातरः न तत्र द्वेषं कुर्य्युरित्यर्थः॥ तथा॥ ज्येष्ठः कुलं वर्द्धयति

विनाशयति वापुनः ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः॥ कुलविवर्द्धयति सम्य
ग्व्यापारैः कनिष्ठपरिपालने कुलव्यवृद्धिः विनाशयतीति योग्यतामात्रं इति रत्नाकरः
॥ योग्यतामात्रमिति तथा च पालिता अपि यदि कथंचित् जीवेरन् तदा नाशसंभव
इति भावः कुल्लुकभट्टश्च ज्येष्ठो येन पथा धर्म्मेण अधर्म्मेण वा याति कनीयांसोपि ते
नैव पथा यांतीति धर्म्माचरणेन कुलवृद्धिः अधर्म्माचरणेन कुलनाशः अत्र चगु
णवज्ज्येष्ठः लोके पूज्यतमो भवति साधुभिः अनिन्दितश्च भवतीत्याह॥ तथा॥ यो ज्ये
ष्ठो ज्येष्ठवृत्तिश्च माते व स पितेव सः आज्येष्ठवृत्तिर्यस्तु स्यात् स संपूज्यस्तु बंधु
वत्॥ मातेव स इति मातृतुल्यत्वकथनात् मातृधनस्यापि ज्येष्ठवशीकरणं प्रतिपा
दितं एवमन्यत्र संबन्धिधनेपीति केचित्तु ज्येष्ठवृत्तिः कनिष्ठभ्रातादिपाल
नं तदनाचरणेपि सः पूजनीय एव किं तु बंधुवन् मातृत्वादिवत् न तु तस्याज्ञाचर
णमपेक्षितं॥ तथा॥ न चाहवा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकं। यौतकं भार्य्यालं
कारादि इति हलायुधः॥ नारदः॥ विभृयाद्वेच्छतः सर्वान् ज्येष्ठो भ्रातान्यथा पिता॥
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षाकुले स्थितिः॥ यदि तु ज्येष्ठपुत्रो योग्यश्च मध्य
मः अन्यो वा योग्यः तत्र स एव सर्वाधिकारि प्रतिपालनक्षमत्वात्॥ यथाह शक्त्यपेक्षा
कुले स्थितिः शक्तिं परिजनप्रतिपालनं क्षमतां अपेक्षते शक्त्यपेक्ष्या इति तथा च
वयोज्येष्ठत्वं नाव एपकमिति भाव: ननु यदि शक्तिसापेक्षमेव सर्वाधिकारित्वं तदा
नुक्तज्येष्ठस्ततेरत्र प्रकरणोऽनुचितत्वमिति चेन्न केवलस्तुत्या किं सर्वाधिकारि
त्वं उक्तं पितेव पालयेदित्यनेन पालनस्यापि उक्तत्वात् तथा च यदि द्वौ पुत्रौ सर्वे वा
पुत्रा योग्याः तदा अन्यपुत्रस्य पालनक्षमत्वेति ज्येष्ठस्य सर्वाधिकारित्वज्ञापनाय
ज्येष्ठस्य स्तुतिवादः इति ध्येयं शंखलिखितौ॥ पितर्य्यशक्ते कुटुम्बव्यवहारं ज्येष्ठः कु
र्य्यादनंतरो वा कार्य्यज्ञः तदनुमतेन न त्वकामे पितरि रिक्थविभागो वृद्धे विपरी
तचेतसि दीर्घरोगिणि वा ज्येष्ठ एव पितृवदर्थान् पालयेत् इतरेषां रिक्थमूलं हि
कुटुम्बमस्वतंत्राः पितृमंतमातर्य्यप्येवमवास्थिता यामनंतरो मध्यमः तस्याप्यसा
मर्थ्ये तदनुज इत्ययं क्रमः॥ तदनुमतेन ज्येष्ठानुज्ञया इति रत्नाकरः॥ तदनुम
ते पित्रनुमत्या इति वुमः॥ एतेन कुटुम्बभरणोपायागित्वं ज्येष्ठादेः क्रमेणोक्तं व
द्धे इत्यादिना तु अर्थपालनमुक्तं अतो न पौनरुक्त्यं तत्रापि ज्येष्ठत्वं न नियाम
कं किं तु कार्य्यज्ञः एव पालयेत् ज्येष्ठ इति वचनं तु ज्येष्ठस्य सर्वेषां वा कार्य्यज्ञत्वाभि
प्रायेण तथा च जीवति पीतरि यथा ज्येष्ठो नन्तरो वा तदनुज्ञो वा कुटुम्बभरणं कु राम: ८

श्लोकः २५

र्य्यात् अर्थश्च रक्ष्येत नस्ते पितरीव वर्त्तव्यं ज्येष्ठोऽग्रजीवत्पितृः अनंतरो वा इति
लिखनात् अनंतरशब्देनाव्यवहितोऽनुज उच्यते॥ अन्यथा अनन्तरत्नाकरस्यैवोक्तं
स्यात्॥ मनूक्तं ज्येष्ठस्तुति स्तुतत्सत्ताभिप्रायेण विपरीतिचेतसीतिवानादिनाभ्रातॄन्
चेतसीति रत्नाकरः॥ अर्थपालनस्य स्वयमसामर्थ्येपि ज्येष्ठपुत्रादिद्वारेण्यवश्य
कर्त्तव्यत्वेवीजमाह नारदः कथमस्थमितिकुटुम्बं कुटुम्बस्य भरणं अस्वतंत्राणां नाघनधि
कारिणः॥ मातर्य्यपित्र्यं गुणवत्यां जीवंत्यां अस्वतंत्राः पुत्रा इत्यन्वय इति रत्नाकरः॥
तदनुत्ताविनाशनाघनधिकारिणः पितरिस्थितेन इदं मातुः स्वत्वाभावात् दानादिक
र्त्तृत्वं पुत्राणामेवेति मंतव्यं। एतद्वचनं दृष्टांतविधया प्रमाणत्वेनोपन्यस्तं तथा चायं
पितरिमृते पुत्राणां सहवासविधिः सच सर्वेषामिच्छया अन्यथा तु विभागः कर्तव्य
स्तदाह॥ मनुः॥ एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया पृथग्विवर्द्धते धर्मस्तस्माद्ध
र्म्या पृथक्क्रिया॥ एवमिति सर्वे कांपि तद्धनेस्वामित्वे तु येपि एकतमं ज्येष्ठं अन्यं वा
सर्वप्रभुत्वेन परिकल्प्ये अन्यं यथोचितवृत्त्या नदभिमतयैव वर्त्तेरन्निति रित्या सह वा
सेयुः यदि धर्मवृद्धीच्छा भवति तदा पृथक् वसेयुरिति। एतद्वचनं व्याख्या स्वपुत्रकृ
तविभागप्रकरणे॥ शंखलिखितौ॥ कामं वसेयुः संहता वृद्धिमाचक्षीरन्॥ संहता अन्यो
न्यसहायतया॥ वृद्धिमाचक्षीरन् वृद्धिं स्फुटीकुर्वीरन् वृद्धियुक्ता भवंतीतिया वत् इ
ति रत्नाकरः अतएव गौतमः॥ विभक्तजः पित्र्यमेवेत्यनेन विभा
गोत्तरकालं पुत्रोत्पत्तौ विभागमाह श्रेष्ठभागः॥ अधिकभागः॥ मनूक्तं विंशोद्धारा
दियुक्तभागः एवं मध्यमस्यैवपि ज्ञेयः स्वगुणवत् ज्येष्ठादिविषयः एवमेव स्मार्त्तादयः
श्रेष्ठः श्रेष्ठतमोऽधिक इत्यर्थः इति चंडेश्वरः॥ विंशोद्धारप्रकारश्च वक्ष्यते यथा
वा समतिर्भवेदितितथा च स्वयं यथेष्टं प्रदद्यात् पुत्राणामपि कस्मैचित् अधिकं
कस्मैचिन्न्यूनं भागं दद्यात् विभुः पिताचेत्पुत्रान्विभजेत्तस्य स्वेच्छया स्वयमुपा
त्तेऽर्थे पैतामहे तु पिता पुत्रयोस्तुल्यं स्वामित्वं॥ अत्रस्वपितृद्रव्यानुपघातेनपि
त्रर्जितधनविषयमेतदिति चंडेश्वरः॥ पितृद्रव्यानुपघातेन यदर्जितं तं
स्य समविभागे विषमविभागे च पितापि प्रभुरिति मिश्राः॥ युक्तं चैतत् पितृद्रव्योपघाते
नयदर्जितं तत्र द्रव्यद्वारा तत्पितुरपि अर्जकत्वात् इयं तत् पैतृकमेवयुक्तं॥
स्रोत्रेदं चिन्त्यं॥ पैतामहद्रव्यस्यैव परिणायन्दत्तस्य श्रमेणेद्धारेण अर्जितव्यवहारः
किंचित्पैतामहधनोपष्टंभेन स्वास्थ्यमात्रादिनाप्रसूलस्य पैतामहवद्व्यवहार इति वि
षम शिष्टः संप्रतिभातीतियाज्ञवल्क्यः॥ विभागं चेत्पिता कुर्यात्

अथ जीवत्पितृकविभागः॥ शंखलिखितवचनेन त्वकामे पितरि रिक्थविभाग इति
दर्शनात् पितुर्विभागकामनासत्त्वे विभागस्य कर्त्तव्यत्वं प्रतीयते अतो जीवत्यपि पित
रि पुत्राणां विभागो भवति तत्र पितुरिच्छैव मूलं तथा च गौतमः॥ ऊर्ध्वं पितुः पुत्रा
रिक्थं विभजेरन् निवृत्ते रजसि मातुर्जीवति चेच्छति॥ ऊर्ध्वं पितुः पुत्रा रिक्थं वि
भजेरन्निति पुत्रकृतविभागोभिप्रायेण तत्प्रकरणं वक्ष्यते निवृत्ते रजसि मातरि
ति पैतामहधनाभिप्रायेण इति जीमूतवाहनस्वामीत्यादयः॥ तदपि अग्रे वक्ष्यते जी
वति पितरि ति शेषः इच्छति विभागमिति शेषः॥ शंखलिखितौ जीवति पितरि रि
क्थविभागोनुमतः प्रकाशो वाभिप्रेतो वा धर्म्मः॥ अनुमतः पित्रनुमत इति चण्डे
श्वरादयः॥ तथा च पित्रनुमत्यैव रिक्थविभागः पितरि जीवति भवतीति स्पष्टमे
वाह तुः प्रकाशमध्यस्य समक्षं मिथः मध्यस्थावलंबनं विना परस्परमेव धर्म्म
बुध्या॥ बौधायनः॥ पित्रनुमत्या दायभागः ननु पुत्रादिना सुखं वसतः पितुः क
थं विभागेच्छा भवति तत्राह॥ हारीतः॥ जीवन्नेव वा प्रविभज्य वनमाश्रयेत् वृद्धा
श्रमं वा गच्छेत्॥ स्वल्पेन वा संविभज्य भूयिष्ठमादाय वसेत् यद्युपदध्यात् पुनस्ते
भ्यो गृह्णीयात् क्षीणं स्व विभजेत्॥ वनमाश्रयेत् आश्रमान्तरं परिगृह्णीयात् वे
दसन्यासित्वे नैव पुत्रैः स्वर्य्यवासो वृद्धाश्रम इति प्रकाशकारः वृद्धाश्रमं चतु
र्थाश्रम इति हलायुधपारिजातौ॥ न च मनेव नमाश्रयेत् वानप्रस्थाश्रमः माश्र
येदिति विवक्षितं॥ वस्तुतस्तु प्रकाकारोनास्यायां ते न वनगमन वृद्धाश्रमगमना
तिरिक्तोपि स्थितिप्रकारो वर्त्तते इति रत्नाकरः॥ तेन भिक्षादिना स्वोदरं पूरयन् गं
गादिकमभिवसतीति तथा च आश्रमान्तरं इच्छा न पित्रादरं चिन्तितं मयि अविद्य
माने मम पुत्रा धनार्थं विवादमुत्पाद्य परस्परानिष्टकरणे विनाशं यास्यन्तीति तस्मा
न्मय्येव एषां विभागः कर्त्तव्यः इत्यादिकमिति ध्येयं॥ यदि तु पिता पुत्रादीनां स्वोप
भोगार्थपरस्परकलहेन पीडितः वांछति एषां विभागं दत्त्वा अहमात्मोपयुक्तं ध
नं गृहीत्वा पृथक् तिष्ठामीति तदाप्याह स्वल्पेन वेत्यादि। तथा च किंचिद्धनेन पुत्रा
न् विभजेत् तेषु न रत्नानि धनानि अर्ज्जयित्वा भुंजते पिता तु वृद्धः सुतरां तदानीका
र्य्यक्षमः भोगार्थं पुण्यार्थमपि विविच्य बहुतरधनमादाय वसेत् किन्तु एकांशं न
कुर्य्यादिति मंतव्यं यदि तु बहुतरैरपि धनैः कथंचित् दैववशात् स्वार्थीनि वृत्तिर्न भ
वति तदाह यद्युपदध्यादिति क्षीयेदित्यर्थः पुनस्तेभ्यः पुत्रादिभ्यः पुत्रादीनां
च पित्रादिसेवातः परो धर्म्मो नास्तीति मूलं॥ ते च पित्रुपार्जितसर्वधनेरपि नि राम:

र्दत्स्य संभवे स्वयार्जितः धनान्यपि दद्युः॥ स्त्रीणां स्तु विभजेदित्ति यदि केचन पुत्रा अ
क्षमास्तदा तानप्यस्य धनेन पोषयेदित्यर्थः॥ नारदः॥ पितैवावस्वयं पुत्रान् विभजेद्व
यसि स्थितः॥ ज्येष्ठवाश्रेष्ठभागेन यथावास्य मतिर्भवेत्॥ वाशब्दो विकल्पार्थः पिता वा
पुत्राएव वा विभजेयुः तथा च पितुर्वार्द्धक्ये तदनुमत्या पुत्राएव विभजेयुः इत्यर्थः
पितृमरणोत्तरविभागस्येदं पक्षांतरः वावयसि स्थितः यत्र कुत्रचित् वयसि
द्वितीयभागस्तृतीयभागाद्वारपि स्थित इत्यर्थः अतएव गौतमः॥ विभक्तजः पित्र्य
मेवेत्यनेन विभागोत्तरकालं पुत्रोत्पत्तौ विभागमाह श्रेष्ठभागः॥ अधिकभागः॥ म
नूक्तं विंशोद्धारादियुक्तभागः एवं मध्यमादेवपि ज्ञेयः स च गुणवज्ज्येष्ठादिविषयः
एवमेव स्मार्त्तोदयः श्रेष्ठश्रेष्ठतमोऽधिक इत्यर्थः इति चण्डेश्वरः॥ विंशोद्धा
रप्रकारश्च वक्ष्यते यथा वास्य मतिर्भवेदिति तथा च स्वयं यथेष्टं दद्यात् पुत्रा
णामपि कस्मैचित् अधिकं कस्मैचिन्न्यूनं भागं दद्यात् विष्णुः पिता चेत्पुत्रान् विभजे
त्तस्य स्वेच्छया स्वयमुपात्तेऽर्थे पैतामहे तु पितापुत्रयोस्तुल्यं स्वामित्वं॥ अत्र स्वपितृ
द्रव्यानुपघातेन पित्रर्ज्जितधनविषयमेतदिति चण्डेश्वरः॥ पितृद्रव्यानुपश्लेषे
णार्ज्जितं तस्य समविभागे विभाषमविभागे च पितामहरिति मिश्राः॥ युक्तं चै
तत् पितृद्रव्योपघातेन यदर्ज्जितं तत्र द्रव्यद्वारा तत्पि[illegible]तुरपि अर्ज्जकत्वात् द्र
व्यं न तथैत्वकमेव युक्तं॥ क्षेत्रेदं चिन्त्यं॥ पैतामहद्रव्यस्यैव परेणापहृतस्य श्रमे
णोद्धारे स्वार्ज्जितव्यवहारः किंचित्पैतामहधनोपष्टम्भेन स्वाश्रमादिनाप्रसक्त
स्य पैतामहव्यवहारः इति विषमशिष्टत्वं प्रतिभातीति याज्ञवल्क्यः॥ विभागं चे
त् पिता कुर्यात् स्वेच्छया विभजेत् सुतान्॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः स
मांशिनः॥ एतद्वचनेन कल्पत्रयमुक्तं स्वेच्छयेत्यनेनाधिकन्यूनविभागः इ
त्येकः कल्पः श्रेष्ठभागदानं ज्येष्ठायेति द्वितीयः कल्पः सर्वेषां समांशित्वमिति
तृतीयकल्पः न्यूनाधिकविभागस्य पुत्रकृतविभागस्य त्वे तत्पितृकृतविभा
गस्य लेन हेयता इत्यादि प्रतिपत्त्यर्थमेव न्यूनाधिकेत्यादिवचनांतरं वक्ष्यते इह
तोपौनरुक्तं यजीवति पितरि पुत्राणां स्वभावादेव न तदानीं पुत्रेच्छया विभागः इ
ति केचित् तथा वस्त्वच्छया इत्यनेन पितुरिच्छया विभागः कर्तव्य न तु पुत्रेच्छ
या इति [?]दीपकलिका न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः इत्य
नेन वचनांतरेण न्यूनाधिकविभागस्य तेनैव कथनमतो मतद्वयमेवोपादेयं तं
त्रेण द्वयोरेव मध्यंतरेणाभिहितत्वादिति तदेतन्नकल्प्यं तत्र पुत्रेच्छया न वि

भागइत्यत्रास्वाम्यंहेतुरितिचपितुःस्वार्जितधनविषयकंपैतामहेव्यवस्थान्तर
स्यभूर्य्यापितामहोपात्तेइत्यादिनावक्ष्यमाणत्वादितिरत्नाकराभिप्रायः॥अत्र
चस्वार्जितधनेपितृकृतविभागेस्वेच्छयान्यूनाधिकभागकरणेसमत्वेपिकाम
क्रोधादिनान्यूनाधिकभागोनकर्त्तव्यकात्यायनः।जीवद्विभागेतुपितानैकंपुत्रंवि
शेषयेत्।निर्भाज्जयेन्नचैवैकमकस्मात्कारणंविना।अकस्मात्कमपिहेतुंभ
क्तत्ववहुःपोष्यत्वाक्षमत्वादिरूपंजीमूतवाहनादिसम्मतंविनाएकंपुत्रंवि
शेषयेत्अधिकभागदानेनविशेषंएकपुत्रस्यनकुर्य्यात्कारणंअनंशताकारणं
शास्त्रोक्तंपातित्यादिकंस्वेच्छयाहंशपरित्यागंचविनाएकंपुत्रंनिर्भाजयेत्नि
र्भागंकुर्य्यात्एवंविंशोद्धारादिरपिज्येष्ठादिभ्योनदद्यात्अकस्मात्कमपिहेतुंगु
णंविनातथाचभक्तत्वादिरूपहेतुंसत्वेएकस्मैअधिकंभागंज्येष्ठादिभ्यश्चगुण
सत्वेविंशोद्धारादिकंदद्यात्क्लीवपतितादिभ्यश्चअंशंनदद्यात्इतिफलिता
र्थः यदितुकामात्तस्यभार्यापुत्रत्वादिनाएकस्मैअधिकंददातिक्रोधाच्चअन्यस्मैन्यू
नंददातिकिंचित्नददातिवाज्येष्ठायगुणंविनाविंशोद्धारंददातितदासविभागोऽ
सिद्धइत्याह॥नारदः॥व्याधितःकुपितश्चैवविषयासक्तचेतनः॥अयथाशास्त्रका
रीचनविभागेपिताप्रभुः।तथाचवातादिरूपात्यंतव्याधिजजन्यमोहक्रोधजन्यमो
हकामादिरूपात्यंतविषयसेवावशीकृतचित्ततादिवशात्अयथाशास्त्रकारी
पितृविभागेप्रभुर्नइतितथाचएतदेवास्याप्रभुत्वंयत्तत्कृतविभागस्यासि
द्धिःअनधिकारिकृतत्वात्मत्तकृतसंध्यावंधनवदितिभावः॥अतएवपिता
महचरणाः॥व्याधितइत्यादिनारदवचनेनप्रभुरित्यतिदेशात्स्वामिकृतइत्स्वा
र्जितधनेपित्र्याधारादिहेतौपित्रादिस्वामिकृतोपिविषमविभागादिर्नसिध्यतिअ
त्रायथाशास्त्रकारीज्येष्ठभागादिबोधकशास्त्रमतिक्रम्यन्यूनाधिकविभागका
रीचकारःप्रागुक्तव्याधितोइत्यादेःप्रत्येकंक्रियायांसमुच्चयार्थःकिंतुजीवद्वि
भागेरित्यादिकात्यायनवचनेकारणंविनेतिनिषेधाभिधानात्शिष्टपरंपरागत
प्रकृतिस्यकृपाहेतुभूतभक्तत्ववहुपोष्यत्वाक्षमत्वादिभागानर्हत्वहेतुभूतपा
तित्यादिसत्वासत्वकारणादेवस्वार्जितेपित्रकृतोविषमादिनानामनुक्तस्वेच्छा
धीनन्यूनाधिकविभागाभावोवाधर्म्यःनारदोक्तव्याध्यादिरूपप्रतिवंधकाभावात्
सिद्धोपीतिद्रष्टव्यंइत्याहुःप्रभोरेवअप्रभुत्वकथनात्अतिदेशःअयथाशास्त्र
कारीतिव्याधितादइत्यादेर्विशेष्यंतत्रअयथाशास्त्रकारित्वंविभागासिद्धौहे रम: २१

श्लोकः २५

तुः तत्र च व्याधितइत्यादिविशेषणं व्यावर्त्तकं हेतुगर्भं च यथायदिरूपया अयथा
शास्त्रं करोति न दातस्य नाप्रभुत्वमिति व्यावर्त्तकहेतुगर्भं च यथायदिरूपया अ
यथाशास्त्रं उएवं अयथाशास्त्रं कथं कुर्यात् अतो व्याधितइतितस्माद्धेतुगर्भमिदं
विशेषं ज्येष्ठापुत्रभागादिबोधकेतितथा च विंशोद्धारादिरूपाधिकभागदाने पि
तायथाशास्त्रकारित्वमिति भावः ॥ स्पष्टमाह ॥ याज्ञवल्क्यः ॥ मत्तोन्मत्तार्त्तव्यसनि
बालभीतादियोजितः ॥ असंबंधकृतश्चैव व्यवहारो न सिद्ध्यति ॥ व्यवहारपदेनात्र
णादानादि। अष्टादशनामेवग्रहणात् दायभागो न सिद्ध्यतीदान्यष्टादशैता
निव्यवहारस्थिता विह इति मनुना दायभागस्यापि व्यवहारपदत्वकथनात् अ
त्रापि व्यवहार इतिपदेन व्यवहारपदं बोध्यं ॥ आर्त्तो व्याधादिना ॥ व्यसनी कृताद्या
सक्तः ॥ बालषोडशवर्षैन्नवयाः ॥ भीतोदंडादिना असंबंधः साम्यनियुक्तः एतैः कृतं
दृष्टार्थकदानादि न सिद्ध्यति अत्र भीतानां तषणं विकृतचित्तत्वं बीजं अत्र तु आदि
[?]ह्वाद्यत्वं तत्र दासपुत्रादेर्ग्रहणमिति स्मार्त्तेरुक्तं युक्तमेव इति पितामहच
रणाः ॥ अत्र द्यूतादित्यादिपदात्कामादेर्ग्रहणं ॥ व्यसनं विपादि [?]ध्रंशेशेषेका
मजकोपजं इत्यभिधानात् ॥ तथा चायं भागः यथाप्रुविकृतं देवपूजादिकं
नादृष्टफलकं तथोन्मत्तकृतद्धादिरूसंदानरूपेच्छादिकं न पूर्वस्वत्वनाशज
नकं तत्र शौचस्य वा त्राक्रोधादेरधिकारत्वादितितस्मात्तत्कृतविभागस्यासि
द्धापुनर्विभागः करणीयः किंतु यदि तु गुणवते ज्येष्ठादिपुत्राय विंशोद्धारादि
दानस्य भक्त्यादिबीजकत्वात्समभागस्यापि शास्त्रोक्तत्वात् यदि च ज्येष्ठादिभ्यो
विंशोद्धारादियुक्तं भागं ददातितदापि तस्यायथाशास्त्रकारित्वं न भवति विंशोद्धा
रादेरपि शास्त्राणिमतत्वादिति संक्षेपः पातीत्यादीत्यादिपदे नयेषां ग्रहणं
तानि वक्ष्यंते अनंशो क्लीबपतितावित्यादिना भागानधिकारि[?]प्रकरणे ॥ अत्र
मनुः ॥ भ्रातृणामविभक्तानां यद्युत्थानं भवेत्सह ॥ न तत्र भागं विषमं पिता दद्या
त्कथंचन ॥ यदि पुत्रा युगपत् विभागमर्थयंते न दातु भक्त्यादिप्रयुक्तविषम
विभागे पिता न कुर्यात् विंशोद्धारादिकं तु ज्येष्ठादिभ्यो दद्यादेव तस्य भागरूप
त्वाभावादिति जीमूतवाहनः स्मार्त्तादयोप्येवं कुल्लूकभट्टस्तु यद्युत्थानं भवेत्स
हेति अर्जनकाले पितुः सहभावेन उत्थानं व्यापारकरणं यदि भवेत् तदा वि
षमविभागो मदेयइत्याह च एउम्बरोप्येवं ॥ विवादचिन्तामणिरपि फलत एव

मेव तुल्य व्यापारैर्भ्रातृभिर्व्वर्जितेद्रव्यमिति नविरोधइतिनेनोक्तत्वात् तुल्यव्या
पारैर्भ्रातृभिः पितृसहभावेनार्ज्जितद्रइतिफलितार्थः॥ पितृद्व्यविनाकृतार्ज्जितेतुभ्रा
तृणामेवप्राधान्येनस्वामित्वंनदूष्यतेइति अत्रजीमूतवाहनग्रंथटीकाकारश्रीकृ
ष्णतर्कालंकारेण अत्रविषमविभागाभावस्यन्यायतएवप्राप्तेर्व्वचनानर्थक्यमि
तिएवंसमुद्धृतोद्धारेसमानंशान्प्रकल्पयेदितिमनुनाअविभक्तद्रव्यात् पृथक्
कृतोस्यैवोद्धारतयातस्यविभागत्वाभावादितिदूषणद्वयमुपन्यस्तं॥ अत्रेदमुच्य
तेयदिभ्रातृभिःसहार्ज्जनंकृतंतदाविषमभागाभावःतर्कालंकारस्यापिसम्मत
ः इतिवक्तव्यंतेनन्यायतएवप्राप्तेरित्युक्तत्वात् यत्र तु युगपदेवसर्व्वेभ्रातरःवि
भागमर्थयंतेतत्रविषमविभागःकर्त्तव्योनवेतिकुल्लूकभट्टादिजीमूतवाहनाद्यो
ः परस्परंविवादः तत्रन्यायतःप्राप्तविषमकत्वेनैववचनस्योपपत्तौयुगपद्विभा
गप्रार्थनस्थलेमूलभूतस्मृत्यंतरकल्पनमितिजीमूतवाहनादिमतेदोषःननु
यथान्यायप्राप्तानुवादकंतथैवव्याख्यायंतथाहिअयमस्मम:पुत्रःस्वानर्थकरं
पित्र्यनिष्ठंचविभागमाकांक्षतिअतोपवादात् तस्मैअधिकोभागोनदेयइतिचेन्न
सहेत्यस्यैवपथ्यापत्तेयद्यस्मादेरुत्थानंभवेत्तदाविषमविभागंनदद्यादित्यस्यै
ववक्तुमुचितत्वात्॥ किंचन्यायतएवप्राप्तत्वादित्युक्तंयत्पुत्रसहकारेणपिता
र्ज्जयेत्तत्रज्येष्ठांशंअक्षमत्वादिनाअधिकांशंचपितानदद्यादित्यत्रकिंप्रमा
णंविशेषशास्त्रांतराभावात्युक्तेरभावाच्च यदितुपुत्रविनिर्म्मोकस्यस्वामिप्रा
यणैवणनदुक्तमित्युच्यतेतदापिनसंगतिः पितृविनिर्म्मोकार्ज्जनस्थलेपुत्राणा
मेवस्वामित्वात् तस्मात्पुत्राणांतुल्यव्यापारसहकारेणार्ज्जितेपितुर्न्निजांतस्वा
च्छंदेनन्यूनाधिकदानमनुभवविरुद्धमितितन्निवर्त्ततेशास्त्रेण इतिनचतथा
पिमूलभूतस्मृत्यंतरकल्पनयागौरवंसमानमितिवाच्यं आगत्यागौरवस्यादोष
त्वात् भ्रातृभिःतुल्यमर्ज्जनंकृत्वाकोपिवहुपोष्योऽधिकंलभतेभ्रातृभिस्तुल्यंवि
भागोऽधमंकृत्वाकोपिवहुपोष्यःसमांशंलभेतइतिविषमशिष्टभयात्तंत्रेणतस्या
पिएतद्वचनंविषयत्वकल्पनेनतत्रगौरवाधिक्याच्चयदप्युक्तंविंशोद्धारादेर्व्विभा
गत्वाभावइतितदपिनचारुप्रतिभाति॥ द्विःप्रकारोविभागश्चदायादानांप्रकी
र्त्तितः वयोज्येष्ठक्रमेणैकःपरःसमांशकल्पनादितिवृहस्पतिः॥ विंशोद्धारयुक्त
विभागस्यापिएकप्रकारविभागत्वकथनात् विंशोद्धारादिरहितस्यचान्यप्र एमः ९२

श्लोक २+

कारविभागत्वकथनात् अनिर्णीनस्वत्वके स्वत्वनिर्णयरूपस्यसकलपुत्रनिरूपितस्वत्व
नाशानंतरंयत्किंचित्पुत्रनिरूपितस्वत्वरूपवाविभागस्यतत्रसत्वाच्चप्रत्युतमनुनाविं
शोद्धारादिविवेचनंकृत्वैवसमविभागकथनस्वरसेनविंशोद्धाररहितभागस्यैवसमविभाग
परेनबोधनमवगम्यतेपरंतुतत्रकथंचनेतिलिखनात् भक्तत्वादिनिबंधनविषमविभागो
पिनकार्य्यइत्यवगम्यते अतएवमिश्रैः विंशोद्धारविवेचनं कृत्वैवभ्रातृणामित्यादिवचनम
वतारितमितिएवंउत्थानपरस्याउर्ज्जनयरत्वंसंभूयसमुत्थानस्थलेदृष्टं अत्रापितथाव
चनेनस्मृतिः यच्चोक्तंयत्रभ्रातरोविभागर्थयंतेतत्रविभक्त्यादिनापिविषमविभागोनदेयः
भक्तस्याप्यपराधित्वादितितत्रइदमुत्तरं तादृशदानस्यपितुरिच्छामात्राधीनत्वात्पि
तुरिच्छाभावेदानंप्राप्तमेववचनेनकिंप्रयोजनमिति अथयदिपितानथापिनददातितत्रा
न्यैःपुत्रैः वारणंकर्त्तव्यंभ्रातृणांत्वयमुत्थानेविषमविभागस्यादेयत्वंशास्त्रोक्तमितिवाक्ये
नतद्बोधशास्त्रंशार्थकमितिचेत्तत्स्यापराधिनांवचनानायाविरशास्त्रमित्यनुभवविरु
द्धमितिएवंयस्यपंचपुत्राः तत्रभक्तोऽक्षमोबहुपोष्यः अपरश्चएकत्रतेतेचत्वारोविभागम
र्थयंतेएकश्चनतथातत्रापिभक्त्यादिनिबंधनंविषमविभागदानंकर्त्तव्यमेवसर्वेषांभ्रातृ
णामुत्थानाभावात्यदिचबहुत्वमेवविवक्षितंनतुसर्वस्वंतदातुद्विपुत्रस्थलेद्वयोरेकस्मा
ध्यमानायांविषमविभागःस्यात्बहुपुत्रोत्थानाभावात् यदितुविभक्त्यर्थोऽविवक्षितः त
दापंचपुत्रस्थलेपिशठेनकेनचित्पुत्रेणविभागंप्रार्थ्यभक्तस्यापिअधिकविभागोवार
यितुंशक्यतेइत्यनुभवविरुद्धमितिप्राच्यमभिमतंजीमूतवाहनादिभिश्चपुत्राणामेव
मिलित्वाविभागप्रार्थनायांभक्त्यादिनिबंधनमेवाधिकंभागंनदद्यात् विंशोद्धारादितंज्ये
ष्ठादीनागुणवत्वोद्धाराद्देवेति स्पष्टवाक्येनैवलिखितंनतुबुद्धिविवेचनकरणीय
मितिसंक्षेपः॥ बृहस्पतिः॥ समन्यूनाधिकाभागाःपित्रायेषांप्रकल्पिताः॥ तथैवतेपालनी
याविनेयास्युरन्यथा॥ एवंच॥ एतद्वचनंचपुत्रविनिर्मोकेनपित्रर्ज्जितपरंभ्रातृ
णांमितिमनुवचनंचसर्वपुत्रसहकारेणपित्रर्ज्जितधनविषयकमतोनविरोधइतिच
एडेश्वराद्रीनांमतंपुत्राणांविभागप्रार्थनस्थलेएवमनुवचनेनेयंवितुः स्वेच्छास्थलएवबृ
हस्पतिः॥ वचनमितिजीमूतवाहनादिमतं॥ पित्रैवतुविभक्तायेसमन्यूनाधिकैर्धनैः तेषां
समएवभागस्यात्सर्वस्यैवपिताप्रभुः इतिनारदवचनं॥ न्यूनाधिकविभक्तानांधर्म्यःपितृ
कृतःस्मृतइतियाज्ञवल्क्यः वचनंचबृहस्पतिसमानवचनविषयकमेवमंतव्यं॥ एवंच
एतानिवचनानियत्रपिताभक्त्यादिनिबंधनमधिकंददातितत्रान्योन्यविवादयोरितितात्प
र्यकाण्येवतत्रपिताक्रोधादेकस्मैसर्वस्वंकिंचिदूनसर्वस्वंवाददातिअपरस्मैनददाति

।किंचिदुद्धारं दद्यात् इति तत्रतु वारणं कर्त्तव्यमेव बृहस्पत्यादिवचनानि तु तदुद्धारणं निषेद्धुं न शक्नु
वंति भागोक्तवचनेपितुरः प्रभुत्वकथनादिति पितृसहकारेण पुत्रार्ज्जीनं विवेचयिष्यते॥
अथ विंशोद्धारइति श्रूयते सकीदृशइति चेत्॥ मनुः॥ ज्येष्ठस्य विंशोद्धारः सर्वद्रव्याच्च
यद्वरं। ततोर्द्धं मध्यमस्य स्यात्तुरीयस्तुयवीयसः॥ उत्तमियतेइत्युद्धारः। विंशः विंश
तिभागैकभागः सर्वद्रव्येषु मध्येय तच्छ्रेष्ठं उक्तसमुच्चयार्थकचकारात्॥ इयमेव ज्येष्ठ
स्य देयं आदे ज्येष्ठार्थं स्थापनीयमिति भावः ततोर्द्धं विंशतिभागैकभागार्द्धं चत्वारिंश
द्भागैकभागे मध्यमार्थं स्थापयेत् तुरीयं विंशतिभागैकभागतुरीयं अशीतिभागैकभागमि
तियावत्॥ यवीयसः कनिष्ठस्य स्थापयेत्॥ एवं समुद्धृतोद्धारे समानांशान्प्रकल्पयेत्॥
इति मनुना अवशिष्टं॥ धनं समभागं कृत्वा तत्रैव मिश्रयित्वा विंशयुक्तं भाग ज्येष्ठाय चत्वा
रिंशत्युक्तं भागं मध्यमाय अशीतियुक्तं कनीयसे दद्यात्॥ द्विप्रकारो विभागस्तु दाया
द्यानां प्रकीर्त्तितः॥ वयोज्येष्ठक्रमेणैकः समांशपरिकल्पना॥ इति बृहस्पत्युक्तद्विः
प्रकारविभागस्य प्रथमप्रकारोयं॥ अत्र चत्वारिंशत्भागाः समुदायधनानामेव कर्त्त
व्यं न तु विंशोद्धारे कृते ऽवशिष्टधनानामिति॥ ततोर्द्धमित्यनेन स्पष्टमेवोक्तत्वात् एवमं
शीतिभागस्यापि॥ तथाच यत्र पुत्रास्त्रयः धनं च शतं सुवर्णाः तत आदौ पंचसुवर्णा
न् ज्येष्ठार्थं स्थापयेत्॥ ततः सार्द्धसुवर्णद्वयं मध्यमार्थं॥ ततः सपादमेकं सुवर्णं कनि
ष्ठार्थं स्थापयेत् एवं गतेषु पादोननवसुवर्णेषु अवशिष्टं सपादैकनवतिं सुवर्णान्विभ
जेत् इति वस्तुतार्थः॥ अत्र समांशा न इति प्रमीतपितृकपुत्रकृतविभागःस्यत्वाभिप्रा
यएएव संहवसेयुर्वापृथग्वा धर्मकाम्यया॥ इत्यनेन प्रमीतपितृकविभागमुपक्रम्यत
दनंतरमेव ज्येष्ठस्य विंशोद्धारइत्यादिना विंशोद्धारादिकथनात् ननु तर्हि विंशोद्धारस्यपि
तृकृतविभागपरतामस्तु इति चेन्न मनोः पितृकृतविभागस्यले विंशोद्धारादेरभिप्रेतत्वा
त् अन्यथा समस्तएव विभागः स्यादित्यनेन भ्रातृणां सहावस्थाने समविभागकथनानु
पपत्तेः समविभागस्यार्थतत्र वप्राप्तत्वात् तस्मात् पितृकृतविभागेपि न्यूनाधिकविभा
गोवर्त्तते नत्व न्यूनाधिक्यं विंशोद्धारादिरूपमेव प्रागुक्त अन्यविधस्यतेनानुक्तत्वात्
तथाहि॥ विभक्ताः सहजीवन्तो विभजेरन्पुनर्यदि॥ समस्तएव विभागः स्यात् ज्येष्ठं तत्र
न विद्यते॥ इत्यनेन संसृष्टिनो भ्रात्राः पुनर्विभागकरणे ज्येष्ठत्वनिषेधउक्तः तदनंतरं
येषां ज्येष्ठ इत्यादिवचनद्वयेन यो भ्राता म्रतः तस्य भागं सोदरा दद्या गृहीयुरित्युक्तं त
दनंतरं यो ज्येष्ठ इत्यादिवचनेन निर्गुणज्येष्ठस्य ज्येष्ठत्वनिबंधनविंशाधिरूपाधिभा
गस्य निषेधउक्तः तदनंतरं सर्वएव विकर्म्मस्था इत्यनेन निंदितकर्म्मणां ज्ये रामः



क्रोडकः २७

ष्ठादीनां सर्वेषामेव भागो नर्हत्वज्येष्ठस्य गुणवत्त्वमिति द्वयमेव उक्तं तदनंतरं भ्रातॄणा
मिति च न मन्वादिवचनाद्धिधिकद्विषयकं न भवितुमर्हति ज्येष्ठस्यैव प्रक्रांतत्वा
त् किं तु कथं च नेति स्वरसात् न मूल्यंतरोक्तं भक्तत्वादि निबंधनमधिकदानमपि अभिप्रे
तं ननु तद्देवस्वोक्तं विहाय परोक्तस्याभिप्रेतत्वे प्रमाणस्य दुर्लभत्वादिति मंतव्यं॥ ननु यस्य
पंच पुत्राः तत्र ज्येष्ठकनिष्ठमध्यमेतरेषां किं शतमनुनातस्याधिकभागः स्यादनुक्तत्वादु
च्यते॥ ज्येष्ठकनिष्ठमध्यमेतरभ्रातुरेवाप्रसिद्धेः तथाहि ज्येष्ठः सर्वप्रथममुत्पन्नः कनिष्ठ
सर्वशेषे उत्पन्नः तदितरे सर्व एव मध्ये उत्पन्नाः मध्यमाः स्पष्टमेव स्वयमाह॥ ज्येष्ठस्यै
व कनिष्ठस्य संहरेतां यथोदितं॥ योन्यज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनं॥ यथोदितं
पूर्वोक्तवचनोक्तं मध्यमं चत्वारिंशत्भागरूपं तच्चमन्येकदेयमिति न एकमेव चत्वारिंश
द्भागैकभागं सर्वेभ्यो मध्यमेभ्यो दद्यात् विषमशिष्यापत्तेः॥ तस्मात् ज्येष्ठस्य विंशति भागै
कभागः एवं चत्वारिंशद्भागद्वयं देयं अन्येषां च यथोक्तमिति मनोरभिप्रायः चंडेश्वरेण विवृतः
। तच्च पितृकृत्यविभागे भ्रातृकृतविभागे च बोध्यं पूर्वोक्तयुक्तेः पुनः स एव॥ सर्वेषां धन
नामाजातानामाददीताग्र्यमग्रजः॥ यच्च सातिशयं किंचिद्दशतश्चाप्नुयाद्वरं॥ सर्वद्र
व्याच्च यद्वरमिति यत्पूर्वोक्तं तत्त्वदिहापि सर्वद्रव्येषु यदग्र्यं श्रेष्ठं तत्तस्य हीयात् पूर्ववच
ने विंशतिभागैकभाग उक्तः एतद्वचनेतु दशभागैकभागः स च दशसु द्रव्येषु मध्ये एकं
उत्कृष्टमिति विशेषः. अत्र विषये गौतमबोधायनदेवलादिवचनानि वक्ष्यंते॥ पुनः स
एव॥ उद्धारो न दशस्वस्ति संपन्नानां स्वकर्मसु॥ यत्किंचिदेव देयं स्यात् ज्यायसे मानवर्द्धनं॥
दशसु द्रव्येषु मध्ये सातिशयं एकं द्रव्यं गृह्णीयादिति यदुक्तं अनंतरं नास्ति यत्किंचि
देकमेव द्रव्यं आददीताग्र्यमग्रजइत्यनेन प्राप्तमेव देयं तच्च मानवर्द्धनं मानवर्द्धनज
नकमित्यर्थः॥ एतच्च याहृदशस्थले तदाह संपन्नानां स्वकर्मस्विति तथा च स्व जातिक
र्मसु धअध्ययनादि शास्त्रग्रहणादि वाणिज्यादि सेवादिषु सर्वे भ्रातरो यदि संपन्नास्ते
षां दशभागैकभागः॥ ज्येष्ठाय न दातव्य इत्यस्य उपलक्षणं तथा विंशतिभागैकभागोपि न
दातव्यः एवमुत्कृष्टद्रव्यं तु देयमेव पूजारूपत्वादिति॥ एवं समुद्धृतोद्धारे समानंशान्प्रकल्प
येत्॥ उद्धारेनुद्धृते त्वेषामियं स्यादंशकल्पना अत्र पूर्वार्द्धं व्याख्यातं॥ मकारांतरेण ज्येष्ठ
भागं दर्शयति उद्धारेनुद्धृते इत्यादि समग्रधनेभ्य एव विंशतिभागैकभागादिकं ज्येष्ठा
य पूर्वं आदौ स्थापयेदिति यदुक्तं तस्मिन्नकृते तमस्थापयित्वेत्यर्थः समग्रधनानामेव
इयं व[illegible]क्ष्यमाणा अंशकल्पना कार्यादित्यर्थः॥ तामेवाह॥ एकोधिकं हरेज्ज्येष्ठः पु
त्रोध्यर्द्धं ततोनुजः अंशमंशं यवीयांस इति धर्मो व्यवस्थितः॥ समग्रधनस्योद्धारं

सोऽज्येष्ठो गृह्णीयात् ततोऽनुजः द्वितीयो भ्राता अर्धेनाधिकं एकं भागं सार्द्धैकं भागं गृ
ह्णीयात् इतरे एकैकांशं गृह्णीयुरिति वचनार्थः एकमिश्रितपुत्रसंख्यां द्विगुणां कृत्वा
पुनरेकेन मिश्रयित्वा तद्बोधनांकं निवेश्य हरणं कुर्यात् लब्धो योऽङ्कः स भागः तत्र
चतुरो भागान् ज्येष्ठाय भागत्रयं द्वितीयाय द्वौ द्वौ अपरेभ्यः यथा पंचभ्रातृस्थले अष्ट
सप्ततिः सुवर्णाः धनं त्रयोदशभागेषु कृतेषु षट् षट् सुवर्णा एकैको भागो भवति तत्र च
तुर्विंशतिः सुवर्णा ज्येष्ठस्य अष्टादश सुवर्णा द्वितीयस्य द्वादश इतरेषामिति भागनिर्णयः॥
तथा च मनुना चतुर्विधो विषमभाग उक्तः एकस्थले च चतुर्विधभागकरणासंभवात् स्थ
लविशेषाभिप्रायेणेति वक्तव्यं एतच्च कुल्लूकभट्टचण्डेश्वरादीनां मतं॥ पितामहचरणा अ
पि तथैव समादधिरे॥ अत्र पितामहचरणाः॥ पितृकृतविभागस्थले विंशोद्धाररूपो ज्ये
ष्ठस्याधिको भागो न देयः तस्य भ्रातृकृतविभागप्रकरणीयत्वात् यस्य यस्य वचनस्य
पितृकृतविभागबोधकत्वं तत्तद्वचनबोधितज्येष्ठांशादिकमेव पितृकृतस्थले ऊहनी
यं तानि यथा॥ समः सर्वेषामविशेषात् वरं वा रूपमुद्धरेत् ज्येष्ठ इति॥ दशानां वैकमुद्ध
रेत् ज्येष्ठः सममितरे विभजेरन् इति च श्रुतिघटितबौधायनवचनं ज्येष्ठस्य श्रेष्ठकद्र
व्यदानं गवादीनां सजातीनां दशसु दशसु मध्ये एकैकस्य दानं चाह पुत्राणां मध्यमो दा
यः समानानामपीष्यते ज्येष्ठस्य दशमं भागं न्याय्यवित्तस्य दापयेत्॥ इति देवलवचनं
॥ ज्येष्ठस्य दशमं भागं अन्येषां मध्यमं दायं मनूक्तं चत्वारिंशभागैकभागरूपं आह
एकधनेन ज्येष्ठं तोषयित्वा जीवन् पुत्रेभ्यो विभजेत् समं क्लीबमुन्मत्तं पतितं निहाप्येति
आपस्तम्बवचनं॥ ज्येष्ठस्य एकधनमात्रं देयं अन्येषां तु समांशानित्याह तत्र परस्परवि
रोधात् विषयभेदेन व्यवस्था ऊहनीया यत्र ज्येष्ठस्यैव बहुगुणत्वं इतरेषां निर्गुणत्वं
तत्र बौधायनोक्तः द्वितीयः कल्पः दशभागैकभागो देय इति यत्र तु ज्येष्ठस्याल्पगुणत्वं
इतरेषां निर्गुणत्वं तत्र देवलोक्तं ज्येष्ठस्य दशभागैकभागोऽधिको देयः इतरेषां च चत्वा
रिंशद्भागैकभागोऽधिको देयः यत्र च सर्वेषां निर्गुणत्वं तत्र ज्येष्ठस्य एकद्रव्यं आपस्तं
बोक्तमधिकं देयात् तच्च द्रव्यं श्रेष्ठमेव बौधायनप्रथमकल्पैकवाक्यत्वादिति माहुः त
त्र देवलवचनं ज्येष्ठस्य बहुगुणत्वे इतरेषामल्पगुणत्वेऽपि संभवतीति अपि द्रष्टव्यं नैते
व प्रकरणं तस्य तु यत्केनचिल्लिख[illegible]नात्॥ एवमेव चण्डेश्वरादिभि मायः। तेन ए
तद्वचनानामिव पितृकृतविभागप्रकरणे लिखनात् मन्वादिवचनानां तु प्रमीतपितृक
भ्रातृविभागप्रकरणे लिखनादवगम्यते किं तु वृषभो ज्येष्ठाय गृह्णीयसेऽन्ययेपि तु रव
स्यामान् इति शंखलिखितौ वचनं तेनाधिकं लिखितं इदं च ज्येष्ठकानिष्ठयोर्गुणसत्वेपि रामः

२४

श्लोकः२७

तुरिच्छां विनापि अन्यथानियमार्थक्यापत्तेरित्युक्तं हलायुधस्याप्यत्रैव स्वरसः नन्वेत
द्वचनं मृतपितृकभ्रातृविभागपरमेवास्तु अन्यत्र पितुरवस्थानादित्यनेन पितुस्मर
णं वो धनात् इति चेन्न यद्येकपुत्रः स्यात् द्वौ भागावात्मनः कुर्यात् द्विपदचतुष्पदेषु रू
पमधिकं दद्यादिति स्पष्टीभूतपितृकृतविभागबोधकवचनप्रक्रांतत्वात् वचनार्थश्च द्विप
दां चतुष्पदेषु एकं रूपं वस्तुस्वरूपमधिकं भागादधिकं दासं दासीगवादिकं वा यत्किं
चित्वस्तु गृहीत्वा द्वौ वंशौ आत्मनः कुर्यात् एवं चाद्वितीयवचने न्यत्र पितुरवस्थानादि
त्यस्य पितृवासगृहवर्ज्जमित्यर्थः अवस्थानशब्दोधिकरणव्युत्पन्नः॥ अनेदमवधेयं॥
यदत्राधिकदानमुक्तं तत्पितुर्म्मीनवर्द्धनं ज्येष्ठांशवत् एतच्च पितुर्गुणवत्वाभावे गुणानु
सारेण ततोपि अधिकं देयं तत्र किमधिकमित्याकांक्षायां ज्येष्ठांशोवचनोक्तानामेवोप
स्थितिः पितृज्येष्ठोभ्रात्रोः समनैरत्र प्रकरणे ज्ञेया इति तत्तु पितामहचरणैर्न लिखितं तेषा
मयमभिप्रायः भ्रातृकृतविभागविषयकमेव वचनद्वयं तथाहि एकैमुख्यान्यकैवत्वाद्
त्यभिधानात् एकपुत्रमुख्यपुत्रः ज्येष्ठपुत्र इति यावत् स आत्मनो द्वावंशौ कुर्यात्। जन्म
विद्यागुणज्येष्ठोद्ध्यंशंदायादवाप्नुयात्॥ इति बृहस्पत्युक्तत्वात् अत्र विशेषः अन्यच्च व
स्तु भूतं किंचिद्द्रव्यं गृह्णीयात्॥ इति प्रथमवचनार्थः॥ पारिजातेपि॥ एकपुत्रज्येष्ठपुत्र इ
ति व्याख्यानेन द्वितीयवचनं तस्य स्पष्टमेव॥ माध्यकारस्तु यद्येकः स्यादिति पठितवान्
तदर्थश्च एकः पत्निरहितः स्यात्तदा द्वावंशौ गृह्णीयात् पत्नीसत्त्वे तु तां परेणांशेन तोष
येत् द्विपदचतुष्पदमध्ये एकं द्रव्यं अंशद्वयाधिकं गृह्णीयादित्याह सर्वे वा स्युः समांशि
नः इति याज्ञवल्क्यवचनेनाविरोधः तद्वचनस्य सर्वेषां निर्गुणत्वविषयकत्वमेव हला
युधभाष्यकारचण्डेश्वरैरुपपादनीयदानी॥ ज्येष्ठस्यातिनिर्गुणत्वेनपि पितामहचरणैः
समाधेयः॥ विवादचिंतामणिः त्वायतत्वज्ञीमूतवाहनादिग्रंथेसुस्पष्टं न दृश्यते॥ किं
तु यत्र ज्येष्ठो द्वितीयश्च गुणवान् तत्र का व्यवस्था स्यादित्यनध्यवसायश्चण्डेश्वरादिम
तेपि पितामहमते च पर्यनुयोगः एवं पुत्राणां मध्यमो भाग इति देवलवचनं भ्रातृभागस्थ
लाभिप्रायकमप्युक्तं तुल्ययुक्त्या पितामहचरणैः तथा सति भ्रातृभागस्थलीयवचनानि
किं पितृकृतविभागस्थलविषयकान्यपि न भवंति आकांक्षायाः सत्त्वादिति विचारणीयं
॥ भ्रातृभागस्थले ज्येष्ठाधिकांशबोधानि वचनानि प्रसंगादुच्यंते ज्येष्ठस्य विंशोद्धार इ
त्यादिवचनानि तु उक्तानि व्याख्यातानि च॥ तत्र ज्येष्ठस्य विंशोद्धार इत्यादिवचनं पराशर
वः एकमातृका गुणवंतः पुत्राः किंतु यथाक्रमं गुणह्रासः ततो ज्येष्ठस्य मध्यगाद्धनात् विंशो
भागोद्धारः कर्त्तव्यः सर्वद्रव्याच्च यद्वरं धनं तद्वानयेत नो ४० चत्वारिंशत्तमो भागः म

श्लोकः २+

ध्यमं च धनेष्वेवं कनीयसः तुरीयमशीतितमो भागो हीनं च द्रव्यं दातव्यमिति चण्डेश्वरः॥
अत्र मध्यकनीयसोर्मध्यमहीनद्रव्यदानं वचनानुपात्तमपि ज्येष्ठांशतुल्यरीत्यालिखि
तमित्यवगम्यते तन्नादरणीयं चण्डेश्वरलिखितत्वात् यथाक्रमं गुणह्रास इति द्रा
ष्टव्यमनेनैवेदं संगच्छते अन्यथा चतुर्थपंचमादेर्भागाकथनेन सर्वमध्यमानामेकवि
धाधिकांशबोधकपूर्वोक्तयुक्तनवकाशेन च वचनसंगमनासंभवात् केचित् आस्थि
यंति॥ वस्तुतस्तु तुरीयस्तु यवीयस इत्यत्र यवीयःशब्देन तृतीय एवोच्यते चतुर्थपं
चमादीनां गुणस्वल्पेपि ता अधिकांशो नस्त्येव मुनिना अनुपदेशादिति युक्तमुत्पश्या
मः तन्न किंतु वक्ष्यमाणवचनचण्डेश्वरव्याख्यानविरुद्धं॥ अत्र केचित् पूर्वपक्षमव
तारयंति यथाक्रमं गुणह्रास इत्यर्थे समानगुणयोगिनामपि भ्रातॄणां ज्येष्ठायाधि
कं दातव्यं तस्य मुख्यत्वात् तत्र च किं देयमित्यनध्यवसायेऽधिकांशस्य अन्यापेक्षया
द्विगुणमिति मनुनोक्तं कनिष्ठस्य च सर्वापेक्षया ह्रासं मनुनोक्त इति तदसत् उद्धारो न दस्व
स्तीति वचनेन मनुनैव समगुणानामुद्धारनिषेधात् कुल्लूकभट्टेनापि तथैव व्याख्यातत्वा
च्च तस्मादीदृगनादरणीयं जन्मज्येष्ठतः किंचिद्द्रव्यदानं सिद्धं गुणक्रमेण ज्येष्ठानुगुण
[illegible] विवेचनयैव देयं न द्रव्यं उत्कृष्टमेव वरं वा रूपमुद्धरेत् ज्येष्ठ इति बोधायने
[illegible] कवाक्यत्वात् तथा च मध्यमाय मध्यमद्रव्यं कनीयसे हीनद्रव्यं किमर्थं कुल्लू
कभट्टादिलिखितं उक्तं च चण्डेश्वरेणापि इति न निश्चिनुमः। न च विभज्यमानगवां समूहे वृ
षभमेकधनं वरिष्ठं वा ज्येष्ठाय दद्यात् देवताः गृहं च इतरे निष्क्रम्य कुर्युः॥ एकस्मिन्नेव
दक्षिणं ज्येष्ठाय आनुपूर्व्यमितरेषामिति हारीतवचनेन आनुपूर्व्यमित्यस्य क्रमप्राप्त
मित्यर्थकत्वात् ज्येष्ठस्य वरिष्ठं मध्यमस्य मध्यमं कनिष्ठस्य हीनमिति वाच्यं तस्य वासगृहे
विवेचनापरत्वात् तथाहि वचनार्थः वृषभमेकधनं उत्कृष्टधनं ज्येष्ठाय दद्यात् इदम
धिकं भागात् कृत्स्नांतरमाह वरिष्ठमिति शेषः देवताः विष्ण्वादिप्रतिमाः गृहं पितृकृ
तं प्राचीनमिति यावत् इदं च एकमात्रगृहसत्त्वेन तु अन्ये किं गृहमंतरेणैव तिष्ठे
युरित्यत आह निष्क्रम्येति भद्रासनवाद्यावहिर्भूय गृहं कुर्युः यदा तु निष्क्रम्य गृहां
तरकरणासंभवः तदा गृहदक्षिणमिति इत्यवतारयति चण्डेश्वरः॥ एकस्मिन्नेव भद्रा
सने पितृकृतगृहे वा इत्यत्र रत्नाकरः॥ दक्षिणं श्रेष्ठं ज्येष्ठाय भवेदिति शेषः आनुपू
र्व्यमनुपूर्वतानेन मध्यमाय मध्यमं कनिष्ठाय ततोपि हीनमित्यर्थः॥ इति गृहमिति शेषः
अत्र केचित् दक्षिणं दक्षिणभागं तस्यैव श्रेष्ठत्वात् आनुपूर्वं पूर्वोत्तरादिक्रम इति ज
ल्पंति ज्येष्ठश्चैवेति मनुवचनं व्याचष्टे रत्नाकरः॥ यदा तु ज्येष्ठकनिष्ठा गुणवंतो मध्यमा राम:



श्लोकः २३

वंहवो निगुणास्तत्र ज्येष्ठकनिष्ठयोर्विंशभागाशीतिभागौ चत्वारिंशभागं एकं विभज्य
सर्वे मध्यमा गृह्णीयुः मध्यमाश्चेद्गुणवन्तः तदा चत्वारिंशभागान्प्रत्येकं गृह्णीयुरिति ज्ये
ष्ठमात्रस्य गुणवत्वे तु सर्वेषामित्यादिमनुवचनं॥ ज्येष्ठश्चेदधिकगुणवान् तत्राह गौतमः
॥ विंशतिभागो ज्येष्ठस्य मि— नमुभयतो दयुक्तो रथः गोवृषः॥ काणखोरकुटवण्डा म
ध्यमस्य अनेकाश्चेदविधान्यायसी गृहमनोयुक्तं चतुष्पदां चैकैकं यवीयसः समममेवे
तरत्सर्वं इति विंशतिभागः विंशोद्धारः प्रागुक्तः गोमिथुनं उभयतो दन्ता अश्वा वा सभार
यः गोवृषः सेकसमर्थो गौः अयमुद्धारः सति संभवे ज्येष्ठस्य खोरो वृद्धः कुटः भ्रंगः विकलः
वण्डः गोवत्से रहित्तनोगुलकः अयं मध्यमस्योद्धारः अनेकाश्चेत्तत्र घोतेभवं तीत्यर्थः अ
विर्मेषी किंचिधान्यं अल्पं लोहं गृहमेकं अनः शकटं कलीवर्दं चतुष्पदां गवादीनां चैक
कैकं कनिष्ठस्योद्धारः अवशिष्टं सममेव विभजेदिति चण्डेश्वरानुसारिण्याख्या अत्र या
दि तु काणादयो गावो न सन्ति तदा किं कर्तव्यमुच्यते तत्प्रतिनिधीभूतं किंचिद्द्रव्यं दातव्यं न च
प्रति पत्तियागवद्द्रव्याभावे अदानमेवेति वाच्यं यत्र दृष्टं द्रव्येण किं कर्तव्यमित्याकारिकासि
द्धे द्रव्ये क्रियाकाङ्क्षा तत्रैव द्रव्याभावे क्रियानिवृत्तिः यत्र दाने सिद्धं कस्य दानं कर्तव्यमित्याकां
क्षया अमुकं दद्यादिति विधिस्तत्र तदभावे प्रतिनिधिदानं युक्तमिति केचित्॥ आपस्तम्बः॥
देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य रथः पितुः परिभाण्डं च॥ कृष्णं भूमिभवं ति
लमाषादि परिभाण्डं भोजनपात्रादि॥ वौधायनः॥ असति पितरि चतुर्णां गोऽश्वाजावयो ज्ये
ष्ठांशो यथासंख्येन॥ यथासंख्येनेति ब्राह्मणस्य गौः क्षत्रियस्याश्वः वैश्यस्य जः शूद्रस्या
विः॥ अत्र शूद्रः शूद्रापुत्रः इति श्रीकृष्ण तर्कालंकारमतेन विस्तीर्णेन स्मार्त्तादिमतेन तु
ब्राह्मणादेः शूद्रायां जातः एतत्परतो विवेचयिष्यते च शिष्ठः॥ अथ भ्रातृणां भागभा
गाद्ध्यंशं हरेत् ज्येष्ठः गवाश्वस्य चानुदशमं अजावयो गृहमेकं कनिष्ठस्य कार्ष्णायसं गृ
होपकरणानि मध्यमस्येति गवाश्वस्य चेति चकारात् पूर्वोक्तसमुच्चयेन ज्येष्ठस्यैव द्वयं
इति कनिष्ठस्य अजाः कतिचित् अवयवसंभवानुसारेण मध्यमस्य लोह निर्म्मित ख
ड्गादूखलादि इति तदेतेषां वचनानां परस्परविरोधात् नानाविरुद्धकारेण विवेचन
येव विषयविभागः क्वचिन्न इति तदेव लिख्यते॥ तत्र च ज्येष्ठस्य विंशोद्धारस्त्वादि वच
नं यदा बहवः पुत्राः क्रमसो द्रासितगुणवन्तस्तद्विषयकमेवेति॥ पितामहचरणास्त्वेण्डे
श्वरोप्येवं॥ सर्वानुजस्यैव कनिष्ठत्वं मध्यमानां सर्वेषामेव चत्वारिंशभागित्वमिति रत्नाक
रः॥ यवीयः शब्देन तृतीय उच्यते चतुर्थादीनां तदर्धादिक्रमेणैव उद्धारो बोध्य इति केचि
त्तएव पितामहानां चण्डेश्वरस्य च सम्मतं जीमूतवाहननिबन्धादौ विशेषो नास्ति॥ १॥ ज्येष्ठ

श्चैव कनिष्ठश्चेत्यादिवचनं यत्र ज्येष्ठकनिष्ठौ गुणवंतौ मध्यमा निर्गुणास्तत्र ज्येष्ठकनिष्ठयो
विंशांशस्तत्तुरीयोद्धारभागित्वं मध्यमानां सर्वेषामेवैकचत्वारिंशोद्धारभागित्वमिति॥ मध्य
मानां गुणवत्त्वे च प्रत्येकं चत्वारिंशोद्धारभागित्वमिति च चण्डेश्वरमतं॥ यत्र सर्वेषां समान
त्वं तस्य ज्येष्ठकनिष्ठा विंशोद्धारं तत्तुरीयं च भजेतां मध्यमाश्च प्रत्येकं चत्वारिंशोद्धारमिति पि
तामहचरणाः॥ अत्र वयं मध्यमानां ज्येष्ठापेक्षया न्यूनगुणत्वे कनिष्ठापेक्षया न्यूनगुणत्वे
ऽधिकगुणत्वे वा चण्डेश्वरीत्या कल्पत्रयेन व्यवस्था बोध्या इति॥ २ सर्वेषां धनजातानां
मित्यादिवचनात् यत्र ज्येष्ठस्यातिशयगुणवत्ता अन्येषां चानिर्गुणत्वं तत्र व्यवस्था इति
रत्नाकरः॥ पितामहचरणा अप्येवं सर्वेषां धनजातानामित्यस्य सर्वधनेषु प्रत्येकं श्रेष्ठ
द्रव्यं ग्राह्यमित्यर्थः कृतस्तेरिति॥३॥ उद्धारो न दशस्वस्तीत्यादिवचनात् यत्र सर्वेषां स
मानगुणत्वं तत्र व्यवस्था इति कुल्लूकभट्टस्वरसोऽवगम्यते॥ विभज्यमाने गवां सह
हेत्यादिहारीतवचनमप्येतद्विषयमिति मन्वयं जीमूतवाहनस्तु दशसु गवादिषु उद्धा
रो न कर्तव्य इत्याह॥४॥ एकाधिकं हरेत् ज्येष्ठ इत्यादिवचनात् ज्येष्ठतदव्यवहितानु
जावुत्कगुणवंतौ अन्ये निर्गुणास्तत्र व्यवस्था इति पितामहचरणाः; केचित्तु यत्र ज्येष्ठोति
शयगुणवान् तत्कनिष्ठश्च न्यूनगुणवान् तत्र व्यवस्थेत्याहुः॥५ एतानि म
नुवचनानि पितृकृतविभागविषयतानि अपि भवंतीति केचित्॥ विंशतिभागो ज्येष्ठस्य इ
त्यादिगौतमवचनात् यत्र ज्येष्ठोऽधिकगुणः परे तु मध्यमगुणास्तत्र व्यवस्था इति चण्डेश्व
रः॥ अन्ये केचित् यत्र ज्येष्ठस्य सजातीयविशिष्टविद्यावत्त्वं कर्मवत्त्वं च तत्र बोध्यमित्या
हुः॥६॥ द्रव्यविशेषस्तु वलीमित्यादि आपस्तंबस्तत्र ज्येष्ठस्य किंचिद्गुणवत्त्वे इति ज्ञेयं
॥ असति पितरि चतुर्णामिति बौधायनवचनं ज्येष्ठस्य किंचिद्गुणवत्त्वे इति॥ रत्नाकरः॥
७॥ केचित्तु सर्वेषां समगुणत्वे उद्धारो न दशस्वस्तीति मनुवचनसमानविषयकमपि भव
तीत्याहुः॥ ८॥ अथ भ्रातॄणां दायभाग इत्यादि वाशिष्ठस्त्वानु यत्र ज्येष्ठस्य गुणद्व
यं इतरेषामेकैकः गुणः तत्र व्यवस्था इति पितामहचरणाः॥ एतत् ज्येष्ठस्य साति
शयगुणवत्त्वे इतरयोश्च गुणवत्त्वे इति चण्डेश्वरः। किं त्वमेकमात्रकविभागोप
क्रमे एतद्वचनं लिखितं तेन॥ अत्र नव्याः॥ ज्येष्ठस्य विद्याकर्मप्रतिपालनादिस
मुदायसत्त्वे मध्यमादीनां कियद्गुणसत्त्वे चैतद्वचनात् व्यवस्था इत्याहुः॥९॥ पुत्रा
णां मध्यमो दायः समानानामपीष्यते॥ ज्येष्ठस्य दशमं भागं न्यायवृत्तस्य दापयेत्
॥ इति देवलवचनं तु॥ ज्येष्ठे वेदसमन्विते अन्येषु निर्गुणेष्वेव व्यवस्था मध्यमो दायः
विंशोद्धारः इति हलायुधपारिजातौ॥ यदा ज्येष्ठोऽग्निवेदसंपन्नोऽन्ये गुणवंतः



श्लोकः २०

तत्रव्यवस्था मध्यमोद्धारः विंशोद्धार इत्यन्ये इति च एडेश्वरः ॥ एवमेव पितामहा
: किंतु मध्यमोद्धारश्च चत्वारिंशो भागः इति मतं ॥१०॥ जन्मविद्यागुणज्येष्ठो द्व्यंशं
दायादवाप्नुयात् समांशभागिनस्त्वन्ये तेषां पितृसमस्तु स इति बृहस्पतिवचनात् ।
द्व्यंशी वा पूर्वजः स्यादेकैकमितरेषां मिति गौतमस्मृतौ च ज्येष्ठस्यैव गुणाधिक्ये यवत्वे
इतरेषां निर्गुणत्वे च वस्यादिति च एडेश्वरः ॥ पितामहचरणास्तु इतरेषामल्पगुणत्वे
इति व्याख्यातवंतः तेषामयमाशयः अन्यस्याल्पविद्यां विना ज्येष्ठस्य विद्या ज्येष्ठं न
भवतीति ॥ अत्र पितृवत्पालनाधिकमपि वक्तव्यं पितृवद्द्व्यंशहारित्वात् तेषां पितृ
समस्तु स इति विशेषणवलाच्च ॥ तदिदमत्र विभावनीयं पितुराद्यपुत्रस्य एकं श्रेष्ठं
द्रव्यं देयं सजातिसम्बन्धिविद्यासत्वे तत्तारतम्यन उद्धारः ॥ पितृवदित्ययेरोशवा
द्यधिपालनसत्वे अंशद्वैलक्षण्यं कर्म्मयोगसत्वे द्रव्यांतरदानमिआनुभविकं यौक्ति
कं वा अनुपदेशे ज्येष्ठकनिष्ठातिरिक्तानां मध्यमत्वमेव इति केचिदाहुः ॥ द्विः प्रकारो वि
भागस्तु दायादानां प्रकीर्त्तितः ॥ वयोज्येष्ठक्रमेणैकः समापरांशकल्पना इति बृहस्पतिः
वचनात् समांशित्वं ज्येष्ठस्य निर्गुणत्वे ऽन्येषां परस्परसमगुणत्वे बोध्यमिति पि
तामहचरणाः ॥ एवं निर्गुणानामपि नानाचेष्टयाधनोपार्ज्जिकत्वे पि बोध्यं ॥ यो
ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः ॥ सो ज्येष्ठः स्यादभागश्च नियंतव्य
श्च राजभिः ॥ इति मनुवचने ॥ कनीयो भ्रातॄणां वंचकस्य ज्येष्ठस्य विद्यावत्वेपि विंशो
द्धारनिषेधकं अभागश्च इत्यस्य ज्येष्ठताप्रयुक्तभागशून्य इति कुल्लूकभट्टव्याख्या
नात् ॥११॥ अत्र नवीना ॥ निर्दोषत्वे जन्मक्रमेणैव कनिष्ठानां विंशोद्धारेऽर्द्धस्यार्द्धस्य
हानिः विंशोद्धार एवं सवर्णधर्म्मोत्पन्नपुत्रस्य औत्सर्गिकः विद्यादिगुणयोगे हि
गुणपदशांशादि ॥ एवं मध्यमादीनामपि विद्यादिगुणयोगे स्वस्वोद्धारद्वैगुण्यं पितृव
त्पालनगुणाभ्यास्मन्नाकर्त्तत्वे तु पितृवत् ज्येष्ठस्यैकांशोऽधिकः मध्यमादी
नां तथात्वे तु अर्द्धांशपादादिरिति मनुवचनेनतोउजइति प्रदर्शनमात्रं ज्येष्ठादेर्गोमि
थुनादिदानं तु गुणकर्म्मवैलक्षण्यापेक्षया स्वस्वज्येष्ठापेक्षया अधिकगुणवत्वे च उ
द्धारो न दशस्व स्तीत्यादि मनुवचनोक्तं किंचिद्द्रव्यं ज्येष्ठाय दद्यात् तस्मात् वंचनादि
दोषवत्वे समानमेवांशदद्यात् तस्य दोषगुणोभयवत्वेपि न देयं राजदंडव
त् ॥ अयमप्यपरो दंड स्तस्य इदानीं यत् ज्येष्ठादेर्विंशद्धारादिर्न दृश्यते नेनतत्रा
विगीतशिष्टाचार एवमूलं कनिष्ठादेः शाच्यं वा नतु विंशोद्धारार्ह ज्येष्ठाभावः ॥
विद्यावत्सु कुशलादि ज्येष्ठादिदानीमपि सत्वादित्यादिः ॥ ननु अयं विंशोद्धा

णे वैमात्रेयसाधारण्यान्नहणांसहोदरमात्राणांवाइत्यत्रापिनाम हचरणाः॥ जन्म
विद्यागुणज्येष्ठोद्व्यंशंदायाद्वाप्नुयात्इतिवृहस्पत्युक्तंद्व्यंशित्वंसोदराणामेव
एतद्वचनेसामान्यतउक्ता॥ समवर्णासुयेजाताःसर्वेपुत्राद्विजन्मनां॥ उद्धारंज्यायसेद
त्त्वाभजेरन्नितरेसममिति॥ उद्धारदानवोधकवचनेसमवर्णास्विति विशेषतो वहुव
चननिर्देशान्न तेन उद्धारमात्रविधानाद्वहरणानास्त्वेकमुद्धरेत ज्येष्ट इत्यादि वोधाय
नवचनं सर्वेषांधनजातानामित्यादिमनुवचनं ज्येष्ठस्यविंशउद्धार इतिमनुवचनं स
मविभागवोधकवचनंभिन्नमातृकभ्रातृणांविभागमपिविषयीकरोतीत्याहुः॥ तेषाम
यमाशयः॥उद्धारंज्यायसेदत्त्वाइतिवृहस्पतिवचनस्वरसात्सवर्णापुत्राःसमांश
नादद्युर्ज्येष्ठायश्रेष्ठमुद्धरेयुरितिविष्णुसूत्रस्वरसाच्चज्येष्ठायउद्धारोदेयः ननुमध्य
मादिपीतिसचत्रिविधएवतेनोक्तः सर्वेषांधनजातानामित्यादिमनुवचनोक्तउत्कृ
ष्टः वौधायनोक्तमध्यमः ज्येष्ठस्यविंशोद्धार इतिमनुवचनोक्तमध्यमः अत्रत्रिविधो
द्धारकथनेनैवत्रिविधाकांक्षानिवृत्तेरन्यविधोद्धारवोधकवचनादरो नकृतः अन्येषा
मुद्धारोनास्तीतितेषांगुणविवेचनेनकर्त्तव्यं॥ नव्यास्तुनाहश्यगुणयोगेनतत्तद्व
नादरःकर्तुंयुज्यतेइत्याहुः॥ जीमूतवाहनोपिद्व्यंशंदायादवाप्नुयादितिवचनेसो
दरमात्रविषयकमाह॥ चण्डेश्वरस्तु॥ यथानेकमातृकविभागइत्युपक्रम्य ॥एका
धिकंहरेतज्येष्ठःपुत्रोऽध्यर्द्धंततोऽनुजइतिमनुवचनेद्व्यंशीवायूर्वजःस्यादेकै
कमितिगोतमसूत्रंचालिखितवान् विंशोद्धारवचनस्यचविषयोपपत्तिंकृत
तवान्मनुश्चविंशोद्धारादिकल्पचतुष्टयंचकमुक्त्वाभिन्नमातृकानांविभागसामान्यं
स्पष्टमनभिधायैवकनिष्ठमातृजातज्येष्ठस्यविभागमुक्तवान्तथाचविभिन्नमा
तृकएवमातृकयोर्द्व्यंशग्रहणादौविशेषोनचण्डेश्वरस्याभिमत इतिभावः॥ वा
चस्पतिमिश्रोप्येवंउद्धारंज्यायसेदत्त्वेतिवचनंतुविभिन्नवर्णापुत्राणांविषमविभा
गकल्पनानेतरंसवर्णायांतान्निवृत्त्यनुवादमात्रंनहि॥ विंशांशसमांशयोस्तारतम्य
मस्तिद्वयोरेवगुणाकृतत्वात् तथाचउद्धारशब्देनविंशांशवत्समांशोपिग्राह्यः उ
हि उद्धारशब्दमात्रेनैवफलकल्पनंयोग्यंअन्यथाविंशांशयोग्यज्येष्ठवैमात्रेयापि विंशां
शदानंसतिविषमशिष्टंस्यादितितयोराशयः॥ मनुः॥पुत्रःकनिष्ठोज्येष्ठायां[illegible]
[illegible]कनिष्ठायांचपूर्वजःकथंतत्रविभागःस्यादितिचेत्संशयोभवेत्॥एकंवृषभ
मुद्धारंसंहरेतसपूर्वजः॥ ततोऽपरेज्येष्ठावृषाः तदूनानां स्वमातृतः॥पूर्वस[illegible]
जातीयप्रभवनानापुत्रएवायंसंशयःनानावर्णानांदायविभागस्याग्नेवक्ष्यमाणत्वा रम:
१७

।इति रत्नाकरः ॥ एकं श्रेष्ठवृषभं सं ह[?]रेत स पूर्वजः इति पूर्वोढायां जातः फलतः
कनीयानपि इति कुल्लूकभट्टः ॥ प्रकारान्तरेणाप्येवं ॥ अयं ज्येष्ठजातः कनिष्ठस्य उद्धा
रः तन्मातु धर्म्मपत्नीत्वेन तस्याधर्म्मपत्नीत्वं च ॥ प्रथमा धर्म्मपत्नी तु द्वितीया रति
वाद्वैनीति रक्षवचनात् यदि तु प्रथमा पत्नी वंध्या द्वितीयायाः पत्न्याः पुत्राः कनिष्ठतृ
तीयायाः पुत्रो ज्येष्ठः तत्र द्वितीयापुत्राय वृषभो दातव्य इति लभ्यते। पूर्वोचेतिसामा
न्य[?]णाद्वस्वरसात् तस्य दानं तु वाचनिकमेव तत्र न्यायस्यानवकाशात् परन्तु भ्रातृणां
पूर्वोत्पन्नानां परस्परोत्पन्नस्य मान्यत्ववत् एवं पूर्वविवाहितानां परस्परविवाहि
तमान्यत्वमस्त्येव इति न्यायस्तु वर्त्तते। ज्येष्ठायां पूर्वविवाहितायां कनिष्ठायां परविवा
हितायामित्यर्थः ननु वयःक्रमेण भार्य्याणां ज्येष्ठत्वे आदरणीयं प्रथमोढापूर्वढो
इति रत्नाकारादि लिखन स्वरसात्॥ ततः ज्येष्ठा वृषा इन्ये अश्रेष्ठा वृषते तदूनानां
कैकशो भवेति तदूनाश्च ज्येष्ठापुत्रादूनाः कनिष्ठाः पुत्रत्वादिति भावः ॥ पुत्र ज्येष्ठाये
क्षयामातृज्येष्ठमेव वक्तव्यरिति भावः ॥ वहूनां कनिष्ठापुत्राणामिति पर्य्यवसितार्थ
: स्वमातृतु इति स्वमातृक्रमेण इत्यर्थः ॥ तथा च ज्येष्ठापुत्रो वृषभं श्रेष्ठं गृह्णीयात्म
ध्यमापुत्रोपि ततः। किंचित्न्यूनं वृषभं तृतीयापुत्रस्ततोपि किंचिन्न्यूनं इत्यादिक्रमेण
बोध्यं एवं मातृक्रमेण ज्येष्ठमेवादरणीयमिति भावः ॥ यदि तु ज्येष्ठापुत्र एव भ्रातृभ्यो
पि ज्येष्ठः तदा तु विशेषमाह ॥ स एव ॥ जातो ज्येष्ठस्तु ज्ये[?]ष्ठायां हरेद्वृषभषोडशाः ॥
ततः स्वमातृतः शेषा भजेरन्निति धारणा ॥ वृषभः षोडशो यासां गवां ताः तथाचमेच
दृशगाः एकं च वृषभमित्यर्थः ततः शेषाः समातृक्रमेण तदन्येषां पुत्राणां वयःक्रमे
णज्येष्ठत्वकनिष्ठत्वे उपहाय द्वितीयातृतीयाचतुर्थीपुत्रत्वादि रूप ज्येष्ठत्वकनिष्ठत्वा
दिक्रमेण उद्धारान् भजेरन् गृह्णीयुरित्यर्थः ॥ एतच्चापरमतमुक्तं मनुना मनुस्तु स्वम
तं पुत्रस्य जन्मक्रमेणैव ज्येष्ठत्वे प्रथमं जातस्य पुन्नामनरकत्राणकर्तृत्वादि रूपपि
त्र्यपकारकर्तृत्वात् मध्यमादेरपि तृतीयाद्यपेक्षया प्रथमं पुत्रादि क्रियाधिकारित्वा
त्तेषां मान्यत्वे शास्त्रबोधितत्वाच्च। परं तु नानावर्णविवाहे ब्राह्मणस्य आदौ क्षत्रिया
पुत्र जातः ततो ब्राह्मणीपुत्रस्तत्र ब्राह्मणीपुत्रस्यैव ज्येष्ठत्वं इति सूचयन्नाह ॥ सदृश
स्त्री[?]षु जातानां पुत्राणामविशेषतः ॥ नमातृतो ज्येष्ठाम स्ति जन्मतो ज्येष्ठमुच्यते ॥ सवर्णा
सु भार्य्यासु जातानां पुत्राणां अविशेषत वर्णगत विशेषाभावात् मातृतो मातृ[?]त
क्रमेण उत्कृष्टत्या ज्यैष्ठं नास्ति ॥ यत्र तु भार्य्याणां नानाजातीयत्वं तत्र तत्पुत्राणा
मपि मातृजातीयत्वात् जन्मक्रमेण ज्यैष्ठत्वीकारे ब्राह्मणाद्यपेक्षया क्षत्रियादि ज्ये

ष्ठत्वे आचारविरोधः स्यादिति तत्र मातृक्रमेण ज्यैष्ठमादरणीयं अत्र तु भार्याणामेकजा
तीयत्वेन एकजातीयपुत्राणां जन्मक्रमेणैव ज्यैष्ठमादरणीयं अत्र तु भार्याणामेक
ज्यातीयपुत्राणां जन्मक्रमेणैव ज्यैष्ठमादरणीयमिति प्रकाशकारमतं॥ कुल्लूकभ
ट्टस्तु॥ मतद्वयमेवमनीरभिमतं तथा च मातृज्यैष्ठ्ययोः परस्परविरोधे विकल्प एवास्थे
यः यथा अतिरात्राख्ये यागे षोडशिग्रहणं कुर्यादिति वेदार्थः इति अतिरात्राख्ये यागे
षोडशिग्रहणं कुर्यादित्यपि वेदार्थः तयोः परस्परं विरोधे विकल्प एवास्थीयते तथा
त्रापि इह तु व्यवस्थित एव विकल्पो ग्राह्यः यथा यत्र पूर्वजातस्य गुणवत्त्वं कनीयसी
पुत्रस्य ज्येष्ठस्यापि निर्गुणत्वं तत्र पूर्वजात एव श्रेष्ठं वृषभं गृह्णीयात् यत्र ज्येष्ठस्य क
नीयसीपुत्रस्य गुणवत्त्वं तत्रासावेव श्रेष्ठं वृषभमुद्धरेत् तथा च गुणाढ्यस्यैव विकल्पो
बोध्यः गुणस्य ज्यैष्ठ्यांशप्राप्तिनियामकता बृहस्पत्युक्ता यथा॥ जन्मविद्यागुणज्येष्ठो द्व्यं
शं दायादवाप्नुयात्॥ इति जन्मज्येष्ठस्य विद्यादिवत्कर्षेण उद्धारोत्कर्ष उक्तः अयं च निर्गुण
स्य एकं वृषभमिति मं दुर्गुणस्य वृषभषोडशगा इति मातृज्यैष्ठ्याश्रय एव उद्धारो बोध्य व्याइ
साह एवं जन्मतो वैमात्रेयभ्रातुरपि ज्येष्ठस्य गुणाधिक्ये द्व्यंशभागित्वं स्पष्टमितरेषां भ्रातृ
णां वैमात्रेयाणामपि उद्धारभागित्वं च मनुनैव प्रायः स्पष्टीकृतमिति ध्येयं॥ एतयोर्व
यमभिप्रायः मातृज्यैष्ठ्ये एकं वृषभमित्यादि मनुवचनयोर्मातृज्यैष्ठ्यादरे तात्पर्यम
स्ति पूर्वजातिरिक्त उद्धारस्य मातृक्रमेणैवोक्तत्वादिति चिंतनीयं॥ हलायुधस्तु॥ पूर्व
जः पूर्वस्मिन्काले जातः वयोज्येष्ठ इति यावत् तद्गुणानां पूर्वजातस्य वयःकनिष्ठानां
श्रेष्ठा वृषाः स्त्नेह श्रेष्ठ वृषाः स्वमातृतः स्वमातृक्रमेण यथा व्यपकर्षं प्रत्येकं भ
वेत् कं गृहीतव्या इत्याह॥ तस्यायमभिप्रायः॥ पितृसंस्कारसाधनज्येष्ठपत्नीपुत्र
त्वाश्रेष्ठस्य पुन्नामनरकत्राणकर्तृत्वादिरूपस्य पितुरुपकारकत्वस्य और्ध्वदैहिकादि
क्रियार्हत्वस्य अन्यभ्रातृणां पालनयोग्यत्वस्य नमस्यत्वस्य त्यागस्य गुरुत्वेन नैयायि
कमेव पूर्वजातस्य ज्येष्ठांशभागित्वं यथा हि यथा॥ स्मृतिद्वयविरोधे न्याययुक्ता स्मृति
र्बलवती स्मृतेर्विरोधे न्यायस्तु बलवान् व्यवहारत इति याज्ञवल्क्यवचनात् तस्या एक
स्याः स्मृतेरपि तात्पर्यविवादे न्यायवत्त्वेन बलवत्त्वं व्यवस्थेयं युक्तितोऽस्यादिति मातृ
क्रमेण उद्धारभागित्वकथनं चेतरेषां भिन्नभिन्नवर्णमात्रिपुत्राभिप्रायेण इति सदृश
स्त्रीषु जातानामिति वचनेन तदेव स्पष्टीकृतं वक्ष्यमाणं च कीनाशो गोवृष इत्यादि वचनं
सगुणब्राह्मणीपुत्रविषयत्वेन कल्पनीयं एवं सहरेत सपूर्वज इत्यपि ब्राह्मणीपुत्रपरमि
तिबोध्यं अत्र प्रकाशकारमतमेव साधीय इति खस्यते कुल्लूकभट्टमते विकल्पे छ दोषा रामः

यन्निर्दोषः हलायुधमते असवर्णस्त्रीजातपुत्राणां विभागक्रमान्तभिन्नप्रकरणे व
क्ष्यमाणत्वादिदानीं तत्तात्पर्यकथनमनुचितमिति दोषः न च समानत इत्यनेनमा
तृविवाहक्रमेणैव उद्धारो देय इत्येव तस्याभिप्रायः स्पष्टशब्देनाऽलिखनात् न तु भिन्न
वर्णमातृक्रमेण इति तस्याभिप्रायं ज्ञातिवाच्यं तथा सति न्यायानवतारेण वचनमूलक
त्वात् समानत्वक्रमस्य ग्रन्थलेखे पूर्वज इत्यस्याभिपूर्वजात इत्यर्थव्याकारस्यैव युक्तत्वा
दिति विभावनीयं॥ अथवा इदं व्याख्यायं हलायुधेन पूर्वजः पुन्नामनरकत्राणकर्त्ता
एवं वृषभहरेत्ततोऽपकृष्टः वृषाः वयः कनिष्ठानां मातृतः मातृसंख्यया इति सापत्या
स्वैर्विभक्तव्यं मातृभागेन धर्म्मीत इति च हस्वतिनापि न मातृबांधवद्विभागविशेषक
र्तव्य इति गौतमवचनेन चैकवाक्यत्वात् एतच्च समसंख्यपुत्रस्थलाभिप्रायं अथवा
भिन्नसंख्यास्थलेपि उद्धारः मातृगणनयैवमनुवचनादिति गौतमः॥ वृषभोधिको
ज्येष्ठस्य वृषभषोडशाज्यैष्ठिनेयस्य समाधावा ज्यैष्ठीयेन यवीयसा॥ कुल्लूकभट्टम
ते ऽपत्नद्वचनं स्पष्टमेव ज्येष्ठाभिन्नायां सजातीयायां जातस्य एको वृषभ उद्धारणेन
स इत्यसलीषु जातानामित्यनेनैकवाक्यत्वं जैष्ठिनेयस्य ज्येष्ठापुत्रस्य ज्येष्ठस्य इत्यनुपपन्न
तेऽप्यनेन जातो ज्येष्ठस्तु ज्येष्ठयोमितिमनुवचनैर्नैकवाक्यत्वं। ज्यैष्ठिनेयस्य कनिष्ठ
स्य कनिष्ठस्य सगुणत्वे द्वाह ज्यैष्ठिनेयेन यवीयसा ज्येष्ठापुत्रेण कनिष्ठेन सह ज्येष्ठस्य
कनिष्ठेयस्य समाधासमानप्रकारेण वा उद्धारः इति रत्नाकरेण। ऋषभोधिको ज्येष्ठा
य गृह्यं यवीयसेइति संखलिखितवचने पूर्वं लिखितं अनेकमातृकविभागस्थलेपि
लिखितं ज्येष्ठ पुन्नामनरकत्राणकर्त्ता इति अभिप्रेतं च पूर्वो चोक्तं इदं च ज्येष्ठका
निष्ठयोर्गुणवत्वे इति गौतमः॥ प्रतिमातृबांधवद्विभागविशेषः बांधवरत्न यथा यत्र
चत्वारः पंच वा भ्रातरः संति तत्र प्रतिभ्रातृ एकैको भागो दीयते न वा यत्र बहुनामा
तरः संति तासां च समसंख्या बहवः पुत्राः तत्र भ्रातृभागस्य दुःशक्यत्वान्मातरं
मातरं प्रति भागो दातव्यः॥ ततश्चैतैः पुत्रैः सवर्णैः स्वस्वपर्यन्तःभ्रात्रादिरूपेविभज्या विशे
षो विंशोद्धारादि रूपः रत्नाकरः॥ अत्र च विंशोद्धारपदश्रवणात् विभिन्ना मातृकभ्रा
तृविभागे विंशोद्धारादिर्दे यएव परं तु वृषभमात्रदानं न तु निर्गुण ज्येष्ठादिप्रायेण मन्वा
दिभिरुक्तमिदं चिंतयनीयं॥ अयं च मातृसंख्यया विभागः सवर्णमातृपक्ष एव सं
भवति नासां पुत्राणामेव समविभागसंभवात् भिन्नवर्णस्थले तु विभागवैलक्षण्यात्
यथा॥ मनुः॥ ब्राह्मणस्यानुपूर्व्येण चतस्रः स्युर्यदि स्त्रियः तासां पुत्रेषु जातेषु
विभागेयं विधिः स्मृतः॥ कीनाशो गोवृषो यानमलंकारश्च वेश्म च॥ विप्रस्यो

हारिकं देयमेको ऽंशश्च प्रधानतः त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः॥ वैश्याजो
ऽध्यर्द्धमेकांशं अंशं [stain] शूद्रासुतो हरेत्॥ आनुपूर्व्येणेति क्रमेणेति व्याख्यानं कुल्लू
कभट्टे। न तस्यायमभिप्रायः। आनुपूर्व्येणैव विवाहो धर्म इति यथा याज्ञवल्क्यः॥ तिस्रो
वर्णानुपूर्व्येण द्वे तथैका यथाश्रमं॥ इति आनुपूर्व्येण स्त्रीगतवर्णानुक्रमेण यथाक्र
मं ब्राह्मणेन तिस्रः क्षत्रियेण द्वे वैश्येनैका विवाहा द्विजातीनां शूद्राविवाहस्य याज्ञव
ल्क्यासम्मतत्वात् तिस्र इत्यादि संगच्छते क्रमभंगेन विवाहे तु क्षत्रियादीनां वर्णक्रमेण
ह्रासेऽपि विवाहक्रमेण गौरवात् समत्वादिसंभावनेति न रुचिरं॥ ब्राह्मणीपुत्रपेक्षयापू
र्वं क्षत्रियापुत्रस्य जन्म नेयथा तस्या न ज्येष्ठं तथा ब्राह्मण्यपेक्षया पूर्वं क्षत्रियाया वि
वाहेऽपि ज्येष्ठत्वमनादृत्तस्य चितत्वा॥ यदि स्वाश्चापराश्चैव विंदेरन् योषितो द्विजाः॥
तासां वर्णक्रमेणैव ज्येष्ठं पूजा च वेश्म च॥ इति मनुना वर्णक्रमेणैव इत्येवकारेण वि
वाहक्रमेण वयःक्रमेण वा ज्येष्ठाभावस्य स्पष्टीकृतत्वात् चकीनाशः गोवृषः गवां सेक
कर्त्ता अनड्वान् यानं अश्वादि अलंकार अंगुरीयादि वेश्म प्रधानं गृहं। एकोंऽशश्च
प्रधानभूतः विप्रस्य ब्राह्मणीपुत्रस्य उद्धाररूपो दातव्यः दायभागे अस्य भागत्रयं
वक्ष्यते॥ ननु किमिदं अत्र उद्धाररूपं एकभागमुक्त्वा पुनस्त्रिभागकथनं एकधैव
किं भागचतु[stain]ष्टयं नोक्तं उच्यते सवर्णास्य त्वे समं भजेरन् पैतृकं रिक्थं इति मनुव
चनात् समानस्वामित्वे सिद्धे ज्येष्ठादेर्गुणजन्मादिकृतमाननिबंधनं विशेषोद्धारादि
कं दीयते॥ तथात्र त्र्यंशं दायाद्धरेद्विप्र इति वचनेन नादृशना दृश[stain] विभागदाने नता
दृशमेव विप्रादीनां स्वामित्वं प्रतीयते उद्धारस्तु वस्समानवर्णाकृत वर्णाकृतमाननि
बंधन एव एकांशादिरूपः॥ तथा च यदि कनिष्ठो ज्येष्ठस्य पूजां न सम्मते न दा विशे
द्धारं न दद्यात् व्यवहारश्चेद्दानीत थैव किन्तु भागवत पूजाघकरण एव तत्वस्य दृष्टभव
ति तथा क्षत्रियादिपुत्रोऽपि चेत् ब्राह्मणीपुत्रादि पूजां न सम्मन्यते तदा तं अंशं न द
द्याद् एव दुरदृष्टभागी च भवति न चैवं विंशोद्धारादि शास्त्रवैयर्थ्यं इति वाच्यं पूर्णपात्रा
दिपरिमाणबोधकशास्त्रवदवैयर्थ्यात् द्रव्यपरिसंख्यारूपत्वात्॥ विंशोद्धारादेर
धिकनिष्ठः शत्तपनिशयाद् द्वानाच्चदहाति तदा तस्य अशास्त्रीयत्वात् तत्पुत्रादि
रन्यथाकर्तुं शक्नोतीति शास्त्रश्रवणार्थकं ब्राह्मणीपुत्रादि स्वांशादिकं अकामैरपि दात
व्यमिति विभावनीयं चण्डेश्वरस्तु॥ विप्रापुत्रस्य दायविभागकाले लभ्यस्य भागत्रयस्य
एकं प्रधानभानगं दद्यादित्यर्थः इत्याह॥ अतोऽसवर्णास्य त्वेमात्रगतो भागो न
संभवतीति रत्नाकरसम्मतः पन्थाः ननु अत्रापि ब्राह्मण्यपेसोद्धार भागत्रयं क्षत्रियायै राम ९

भागद्वयं वैश्यायै सार्द्धं भागं शूद्रायै एकं भागं दद्यादिति भागः। किं न संभवतीति चेन्न॥ गो
तमादिभिर्मातृगतनादृशभागस्यानुपदेशात् स्पष्टमाह बृहस्पतिः॥ यद्येकजाता बहवः
समाना जातिसंख्यया॥ सापत्नास्तैर्विभक्तव्यं मातृभोगः न धर्मतः॥ तथा च समानजा
तीसंख्यया इत्यनेन वैमात्रेयै जात्या समानः॥ एकमातृपुत्रगतसंख्यया च समानाः
सर्वे मातृपुत्राः एवं भूताः सपत्नाः वैमात्रेयाः तेमातृसमानसंख्यकभागेन विभागं कुर्युः
एवं च पुनर्विभागकरणे सर्वेषामेव तुल्यांशो भवति एवं च विभागकरणलाघवायैवोक्तं
बृहस्पतिना फलतो न विशेषः गोतमवचनमप्येतद्विषयकमेव एतदेकवाक्यत्वात् ननु
गोतमवचनैकवाक्यत्वात् एतद्वचने समाना जातिसंख्याया इत्युपलक्षणेन विभागो भव
तु इत्यत आह॥ सवर्णाभिन्नसंख्यायेषु भागस्तेषु विधते॥ एवं च गोतमवच
नस्य॥ संकोचावश्यकत्वे सवर्णाविषयत्वं॥ तत्रैव भृगुः॥ सवर्णाः पुत्राः समानांशाना
रघुज्येष्ठस्य श्रेष्ठमुद्धारं च दद्युः एतच्च पुत्राणां भिन्नसंख्यकत्वे इति रत्नाकरः॥ अत्रेद
मवधेयं॥ यदि हि मातृगतविभागोपि फलतः पुत्रगत एव विभागक्रिया लाघवायैव मा
तृसंख्यया भागकरणं तदा सर्वेषां पुत्राणां तुल्यगुणत्वे एव मातृगतविभागो वोध्यः
न तु पुत्राणां गुणवैलक्षण्ये तथा सति उद्धारतारतम्येन विभागकरणासंगत्यापत्तेः॥
अथवा उद्धारमुद्धृत्यैव मातृसंख्यया विभागः कर्त्तव्य इति न च उद्धारं ज्यायसे दत्वा
भजेरन्नितरे समं॥ इति मनुवचन अनुपदोक्तविष्णुवचनाभ्यां अनेकमातृविभाग
ज्येष्ठमात्रोद्धारस्य उक्तत्वात् अन्येषामुद्धारो नास्तीति वाच्यं तद्गुणानां स्वमातृतदसने
न मनुना अन्येषामप्युद्धारकथनात् एवं च पुत्रगुणेनैव पुत्रजन्मज्यैष्ठादीन्स्वमा
तृष्वारोप्य उद्धारो दातव्यः यथा यस्या द्वौ गुणवंतौ एको निर्गुणः पुत्रस्तस्यां गुणद्वयं ए
वं एको द्वितीयः एकः पंचमः एकः सप्तमः यस्याः पुत्रः तस्यां च तादृशतादृशं ज्यैष्ठ्यं एवं
आरोप्य उद्धारो दातव्य इति दिक्॥ मनुवचने विष्णुवचने च पुत्राणां तुल्यगुणत्वाभि
त्वस्थले ज्ञेयं यद्विषये उद्धारो न दृश्यते इति मनुवचनं न च पौनरुक्त्यं दोषाय॥ नाना
वर्णाभार्यासम्भवस्थले त्र्यंशादिविभागमुक्त्वा समवर्णामात्राभार्यासंभवस्थले किं
स्यादिति वर्त्तकत्वेन समभागकथनार्थत्वात्॥ ज्येष्ठं च जन्मक्रमेण ज्ञेयं तन्निबंधनं
च एकद्रव्यमुद्धारः रूपमिति प्रागुक्तं तदेव रत्नाकरमते लक्ष्मीधरपारिजातौ तु
॥ एवं च वृषभमुद्धारं संहरेत सपूर्वज इति वचनेन पूर्वज इत्यस्य पूर्वा जन्य इत्येवार्थ
इति व्याकुर्वीतो॥ विषमं चास्य जन्मज्येष्ठायेत्स्या ज्येष्ठा पुत्रस्य गुणवत्त्वं ध्रुवाते अत्र
ज्येष्ठायां मध्यम पुत्रमात्रस्य गुणवत्त्वे तु स एव ज्येष्ठो मंतव्यः वस्तुनो जन्मज्येष्ठए

वज्येष्ठोज्येष्ठः पुन्नाम्नः नरकत्राणकर्तृत्वादिना तस्यैव बहुधानुतत्वात्तद्व्यक्तमाह ॥ मनु
रेव ॥ जन्मज्येष्ठस्य चाह्वानं सुब्रह्मण्यास्वपि स्मृतं ॥ यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता
॥ यथा सुब्रह्मण्या नाम मंत्रविशेषो ज्योतिष्टोमे इंद्राह्वानार्थश्छंदोगैः प्रयुज्यते
स च एको मंत्रः प्रयोगभेदेन बहुत्वस्वीकाराद्बहुवचनं ॥ तत्र च विधिबलात् प्रथम
पुत्रेणैव पितरं व्यापादिश्य इन्द्राह्वानं कर्त्तव्यं यथा अमुकस्य पिता यजत इति तत्र जन्म
ज्येष्ठेनैतादृतालाटस्तत्रेयथा ज्येष्ठं स्त्रीपुंसा ये जीवेयुरिति वचनात् तथा च जीवदपे
क्षमेव ज्येष्ठत्वं तस्मात् ज्येष्ठापुत्रत्वेनापेक्षितं तथा ऽपेक्षायां जीवदपेक्षत्वविवेचनेवे
यर्थ्यात् ॥ देवलः बहिर्वर्णेषु चाशिष्याधमयोः पूर्वजन्मतः ॥ पूर्वं भूमिस्पर्शतः मनुवच
नस्य च गर्भेषु यमयोर्गर्भे एककालनिषिक्तयोरपि जन्मतः भूमिस्पर्शेनैव ज्येष्ठतेत्यर्थः ॥
ननु भूमिस्पर्शः कस्यादौ भूत इति यत्र निश्चयो न भवति तत्र का गतिस्तत्रापि ॥ देवलः
॥ यस्य जातस्य यमयोः पश्यंति प्रथमं मुखं ॥ संतानः पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितं ॥
तथा च ज्ञातयः पितरश्चैवावहत्वाद्बहुवचनं यस्य मुखं ॥ पश्यंतीति ॥ यो जनासंतानः सं
तानकार्यकारित्वं असंतानपरिहारकत्वं तस्मिन्नेव स्वीकरणीयं अन्यथा कस्मै
ज्येष्ठांशं दद्यादित्यत्रानध्यवसायः स्यात् पितर इति प्रेतकर्मादिरूपएकमात्रक
र्तृकपितृकर्मणि स एव मुख्याधिकारी ज्येष्ठमिति ज्योतिष्टोमादौ इंद्राह्वानादिकं ज्ये
ष्ठांशलाभादिकं च तस्मिन्नेव प्रतिष्ठितं यमयोरिति हि वचनमविरक्षितं तेन यमा
मामप्येषैवं व्यवस्था इति मंतव्यं ॥ बहिर्वर्णेषु शेषवर्णेषु शूद्रेष्विति यावत् बहुवच
नात् शूद्रधर्मग्राहिणां संकराणां परिग्रहः तेषां च चारित्र्येणास्तु शीलत्वेनैव ज्ये
ष्ठत्वं ॥ एतच्च गुणज्येष्ठत्वं शूद्राणां विद्याध्ययनानधिकारात् ॥ वाचस्पतिस्तु ॥
जन्मज्येष्ठनिबंधनांशभागित्वमपि शूद्राणां नास्ति तथा च ॥ मनुः ॥ शूद्रस्यैव भार्या शू
द्रस्य नान्या भार्या विधीयते ॥ तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् ॥ अत्र स
मांशा इत्यनेन ज्येष्ठत्वनिबंधन उद्धाराभावः सूचितः गुणनिबंधनस्तु विद्याकर्मयु
तस्तेषामाधिक्यं लब्धुमर्हति ॥ इति बृहस्पत्युक्त उद्धारः सामान्यविषयकत्वात् अ
स्त्येवेत्याह श्रीकृष्णतर्कालंकारस्तु ॥ ब्राह्मणादीनां असवर्णापुत्रादीनां विभा
गविशेषश्रवणे न शूद्राणां कीदृशो भागो भवेदिति संदिहानं प्रत्येकरेव मुक्तं मनु
ना शूद्राणां एकवर्णामात्रभार्यापुत्राणां समानांश एवांशो भविष्यतीति न तु पूर्वजन्म
स्य ज्येष्ठत्वनिबंधनोद्धारनिवृत्तिः नान्या भार्या यदृश्यते ॥ इत्यनेन तस्य प्रतीतत्वा रामः
त् उद्धारस्यांशस्याभावाच्च इति आह शूद्राणामपि वैदिककिपापां ज्येष्ठत्वं पूर्वज २०

श्लोकः २५

न्मानिबंधनमेवग्राह्यमिति सर्वमनएवकल्पनीयंज्येष्ठस्यगुणातिशयत्वेइतरे
षांनिर्गुणत्वेद्व्यंशीवापूर्वजइत्यादिगोतमसूत्रंप्रागुक्तंसर्वेषांसमगुणत्वेतुप
क्षांतरमाह॥ गोतमः॥ एकैकंवाधनरूपंपत्काम्यंपूर्वतः पूर्वोलभेतदशतः
पशूनांयत्काम्यंस्यतदिच्छाविषयंयथा आद्यो ज्येष्ठइच्छयाएकंद्रव्यंदशपशू
न्गृह्णातीततो ऽवशिष्टेतुधनेषुमध्ये द्वितीयएकंद्रव्यंदशचपशून्ततनन्तरी
य इत्यादिक्रमेण अत्रच आद्ये ज्ञानस्य आद्ये ग्रहणमित्येवमेवमाननं॥ चण्डे
श्वरस्तु॥ पशून्समानजातीयानित्याह तदसम्भवेतुयथासंभवमेवग्राह्यमि
तिमंतव्यंपशून्विशेषयति॥ सएव॥ नैकशफद्विपदानां॥ एकशफानांअश्वादी
नां द्विपदानांदास्यादीनांचदशदशनगृह्णीयात् इतिपूर्वेणान्वयः॥ अजाविकन्वे
कशफनजातुविषमंहरेत्॥ अजाविकंतुविषमं ज्येष्ठस्यैवविधीयते॥ इतिमनुव
चनात्छागमेषयोरपिदशदशनगृह्णीयात् अत्रज्येष्ठेनग्राह्यं नवातत्रेदमुत्तरंय
त्र ज्येष्ठस्यैवविंशदशकाद्युद्धारवचनांतरसिद्धस्तत्रैवप्रतिप्रसूतेअजाविकमपिज्ये
ष्ठेनग्राह्यमिति अत्रानुसंख्ययासमोद्धारस्यैवविषयत्वात् अन्यथान्दशणां अनाविक
दशग्रहणनिषेधात् ज्येष्ठस्यापिनाधिकार इति मंतव्यं कुल्लूकभट्टस्तु॥ एतन्मनुव
चनंविभागपरमाह यथापंचभ्रातरःविभजंते छागाश्चत्वारः तत्रप्रत्येकंएकैकश्छा
गः अंशो न भवतिन्यूनत्वात् तन्मूल्यप्रतिनिधिवाद्रव्यांतरंविभजनीयं तन्निषेधति
मनुः ततः किंस्यादित्यत्राह मनुः॥ ज्येष्ठस्यैवइतितत् ज्येष्ठायएव दातव्यमिति
भावः॥ तत्रवृद्धधाविधारः॥ प्रतत्वरिज्येष्ठांशविवेचनमध्यपातीदंवचनंनविभाग
परंभवितुमर्हतीति एवं अजाविकं ज्येष्ठायदातव्यमित्युक्तं माकुएकशफस्यकाग
।तिआजाविकपदस्य उपलक्षणस्यत्वतनपदस्यवैयर्थ्यमेवइतिवगोतमेनवाक्य
तत्राज्येष्ठांशनिषेधपरत्वसंभवेततपरित्यज्यस्वातंत्र्यकल्पनेऽनुयोग्य इतिचवि
भावनीयं॥ नारदः॥ ज्येष्ठायांशोधिकोदेयः कनिष्ठायावरः स्मृतः॥ समांशभागाः
शेषाःस्युरप्रत्ताभगिनी तथा॥ क्षेत्रे जेषुतुपुत्रेषुतत्वहृज्जातेषुधर्मतः॥ अत्रकेचि
त्तुपरस्परतुल्यगुणयोगिकिंचिन्न्यूनगुणक निष्ठभ्रातृसमुदायस्यात्पल्पधनवि
भागविषयकतामिदं एकद्रव्यरूपोद्धारदानासामर्थ्यात् उत्कृष्टभागदानेनैवतत्संव
र्द्धनंनिर्गुणत्वेनन्यूनत्वाच्चनिकृष्टभागदानंकनिष्ठायइत्याहुश्चण्डेश्वरस्तु॥ अधिकों
शः विभागेयोंशोल्पस्ततस्मादन्यः ज्येष्ठ त्वनिवं धनंदेयः कनिष्ठायावरइतितन्यू
नः तत्याद्योनलदद्दुतत्पादावाइदंचकनिष्ठस्यगुणावलेगुणं विविच्यैवदेयमित्यभिप्रे

श्लोकः २५

तिशेषाम ध्यमानिर्गुणाः समांशं गुणादि निबंधनाधिक्यरहिते ॥ शभागः भजनं स्वामित्वं
येषां अभरत्ता भागिनी अंशभागिनी अंशभागिनी नतु समांशभागिनी तस्याः समांशि
त्वनिषेधस्य वक्ष्यमाण॥ त्वान्यद्दा समांशभागिनी आधिक्यरहितभागस्वामिनीय
था॥ समस्तत्र विभागः स्यादिति सचांशो वक्ष्यमाणश्च तुर्थश्च भागः॥ प्रकाशकारेण तु
कानिष्ठायावरइतिस्थाने श्रेष्ठायचवरइतिपठितं व्याख्यातं च प्रथमोत्पन्नस्यांशद्वयं
श्रेष्ठः कुटुम्बककर्मण्युपयुक्तः तस्य वरं श्रेष्ठं किंचिद्द्रव्यमिति औरसेषु यदुक्तं क्षेत्रजेषु
तिधर्म्मज्ञो जानेषु क्षेत्रजेषु तद्वत् औरसपुत्रवत् तथा च तत्प्रयोज्यवस्था औरसपुत्रेउ
क्ता ज्येष्ठांशविषये क्षेत्रजेष्वपि तत्संभवेत्तास्ताएवगन्तव्या इति भावः॥ धर्म्मतो जा
तेष्विति संक्षेत्रक्लीबादिभिर्यदीन्यस्मै सकुल्यायसवर्णाय वा अपत्योत्पादनार्थं दीयते ते न
च घृताभ्यक्तत्वादिरूपनियोगधर्म्मेणापत्यमुत्पाद्यते तत्र एव क्षेत्रजस्य धर्मतो जन्म भव
तिकथं पुनरेकस्य क्षेत्रजातानां अनेकेषां संभवः॥ उच्यते यमोत्पन्नविषयमेतदिति च एके श्च
र॥ तथा च एक प्रवक्तारपि देवात्॥ नानापुत्रोत्पत्ति भवतीति भावः॥ एतच्च जन्मविद्यागुणद्वा
राज्येष्ठे॥ जन्मविद्यागुणज्येष्ठो द्व्यंशं दायादवाप्नुयात्॥ समांशभागिनस्त्वन्ये तेषां पितृस
मस्तु इति बृहस्पतिवचनैकवाक्यत्वात् तज्जन्मपूर्वं जन्मविद्यास्वजात्यनिन्दित विद्या
गुणाः शीलादिपितृसमइति हेतूक्तेः अन्ये निर्गुणा भ्रातरः कनिष्ठा विद्याश्च एतद्वि
षयएव द्व्यंशी वा पूर्वज इति गौतमवचनं॥ उशनाः॥ वर्णानामनुलोमानां विभागोयं प्रकी
र्तितः॥ समवर्णैकजातानां विभागस्तु विधीयते॥ पूर्वार्द्धे नानावर्णापुत्राणां विभागोपसं
हारः॥ अनुलोमानां पितृवेक्षया पकृष्टजातीयापुत्राणां॥ एकजातानां एकजातीय
पुत्राणां विभागस्तु समत्वेन विधीयते इत्यर्थः॥ इति केचित्॥ अयं च समभागः सर्वेषां
पुत्राणां निर्गुणत्वे न तु ज्यानां कस्यचिद्गुणवत्त्वेपि नानाविधव्यापारेण धनार्ज्जकानां मे
तिरत्नाकरः॥ तत्र पूर्वकस्ये जन्मनि बंधने श्रेष्ठद्रव्यमुद्धारं दत्वेति ज्येष्ठस्य भ्रातृत्ववचं
कत्वादिरूपशेषवत्त्वे इति बोध्यं परकृत्यस्य साधीयानेव॥ मनुः॥ अविद्यानां तु सर्वेषा
मीहातश्चेद्धनं भवेत्॥ समस्तत्र विभागः स्यादपित्र्य इति धारणाः॥ अविद्यानामि
तिमदर्शनमात्रं सविद्यानामप्येष एव न्याय इति मंतव्यं॥ कुल्लूकभट्टस्तु॥ सर्वेषां भ्रा
तॄणां अविद्यानां कृषिवाणिज्यादिचेष्टया धनलाभः तत्र पित्र्यनर्ज्जिते तस्मिन्धने स्वार्ज्जि
ते समो विभागः स्यान्नतूद्धार इति॥ निश्चय इतिहं पित्र्य सहकारेणार्ज्जने भ्रातॄणामविभ
क्तानामिति वचनं तु पितृसहकारेणार्ज्जने इति न योन्हत्वयं॥ याज्ञवल्क्यः॥ सामान्यार्थे राम:
समुत्थाने विभागस्तु समः स्मृतः॥ येन चैषां स्वयमुत्पादितं स द्व्यंशं हरेदिति वशिष्ठवच २१

नस्यापवादोयं सामान्येतियदा सामान्यार्थस्य कृषिवाणिज्यादिनां समुत्थानं संवर्द्धनं के
नापि न कृतं भवतितदा तत्र समविभागो न सम्वर्द्धनकर्त्तुर्वंशद्वयमित्यर्थः ॥ विशिष्टव
चनन्तु तदितरविषयकतया व्यवस्थाप्यमिति रत्नाकरः ॥ यदा सामान्यार्थस्य कृषिवा
णिज्यादिना वर्द्धनं भवतितदा समो विभागो न तत्र वहुतरमीहनेनोपपन्नेमित्यपेक्षयाऽधि
कदानं कर्त्तव्यं एतदुभयविधानां अन्येकवाक्यत्वात् इति दीपकलिकावस्तुतः समो ज्येष्ठस्यनिबं
धनोद्धाररहित इत्यर्थः ॥ संमिलित्वाभ्रातृणां उत्थानैः र्ज्जने इति एवं च ज्येष्ठांशो भ्रातृकृ
तभागस्य लेयाद्ग्र चत्वार्यनुक्तोपि एतद्वचनस्वरसादेवावरणीय इति व्यंजितं इत्यवधेयं
अतएव वाचस्पतिमिश्रैः सामान्यार्थस्यैकोपि भागी यदि कृषिवाणिज्यादिना वर्द्धनं करो
तितदापि तस्य नांशाधिक्यमित्यर्थः इदं त्वसाधारणेनान्येषामप्येवंरूपत्वे अन्यथा चाशि
ष्टविरोधः स्यादित्युक्तं मनुः ग्यवीयान् ज्येष्ठभार्य्यायां पुत्रमुत्पादयेद्यदि ॥ समस्तत्रविभागः
स्यादिति धर्म्मो व्यवस्थितः ॥ उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते ॥ पिता प्रजानां
प्रजनेतस्माद्धर्म्मेण तं भजेत् कनिष्ठो यदि ज्येष्ठभ्रातृभार्यायां नियोगेन पुत्रं जनयेत्
तदा तेन पितृव्येन सह तस्य क्षेत्रजस्य समो विभागः स्यान्नतु [illegible] त्ववद्विंशोद्धारे
सम्भवतीति विभागव्यवस्था नियता ॥ नियोगोत्पन्नस्यांशे शि त्वं वक्ष्यति ॥ यद्यपि समेनभ्रा
तरः सममित्युक्तं तथाप्यस्मादेव लिङ्गात् पौत्रस्यापि मृतपितृकस्य पैतामहधने पितृ
वदविभागोस्तीति अवगम्यते ॥ ज्येष्ठभ्रातुः क्षेत्रजपुत्रोपि सोद्धारविभागभागीयुक्तः ज्ये
ष्ठस्य पुत्रत्वात् इत्यंशे तिमोशं कानिराकृत्य पूर्वोक्तमेव दृढयति उपसर्ज्जनमिति उप
सर्ज्जनं अप्रधानं क्षेत्रजः पुत्रः प्रधानस्य क्षेत्रिणः पितुर्धर्म्मेण सोद्धारविभागग्रहण
रूपेणा न सम्बध्यते क्षेत्रेऽपि पिता क्षेत्रद्वारेणोत्पादने प्रधानं तस्मात् पूर्वोक्तेनैव ध
र्म्मेण विभागव्यवस्थारूपेण सम्भक्तं क्षेत्रजं विभजेदिति पूर्वस्यैव शेष इति कुल्लूकभट्टः
॥ क[illegible] वित्तु कनिष्ठभ्राता यदि ज्येष्ठस्य भार्य्यायां धर्म्मतः पुत्रमुत्पादयति तदा तत्र
तद्भ्रात्रोर्विभागे तद्भ्रातृपुत्रेण सह पितृव्यस्य वा विभागे समएव विभागः न तु विंशोद्धा
रादिरिति भावः ॥ अत्र हेतुमाह उपसर्ज्जनमिति यत् इति पूरणीयं उपसर्ज्जनं अप्र
धानीकरणं प्रधानस्य तादृशकनिष्ठस्य धर्म्मतो धर्म्माविरोधेन उपपद्यते ॥ ननु कथं त
त्र कनिष्ठस्य प्रधानत्वं इत्यत आह पिता इति प्रजानां उत्पादने उत्पत्तौ कनिष्ठः पिता उत्पा
दकः तथा च यतस्मस्य वंशोत्पादकः कनिष्ठः अतो ऽस्य प्रधानत्वमिति भावः तस्मा
द्धर्म्मेण हेतुना तं समभागं भजेत गृह्णीयात् न तु उद्धारमपीति भावः इत्याहुः ॥ अत्र ए
तानि ज्येष्ठांशविधायकानि वचनानि पितृकृतविभागे सोदरभ्रातृविभागे विभिन्न

मातृविभागे च यथासंभवं नेयानि अन्यथानादृश्यताद्दृशस्य तेआकांक्षायां। अनिवृत्ते
: कर्तव्यबोधकपदसमभिव्याहृतवचनं च भदर्शनमात्रे वेदितव्यं परंतु येन मुनिना वि
शेषत उक्तं तन्मुनिवचनानि विशेषत एव व्यवस्थापनीयानीति केचिदाहुस्तन्न प्राची
नो सम्मतं पितामहचरणैः॥ वचनत्रयस्यैव पितृकृतविभागस्य लोपत्वकथनात् मनुव
चनयोर्बौधायनवचनस्य च दूरतरव्यवच्छेदेन वैमात्रेय भ्रातृभागस्य लोपत्वकथनाच्च
चण्डेश्वरेण च जीवत्पितृकविभागमुपक्रम्य वचनचतुष्टयस्यैव। लिखनात् दूरत
रेषां तु प्रायः सोदरासोदरभ्रातृभागस्य लेलिखनाच्च वाचस्पतिमिश्रादिभिर्विशेष
तो कथनाच्चेति ध्येयं॥ अत्रेदमवधेयं॥ इदानीमस्मद्देशे विंशोद्धारादि व्यवहारः
प्रायशो नास्ति किंतु किंचिदेव द्रव्यं ज्येष्ठस्य मानरक्षार्थं दीयत इति॥ परिच्छेदानीता
खिलविद्याधरपरिशीलनविमलीकृतपालाधिकुलप्रसूत जातु विसमलंकृतत्रिवे
णीनिलयश्रीहरतर्कवागीशभट्टाचार्यात्मज श्रीजगन्नाथतर्कपंचाननभट्टाचार्य
विरचिते विवादभंगार्णवे पंचमे दायभागद्वीपे वस्त्वाभिधानं प्रथमं रत्नं॥ ०॥ ०॥ ०
॥ ०॥ तदिह प्रसंगात् ज्येष्ठांशविवेचनोत्तरं पितृकृतः पितृकृतविभागो निरूप्यते॥ त
त्र स्वार्जितं स्थावरादि पिता विभजेत स्वेच्छया आदौ या। यदि च्छंस्वयं गृहीयात् ततः ज्ये
ष्ठाय उपयुक्तं यथाशास्त्रं मानवद्धनं दत्वा पुत्रेभ्यः समं भजेत् सतितु सकृत्वा द्वौ अ
धिकमपि दद्यं प्रातिकृत्या चरणे चन्यूनं। पितृद्वेषादिरूपदोषसत्वे च अंशं न दद्यादेव
॥ विभागं चेत् पिता कुर्यात् स्वेच्छया विभजेत् सुतान्॥ इति याज्ञवल्क्यात् पिता चेत्
पुत्रान् विभजेत् तस्य स्वेच्छा स्वयमुपार्जितेष्विति विश्वरूपात् स्वल्पे नवासं विभज्य भू
यिष्ठमादायवसेदिति हारीतवचनाच्च एषु वचनेषु इच्छाया एव पितृभागनियामक
त्वश्रुतेः अपरिमितभूयिष्ठधनग्रहणश्रुतेश्च पितुर्द्व्यंशहारित्वं पैतामहधन एव ज्ञे
यं पैतामहे पि मणिमुक्तादौ स्वार्जितवद्विभागः॥ मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभु
रिति वचनात् इति जीमूतवाहनादयः॥ तत्रः समः सर्वेषामविशेषात् वरं वा स्वयमुद्ध
रेत्॥ ज्येष्ठ इत्यादि बौधायनादि वचनेभ्यः पुत्राणां सम भागप्राप्तिः ज्येष्ठस्याधिकप्रा
प्तिश्च तत्र॥ जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत्॥ निर्भाजयेन्न चैवैकमकस्मात्कार
णं विना इति कात्यायनवचनं नोपपत्तभयेस्मात्तीयुक्तभक्तत्वबहुपोष्यत्वाक्षमत्वादिगुण
सत्वे पितृप्रातिकूल्यत्वेषादिसत्वे वा न्यूनाधिकविभागाभावानां सिद्धइयेचबौधायना
दि वचनानां संकोचः कर्तव्यः न च अकस्मात्कारणं विनेत्यनेन पुत्रागतगुणानां ज्येष्ठ
त्वसंपादकानां ग्रहणमिति वाच्यं ताद्दशगुणासत्वेपि भक्तादिभ्यो धिकदानेपि पितुः प्रभु

त्वः स्यव्याधितः कुपितश्चैवेत्यादिना नारदवचनेन कामक्रोधादिपरतंत्रपितुरेवाप्रभु
त्वकथनात् इति भावः ॥ यदि तु शठः पिता भक्तमपि पुत्रं दुर्भगाजातं भक्तं नयुंक्ते चपित्र
।द्विषं। तत्र का व्यवस्था इति चेत् पितुः स्वार्जितधने पितुः प्रभुत्वात् भक्तत्वादिनिबंधनाधि
कस्य च पितुरिच्छाधीनदेयत्वात् स यदि न ददाति तदा न को दापयेदिति पित्र वि[illegible] स्वय
मित्युत्तमकाय द्विभागं न ददाति तदा तु राजसमीपे जनसंसदि वा तस्यापि त्वद्वेषं विभाव्यै
व न दद्यात् न तु स्वोक्तिमात्रेण तस्य निरंशत्वसिद्धिः ॥ यदि त्वभक्तमपि सुभगापुत्रं न
न्मात्रसंबंधात् अथ स्वार्जिते धने पिता स्वामी स यदि कस्मैचित् निर्दोषाय न ददाति सदो
षाय च ददाति तदा कस्तस्य शास्ता ॥ न च कात्यायनबौधायनादिवचनबलात् राजैव
शास्तेति वाच्यं यतः नादृश्यवचनो ऽदत्ते धनकर्तुः पितुरधर्मेषु नेशास्ते न तु इत्तम
पि यथा अपात्रे कन्यां दद्यात् तु इति चेत् अत्र केचित् उत्पत्त्यैवार्थस्वामित्वं लभेतेति गौत
मस्मृ[illegible]त्रात् एवकारस्य व्यवच्छेदकारणं तरं विना जन्ममात्रेणैव पित्र्यधने पुत्रस्या
।धिकारात् शास्त्रबोधितव्यवस्थां विना विषमविभागं कुर्वन् पिता साधारणं धनं कस्मै
ददत् राज्ञा दण्ड्यो भवति ॥ न च अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते ॥ इति प्रागु
क्तदेवलवचनात् तस्य स्वामित्वं पित्र्यस्वत्वेनास्त्येवेति वाच्यं तत्रास्वामित्वस्य यथेष्टवि
नियोगानर्हत्वरूपत्वेपि स्वनिविरहात् दृश्यते च सति पितरि सत्यपि स्वे यथेष्टविनियो
गाक्षमत्वं पुत्रस्य यथा ॥ भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः यत्ते समधिगच्छ
न्ति यस्यैते तस्य तद्धनं ॥ इति वचने अधनात्वस्य यथेष्टविनियोगाक्षमत्वस्यैवार्थत्व
क्तव्यः न तु धनास्वामिनः तथा सति तेषां धनसाध्यवैदिककर्मोच्छेदप्रसंगात् न च
तत्र जियंतीति श्रुतेः वैदिककर्मणि यथा न्यायत्वात् स्वामित्वकल्पनावश्यकत्व अ
स्वातंत्र्यार्थकत्वे वचनस्य युक्तं इह तु पित्र्यदत्तधनेनैव वैदिककर्माणि वीहे न तथानुपप
त्त्यभावात् कथमस्वातंत्र्यपरं अस्वाम्यपदं वाच्यमिति जीमूतवाहनोक्तं ॥ साधीय इ
ति वाच्यं विषमविभागं निषेधकशास्त्रस्यथा स्त्रैरन्यथानुपपत्त्या स्वामित्वे कल्प्यमाने इ
हापि अस्वाम्यपदस्य अस्वातंत्र्यबोधकत्वेपि युक्तिनोत्स्यात् न च श्राद्धीयनिमंत्रणेस
न्निहितब्राह्मणपरित्यागवत् विषमविभागोपि अधर्मज्ञापकमेव शास्त्रं न हि तत्र तदी
यभोज्यद्रव्ये सन्निहितब्राह्मणस्यास्वत्वमस्तीति वाच्यं नारदवचनेन विभागेपि ताप्रभु
रित्यनेनापि तु विषमविभागकरणेऽसिद्धिबोधनात् तस्वामिना चेत् विषमविभागो मो
हात् कृतः तदानीं तस्येच्छया च तस्य स्वत्वनाशे जाते पुत्रस्य सर्वस्वक्षणिकत्वेर्वा स्वत्वं
जाते तदानीं पितुरप्रभुत्वविभावनेन किं कर्त्तव्यं तस्मात् जीवत्यपि पितरि तद्धने पुत्रा

श्लोकः २४

एणां स्वत्वपरं तु नयथेष्टविनियोगक्षमत्वे अत एव॥ स्थावरं द्विपदं चैव यद्यपि स्वयम
र्जितं॥ असंभूय सुतान् सर्वान् न दानं न च विक्रयः इति वचनं यथाश्रुतं संगच्छते
तेत्र मणिमुक्तादेः आचिरकालस्थायिद्रव्येपि तदुक्तेपुत्रानुमतिमि तिद्वेवदृत्याभिप्राये
ण एव स्थावरपर्यंतं कथनं व्यवहारश्च नादृशः एवं न च स्वामिना ऽनुपेक्षितेपि द्रव्ये औ
पाधिकस्वत्वापत्तिभयात् स्वत्वं प्रति स्वत्वत्वेन प्रतिबंधकत्वकल्पनात् न पितरि जी
वति पुत्रस्वत्वमिति वाच्यं अनपेक्षिते पि द्रव्ये चौरादेर्वा पादिकस्वत्वस्वीकारात् भवतु
वा विजातीयस्वत्वे प्रत्येकस्वत्वस्य प्रतिबंधकत्वेन दोषविरहात्॥ मत्तगजेषु नद्गामी
हार्थो भवतीति बोधायनपदिष्टं पुरुषत्रयाणामेव जीवति स्वामिनि स्वामित्वे॥ न च जनु
त्रादिस्वत्वप्रयोजकं प्रयोजकं च यथेष्टविनियोगार्हत्वप्रयोजकं स्वामित्वं पितृस्वत्वोत्तर
र जायमानमिति वंद्यं तिंतदसत् अंतरा तादृशस्वत्वकल्पने प्रमाणाभावात् समः सर्वेषा
मित्यादिशास्त्रस्य चान्यथोपपत्तेः यथा समविभागः वाचनिकः स्वजनेन कुटुम्बपोषण
वत् यथा समविभागः वाचनिकः स्वत्वेन कुटुम्बपोषणवत् यथा॥ वालं व वासिनीव
द्धगर्भिण्यातुरकन्यकाः॥ संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनं इति वच
नेन परिणीतायित्वगेहास्थितादुहितृरूपस्ववासिनीपदार्थस्य विज्ञानेश्वरव्याख्या
नस्य धने स्वामित्वाभावेपि पोषणं याज्ञवल्क्येनाभिमतं भोजनभागग्रहणयोश्च स्वा
मित्वसाधकत्वे को विशेषः पितामहचरणादिभिरपि सति पितरि तद्धने पुत्रस्वत्वं नां
गीक्रियते अत्रोच्यते भजधातुरत्र प्रकरणे संबंधाधीनस्वामित्वं बोधयति तस्य विशे
षश्च न किंचित् द्रव्यनिष्ठत्वं यत् किंचित् व्यक्तिनिष्ठत्वं तथा च समः सर्वेषामिति व
चनैकः समः इत्याकांक्षायां विभज्यादिति श्रुतिस्थ विभजधातु उपस्थाप्य विभाग एव
विशेष्यो वाच्यः स च विभागः पुत्रेष्वेव भवति पिता चेत् पुत्रान् विभजेदित्यनेन पुत्राणा
मेव संबंधाधीनस्वत्वबोधनात्॥ एवं च पितृकृतविभागस्थले विभागेच्छया पितुः स्व
त्वे नष्टे सर्वेषां तुल्ये स्वामित्वे जायमाने अपरपुत्राणामंशस्यानुमत्या ज्येष्ठस्य भक्ता
दीनां चाधिके स्वामित्वं यदि च परस्वत्वासत्तिफलकत्यागरूपदानमेव करोति तदा उ
दासीनवत् सिद्धत्वे वस्त्वार्जितेपि तामहे पि स्थावरादौ धने परं तु पुत्रानुमतिं विनापि
तामहस्थावरदद्गतः पितुर्दुरदृष्टमेव भवतीत्येवत्वं यद्यान्यूनाधिकविभक्तानां धर्म्याः
पितृकृतः स्मृतः इति याज्ञवल्क्यवचनात् पित्रिच्छया अधिकेनांशेन भक्ता
दीनां संबंधाधीनमेव स्वत्वं भवतीति ध्येयं॥ तथा च पितृकृतविभागस्थले व्याधित
कुपितान्यः॥ पित्रिच्छा पुत्रत्वादिसंबंधश्चोभयमेव स्वत्वजनकमिति भावः॥ यत्तु तस्मा राम:

तस्यैतत्केवैतामहे चद्रव्ये जन्मनैव स्वत्वं तथापितुरावश्यकेषु वाचनिकेषु प्रसादस्त्वा
नकुटुम्बभरणापद्विमोक्षादिषु च स्थावरादिव्यतिरिक्तद्रव्यविनियोगे स्वातंत्र्यमिति
स्थितं स्थावरे तु स्वार्जितेपि त्वादिभाषेन व पुत्रादिपारतंत्र्यं ॥ स्थावरं द्विपदं चैव यद्यपि स्व
यमर्जितं ॥ असंभूय सुतान् सर्वान्न दानं न च विक्रयः ॥ इति मनुवचनात् अस्वा
म्यं हि भवेदेषां निर्दोषे पितरि स्थिते ॥ इति देवलवचनविरोधात् ॥ ननु यदि तु पिता
महः स्वतः पितृकपौत्रान् विभजते तत्र यदि पौत्रस्यैकस्यचित् अक्षमत्वादिना स्वांश
योग्या दधिकं भागं दद्यात्तत्र किं स्यादितिचेत् ॥ तुल्ययुक्त्या तदपि न्यूनाधिकदानं
सिद्ध्यत्येव एवं कश्चिच्चेत् पौत्रः पितरं पितामहं वा दुष्टिपतितादिवीतरागं तस्यैव निरंश
त्वेन तु तद्भ्रात्रादेरपि त्रनहिस्तरेणावक्ष्यते अथ पिता चेत् पुत्रान् विभजेदिति विष्णुस्मृ
त्रैपुत्रादेस्वकृतायविभागबोधकत्वात् च पुत्राणामिव विभागदर्शनात् कथं पितामहे
न पौत्रा विभजनीयाः इत्यत्र ॥ याज्ञवल्क्यः ॥ अनेकपितृकाणान्तु पितृतो भागकल्प
नाः अनेकाः पितरो येषां पौत्राणां तेषां स्वपितृतो भागकल्पना सापि तृयोग्यांशस्यैव
सर्वेषां पौत्राणामधिकारित्वेन यावन्मूलधनिनः पुत्रयोवंतः तावन्त एवांशान् कृत्वान
तनयपुत्रेभ्यो दद्यात् तेन तानंशान् लब्ध्वा सहोदरवैमात्रेयाः सह वसेयुः पुनः स्वभ्रा
तृसंख्यया विभजेयुरिति भावः ॥ इयं वाचनिकी व्यवस्था इति मिताक्षराः ॥ अन्ये
तद्वचनं प्रमीतपितृकभ्रातृभागविषयं यथा स्वापितृकृतविभागानंतरं प्रमीतपि
तृकविभागं लिखित्वा ततः शेषमेव भया याज्ञवल्क्येन लिखनादिति चेन्न एतदनंतरं भू
र्यापितामहोपात्ता इत्यादिना पितृकृतविभागधर्मस्यापि कथनात् अत एव ॥ भ्रातॄणा
मविभक्तानां यद्युत्थानं भवेत् सह ॥ इति मनुवाक्यसमानविषयकं तस्मादेतद्वचनं
उभयोपक्रमत्वात् उभयपरं यदि कुर्यात् समानांशान् इत्यादिकं तु पितृकृतविभाग
मात्रविषयकमिति तदनंतरमेव लिखितं ॥ कात्यायनः ॥ अविभक्तेऽनुजे प्रेते तत्सुतं रिक्
थभागिनं ॥ कुर्वीत जीवनं येन लब्धं नैव पितामहात् ॥ लभेतांशं स पित्र्यं तु पितृव्या
त्तस्यैव वा सुतात् ॥ सएवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत् ॥ लभेत तत्सुतो वाथ नि
वृत्तिपरतो भवेत् ॥ अत्र मिश्राः ॥ अविभक्तेऽनुजे प्रेते इत्यत्र अविभक्ते निजे प्रेते इ
ति पठंति व्याचक्षते च निजे भ्रातरीति शेष इति ॥ तत्सुतं जीवने भागः कीदृशं भाग
भ्रातृजो लभेत इत्यत्राह पित्र्यमिति ॥ तत्सुतः यस्य धनं विभजते तस्य प्रपौत्रः ते
न गृहीतो धनं पुत्रसंख्यया विभजनीयं त्वेन पुत्रस्य यो भागः स तेन तत्पुत्रेणवाप्ता
प्यः ॥ निवृत्तिरिति न तु तत्प्रपौत्रैरित्यर्थः ॥ इदं सहवासपरं इत्यत्र अत्र निजे

श्लोकः २२

भागप्राह्हिणिपुत्रे भ्रातरिवाइत्येव वक्तुं अन्यथापितृकृतविभागस्थलीयंन

स्यात्‌न चैतदुक्तवचनंपितृकृतविभागस्थलीयंनइतितस्याभीष्टंनवाभ्रातरी

तिपदयुक्तं वचनमिति॥ अविभक्तो इत्यस्य विभागाभाववतिइत्येवार्थः॥ ननुएव

दासीनाः किं अविभक्ता इति नच्चवा यतेइ तिचेन्नविभागयोग्यत्वस्य प्रयोगापा

धित्वात्‌ धेनुपदपंकजपदयोगपद्मवत्‌विभागयोग्यत्वं चमूलधनिपुत्रत्वाघ

न्यतमसम्बन्धवत्वं अपुत्रदौहित्रस्यापिमातृत्वसेयस्यापिभक्तत्वान्येष्यतएवभिन्न

वंशकरत्वात्‌ अथवाएव धनस्वामित्वमेवाविभक्तत्वं अन्यत्र अत्रतुयोगार्थएवादर

णीयः पुत्रइतिविशेष्यरोवउदासीनव्यावृत्तिः एवंचपिताविभक्तत्वेपुत्रस्यसिध्य

ति॥ जीवनंयेनेति अन्यथायत्रमूलधनीपुत्रान्पौत्रांश्चविभज्यविभज्यस्थितपुत्रै

: संसृष्टीभूयएकपाकेन वसति चिरकालोत्तरं पुनर्विभागापस्थितिस्तत्र प्रथम

विभा[illegible]गइववनस्तुभागेपितत्पौत्रस्यांशोदयः स्यात्‌ अ

विभक्तेसुतेपुत्रइति रत्नाकरधृतपाठकल्पेएतदंतेनपितृकृतविभागमुक्त्वा

भ्रातृकृतविभागस्यलमाह लभेतांशंसपित्र्यामितिलभेतनतुतोवापीतिभ्रतपि

तृकइतिशेषः चण्डेश्वरस्तु॥ यदाभ्रातृणांमध्येकश्चिदेकोविघतेतदानतस्

तस्यतुभागोनिवर्ततेइति लिखितवान्॥ जीमूतवाहनस्तुपितापितामहश्चैवत

थैवप्रपितामह॥ उपासतेसुतंजातंशकुन्ताइवपिप्पलं॥ मधुमांसैश्चशाकैश्चपय

सापायसेनवा। एषनोदास्यतिश्राद्धंवर्षासुचमघासुच॥ इतिदेवलवचने॥०॥ पु

त्रादीनांत्रयाणामेवमूलधनिनस्तुल्योपकारकत्वात्‌पुत्रादीनांत्रयाणामेवतुल्यो

ऽधिकारः ननुपुत्राभावेपौत्रस्यतदभावेपौत्रस्यइतिपत्यासत्तिक्रमेणनन्वेवंसति

जीवत्पितृकयोःपौत्रप्रपौत्रयोरधिकारः स्यादितिचेन्नतदानीतयोः पार्वणान

धिकारित्वेनउपकारकत्वाभावात्‌ अथयदिएकस्यपुत्रस्यत्रयः पुत्राः सन्ति

अपरश्चपुत्रः स्वयंवर्ततेतत्रतुल्योपकारत्वस्वीकारेणचत्वारएवांशाजायंता

मितिचेन्नस्वपित्रधीनजन्ममूलत्वाद्धनसम्बन्धस्य यावतिधनेतेषांस्वामित्वा

र्हत्वं तावत्येवपुत्राणांस्वामित्वंसंभवेनसर्वधनाद्धएवत्रयाणांस्वामित्वंअपरे

चार्द्धंततपितृव्यस्यइतिभ्रातृभागप्रकरणेप्राहतत्रेदंचिन्त्यंमत्रद्वौपुत्रौत

त्रैकस्यमृतपितृकःपौत्रोवर्ततेतत्रमृतपितृकधनिप्रपौत्रस्यकथंस्वपिताम

हस्वत्वेधनभागाधिकारित्वंनभवतीतिएवंप्रज्ञाजितस्यपुत्रस्यपुत्रोधिकारी राम:

माभूयादितिच॥ अत्रमृतपितृकप्रपौत्रस्यापिस्वपितामहमूलकधनाधि २४

श्लोक:२१

कारकत्वात् तद्योग्यधन एव तस्य स्वत्वं संभावितं पितामहस्य स्वेन प्रतिबध्येत इति
नाशंक्यं तदानीं पुत्रस्य स्वत्वं भवति न पौत्रस्य वा इत्यत्र विनिगमकाभावात् शास्त्रा
भावेन पुत्रस्य स्वत्वस्यैव वक्तव्यत्वेऽकल्पयितुमशक्यत्वादिति विभावनीयं ॥ अविभक्त
विभक्तानां कुल्यानां वसतां सह ॥ भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥ इति
देवलवचनमपि चित्कृतविभागपरतया व्याख्यायते यथा अविभक्तानां अज्ञातवि
भागानां विभक्तानां अतीतोत्पत्तिकविभागानां च संसृष्टीभूय सह वसतां आच
तुर्थान्मूलधनिप्रपौत्रपर्य्यन्तं दायविभागः भूयो दायविभागश्च मूलधनिजातसंता
नेन वा सह यथासंभवं स्यादित्यर्थः ॥ अविभक्तानां दायविभागे भूय इति न संबध्यते
संभवव्यभिचारे हि विशेषणमनर्थकमिति न्यायादिति ॥ तथा ॥१०॥ तावत्कुल्याः स
पिण्डाः स्युः पिण्डभेदस्त्वनन्तरं ॥ सममिच्छन्ति पिण्डानां दायार्थस्य विभाजनं ॥ ता
वत्चतुर्थपुरुषपर्य्यन्तं कुल्याः कुलसंभवाः सपिण्डाः स्युः [illegible] एक [illegible] पिण्डदाता
अपरे त्रयः पिण्डभोक्तारः अत एव चतुर्णां पुरुषाणां परस्परं पिण्डदातृत्वभोक्तृत्वान्य
तरसम्बंध इति भावः ॥ एतच्च दायसापिण्ड्यं अशौचसापिण्ड्यं तु पिण्डलेपभुजामपि स
प्तमपुरुषपर्य्यन्तं तत्तत्प्रकरणे एव विवेचनीयं किमत्राप्रक्रांतविवेचनेनेति ॥ पिण्ड
भेद इति अनन्तरं चतुर्थपुरुषानन्तरं पिण्डभेदः तेषां पिण्डदातृत्वभोक्तृत्वान्यतरसम्ब
न्धाभावादित्यर्थः ॥ सममिच्छन्तीति पिण्डानां दानेन दायार्थस्य विभाजनं समानमिच्छ
न्ति ऋषय तथा च पार्वणपिण्डदातारो दायार्थभागी भवन्तीति भावः ॥ चण्डेश्वरस्तु ॥ एतच्च
यदा सविषयो विभागं विना असृज्यमानोऽपरेण तदुद्देशेति नैवमनुज्ञायमानस्तदा इत्याह ॥
अत्रेदमवधेयं ॥ यदा त्वपुत्रो विभक्तोऽमृतः कियद्धनं च साधारणमस्ति तत्रापि विभागका
लेऽविभक्तधनस्यांशः मृतस्य पुत्रा यदा न स्युरिति ॥ याज्ञवल्क्यः ॥ यदि कुर्यात् समानांशा
न्पत्न्यः कार्य्याः समांशिकाः ॥ न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥ यदि स्वे
च्छया पुत्रान् समानांशान् कुर्यात् तदा पत्न्योऽपि पुत्रतुल्याः समांशिकाः कार्या इति
दीपकलिका ॥ अत्र पत्न्योऽपुत्रा इति हलायुधः ॥ जीमूतवाहनोऽप्येवं ॥ तथा हि ॥ व्या
सः ॥ असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः ॥ पितामह्यश्च सर्वा मातृतुल्याः प्र
कीर्त्तिताः ॥ पितुरिति कर्त्तरि षष्ठी भागकरणे इति पूरणीयं तथा च पितुर्विभागकरणे असु
ताः पत्न्यः समानांशाः प्रकीर्त्तिता इति तन्मते एवमेव स्मार्त्तोद्यः ॥ न च पितुः पत्न्यः इत्य
तेनान्वयः तथा च पितरि मृते पुत्रैर्विभागे क्रियमाणे अपुत्राः पितृपत्न्यो विमातरः समां
शा इत्यर्थः ॥ तथा च पुत्रकृतविभागविषयकमेव इदं वचनमिति वाच्यं पुत्रकृतवि

भागेऽपुत्रविमात्रे भागदाने शास्त्राभावात् नन्वेतदेव व्यासवचनं शास्त्रमिति वाच्यं ॥
अस्य पितृकृतविभागपरत्वेऽपि क्षतिविरहात् न चापि ऋनुवृत्तौ । तदभावे तु जननी तन
यांशसमांशिनी ॥ समांशामातरस्त्वेषां तुरीयांशा च कन्यकाः ॥ इति बृहस्पतिवचने ॥
जननीविमात्रोः स्पष्टाभिधानाय जननी विमाते [illegible] र इति पदद्वयघ
टितं बृहस्पतिवचनमेव शास्त्रमिति वाच्यं यतः मातर इत्यस्य साकांक्षत्वेन आदौ पुत्र
स्यैवोपस्थितिर्भवितुमर्हति तन्निक्रियाकर्तृत्वात् यथा मतरि भक्त्या प्रवर्त्तीते त्यादौ किं तु तद
दभावे तु जननी त्यनेनैव तदर्थस्य प्राप्तत्वात् मातर इत्यत्राकांक्षया प्रक्रांतस्यापि तुरेवोप
स्थितिः तथा च पितामह्य श्चैतेषां पौत्राणां समांशा इति पितामहस्य धनसर्वीत्वात् इति व्यासवचनै
कवाक्यत्वादिति भावः ॥ तथा च जीमूतवाहनः । स्मार्त्तश्रीकृष्णतर्कालंकारादीनां मतेऽपि
तत्कृतविभागे अपुत्रपत्न्यै पुत्रतुल्यांशो देयः ननु पुत्रवत्येतत्पुत्रो विभागयोग्य एव वक्तव्य इत्या
नुभाविकं पुत्रकृतविभागेषु अपुत्रायै विमात्रेंऽशो न देयः किं तु धनिनो अवश्यमर्भव्यत्वा
त् ग्रासाच्छादनमेवेति तत्रापि तत्कृतविभागे पुत्रवत्यै अपुत्रवत्यै पत्न्यै अंशदाने हलायुधदी
पकलिकाकारस्य इति ध्येयं ॥ चण्डेश्वरस्तु ॥ पुत्रैर्विभागकरणे अपुत्रविमात्रे भागो देयः
असुतास्तु पितुः पत्न्य इत्यत्र न शब्दोऽप्यर्थे तथा च असुताः सुताश्चेत्यर्थः इत्याह मिश्रोऽ
प्येवं शूलपाणिरपि ॥ तथा च पितुः पत्न्यः स्वस्व मानांशाः कार्याः अर्थात् पुत्रैरित्यर्थः इत्या
ह मनुः ॥ पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत् ॥ इति याज्ञवल्क्यैकवाक्यत्वात् पितुः पत्न्यः
इति जननीपरं बहुवचनं च नानात्वं च विवाहाभिप्रायेण ॥ न च याज्ञवल्क्यवचने मातृ
पदं मातृपरं विमातृपरं च वक्तुं शक्यते युगपत् शक्तिलक्षणाभ्यां वृत्त्या स्वीकारात्
इति शंकानिरासार्थमाह अपुत्रास्त्विति ॥ न च पितुर्भागकरणे इत्याकारको जीमूतवाहना
दिसम्मतोऽन्ययत्र वा बोध्यतामिति चेन्न ॥ स्पष्टस्तु विधेनीत्यैरूपसंहार इष्यते ॥ इति न्या
यात् तस्याभावात् सिद्धान्तिमुक्तेंऽप्यपुत्रा इत्यस्य पितुरित्युक्तेऽप्यपत्न्य इत्यत्रयोजयि
तुमनुचितत्वात् स्वकृतपितृकभ्रातृभागारम्भे एव वाच्यं तथा च पूर्वस्यार्द्धस्य पितृकर्तृकभाग
प्रकरणीयत्वे परार्द्धस्य मृतपितृकपुत्रकृतभागप्रकरणीयत्वे च वचनस्य उक्तं खलत्वापा
त्तेः मातृत्वाद् इत्यत्र मातृशब्देनापि ताम ही भागदानुभोगकर्त्तुः पुत्रस्यैवाकांक्षितत्वेन तत
न्मातुर्भागस्य च एतद्वचनेऽकथनेन समांशहारिणी माता पुत्राणां स्यान्मृते पतौ । इति
मनुस्यंतरवचनान्निषेधेन प्राप्यासाधिक्याच्च न च याज्ञवल्क्यविरोधः ॥ अन्याश्च मातर
तद्वत्तद्देहं न भजंति चेदित्याशी बहुशोऽविमानरि मातृपदस्य प्रयोगात् न च युगपद्वृ
त्तिः द्वयविरोधः पितृपत्नीत्वरूपेणाजहत्स्वार्थलक्षणया एकस्मात्र एव वक्तैरंगीका पत्र: २५

श्लोकः २४

रात्नकाकेभ्यो रुधिरस्नतामितिवर्त्तमानपाणिग्रहीपकलिकायां॥याज्ञवल्क्यवचनव्या
ख्याने व्यासवचनं समानार्थत्वेनोपन्यस्तं अत एव बृहस्पतिवचने प्रसवकर्त्र्येकत्वेन ए
कवचनांतं जननीपदं प्रयुक्तं विमातृणां बहुत्वसंभावात् तद्बोधकमातृपदं बहुवचनां
तमेव प्रयुक्तं तत्र च मातृपदं जहत्स्वार्थलक्षणया॥ सपत्नीमातृ मातृपरं मातृपदस्य
जननीमात्रपरत्वे न जननीमात्राधिकारशंकानिरासार्थं पूर्वोवाक्योपन्यासः व्यासव
चनेऽपुत्रा इति पदं वृत्तचण्डेश्वरेण बृहस्पतिवचनव्याख्याने जनन्यत्र पुत्रवतीमात
रः पितृपत्न्य इत्युक्तं वाचस्पतिमिश्रेण तदभावे पितुरभावे जननी पुत्रवतीमातरः सप
त्नीमातरः अपुत्राः पत्नी ताः सर्वाः पुत्रतुल्यभागा इत्यर्थः एषां भागिन्यं भगिन्यश्चाविवाहि
ताविवाहार्थं भ्रात्रंशचतुरीयांशभाज इत्युक्तं पुत्रतुल्यभागा इत्यत्र स्वरूपयोग्यत्वप
र्य्यन्तं निवेशनीयं यथा तत्पुत्रसत्त्वे तेषां यादृशोंऽशः तथा तस्या अपि तादृशोंऽश इ
ति तथा ब्राह्मणस्य संध्याक्षत्रियाभार्य्यासत्त्वे ब्राह्मण्याः पुत्राणां त्रयोंऽशाः क्षत्रियाया
स्तु द्वावंशौ इत्यादि तथा च॥ विष्णुः॥ मातरः पुत्रभागानुसारभागहारिण्योऽनूढाश्च दु
हितरः॥ इति विष्णुना तुल्यपदमपहाय अनुसारपददानेनैतत् स्पष्टीकृतं उक्तं चात्र जी
मूतवाहनेन पुत्रभागानुसारेण यथावर्णक्रमेण पुत्राणां चतुस्त्रिद्व्येकभागिता तथा पत्नी
नामपीति अन्यथा तत्पुत्राणां यथा यथांशः तस्या अपि तथा न येति द्विशि नेस्यात् वर्णक्र
मेण तुल्यद्व्येकभागिता इत्यस्य यादृशे न तत्प्रतिपादितं यथा ब्राह्मणस्य क्षत्रियः पुत्रः त्र्यं
शं हरेत् तथा क्षत्रियापत्नी चेति परत्वे तद्वचनं पितृकृतविभागस्थलीयमुक्तं चतुस्त्रि
द्व्येकभागितादिकं विवेचयिष्यते उपविष्टत् अनूढाश्च दुहितरः पुत्रभागानुसारभागहा
रिण्यो इति योजना तथा बृहस्पतिवचनैकवाक्यतया चतुर्थांश इत्यर्थः। पुत्रानुसा
रेणैतत् प्रतिपादितं यद्गुणीसंभृताया कुमारी तद्गुणपुत्रांशाच्चतुर्थांशं सा कुमारी गृह्णी
यादिति भावः॥ एवं च यदि कुर्य्यादित्यादि याज्ञवल्क्यवचने अपुत्रा इति विशेषणदानं दीप
कलिकाकारहलायुधादीनां निर्मूलमिव ज्ञायते विज्ञानेश्वरचण्डेश्वरवाचस्पतिमिश्रा
दिभिरपि तन्नोक्तं तथा च पितृकृतविभागसपुत्राये भागो न देयः एतत्तुल्यास्त्वपुत्रापितृ
कृतविभागस्थलेपि न येति दीपकलिकाकारमतं सयुक्तिमेवेत्याहुः न च चण्डेश्वरादि
मते॥ समांशहारिणी माता पुत्राणां स्यान्मृते पतौ॥ इति जीमूतवाहनधृतवचनेन मृते
पत्तावपि तस्य माता च पितरि मृते पुत्रतुल्यांशहारिणी॥ इति कात्यायनवचनेन च पित
रि मृते इत्यस्यैव यथ्यैपि तु जीवने मरणे च पुत्रवतीपुत्रशून्यानां पुत्रसमांशित्वकथनादि
ति वाच्यं पितरि जीवति पितुरिच्छया भक्षत्वाद्यपेक्षया न्यूनाधिकभागग्रहणं पितरिच्छेन

।श्लोकः २४

भर्त्तृकृत्वाद्विकमनपेक्ष्य समांशस्यैवं लाभात् हरणं एवं पितृकृतविभागस्थलेपत्नीनांपरस्पररंस
मांशित्वं पुत्रकृतविभागस्थलेतु पुत्रसमांशित्वमित्यादिरूपबहुविशेषात् तथाच
त्रमतयोर्वैलक्षण्यं यथाच एडेश्वरादीनांमतेपितृकृतविभागे पुत्रकृतविभागेचअ
पुत्रायाः सपुत्रायाश्चपितृपत्न्याः यथाशास्त्रंसमांशित्वं इतिजीमूतवाहनस्मार्त्ती
दीनांमतेपितृकृतविभागेऽपुत्रपत्न्येपुत्रकृतविभागस्थलेपुत्राणांजनन्यैपुत्रतुल्यांशो
देयः इतिसुधीभिर्विविच्यकरणीयंएतच्चस्त्रीधनाभावेतद्दानेनदत्तंस्त्रीधनंयासामितिशे
षाद्दत्तस्त्रीधनेदत्तेतेनसहसमांशपूरणंकर्त्तव्यं।२यथा॥ अधिविन्नस्त्रीयैदेयमा
धिवेदनिकंसमं॥नदत्तंस्त्रीधनंयासांदत्तेत्वर्द्धंप्रकल्पयेत्॥इतियाज्ञवल्क्यवचनात्
द्वितीयाविवाहार्थिनापूर्वपत्नीपरितोषार्थंयावद्धनंस्वीकृतंतदेवसमंअन्यूनानति
रिक्तंदेयंयदितुपूर्वंस्त्रीधनंप्राप्तमेतद्वचनैकवाक्यत्वात्भर्त्तृकुलात्तदर्द्धंन्यूनंदेयंस्व
कुललब्धस्त्रीधनेनपूरणंकर्त्तव्यमितिभावः एकत्रनिरूपितःशास्त्रार्थोबाधकंविनाऽ
न्यत्रापिप्रवर्त्ततेइतिन्यायात्स्त्रीधनेपूरणंकर्त्तव्यमितिभावः एकत्रनिरूपितःशास्त्रा
र्थोबाधकंविनाऽन्यत्रापिप्रवर्त्ततेइतिन्यायात्स्त्रीधनेदत्तेकिंस्यादित्याकांक्षासत्वा
च्च अत्रापितथाकल्प्यतेअर्द्धशब्दोऽत्रपुंलिंगःखण्डवाचकः नतुसमखण्डवाचकोन
पुंसकलिंगइति॥श्रीकृष्णतर्कालंकारस्तु॥द्वितीयायैपत्न्यैयावद्धनंदेयंतावद्धनंअ
धिविन्नस्त्रियैदेयमित्याह॥विज्ञानेश्वरस्तु॥ द्वितीयविवाहेयावान्व्ययोभवतितावा
नेवसमशब्दार्थः अनयोरभिप्रायस्तुप्रतिश्रुतेचयद्धनंदानयोग्यकामक्रोधादिविना
कृतंतत्सर्वमेवदेयंअतोर्द्धमानमयुक्तं॥ वाचायच्चप्रतिज्ञातेकर्म्मणानोपपादितं॥
ऋणंतद्धर्म्मसंयुक्तमिहलोकपरत्रच॥ इतिवचनात्नदद्यादृणवत्प्राप्यइतिवच
नाच्चस्त्रीधनप्रकरणेविवेचयिष्यतेअथसमांशिकाःकाःइत्युक्तंकस्यसमांशिकाइ
तिसन्देहे॥जीमूतवाहनस्मार्त्तौ॥पुत्रसमांशिकाइत्याहु॥ तथाहिपिताचपुत्रेभ्यःस
मविभागदानेसर्वपत्नीनामेवपुत्रसमांशताकर्त्तव्याइतिजीमूतवाहनेनलिखितं॥पि
तुर्विभागकरणेतुअपुत्रपत्न्यैपुत्रतुल्यांशमाहेतिस्मार्त्तोलिखितंचतयोर्वयोर्मिप्रायः
र्वैवचनेसर्वेस्युःसमांशिनः इतिएकपुत्रतुल्यांशवान्अपरपुत्रःइत्यर्थोपस्थितेर
त्रापिउपस्थितिलाघवेनतदन्वयएवयोग्यइतिएवंमृतेपितापरिपुत्राणांभागस्थले
पिप्राप्तस्त्रीधनायामातुःस्त्रीधनेनांशपूरणंएकत्रनिरूपितःइतिन्यायात्अत्रय
दिस्वेच्छयापितासर्वानेवसुतान्समांशिनःकरोतितदापत्न्याःपुत्रसमानांशाःकर्त्त
व्याः भर्त्राश्वशुरेणवास्त्रीधनंनदत्तंचेत्दत्तेतुस्त्रीधनेअर्द्धांशंवक्ष्यतेदत्तेत्वर्द्धंम



श्लोकाः २७

कल्पयेदिति यदा तु ज्येष्ठभागादिना ज्येष्ठादीन् विभाजयति तदा पत्न्यः श्रेष्ठादिभागान लभन्ते
किंतु द्वारान् समानेवांशान लभन्ते शेषान्पूर्ववच्ययाह ॥ आपस्तम्बः ॥ परीभाण्डं च गृहे ऽलं
कारो भार्य्याया इति मिताक्षरा ॥ केचित्तु समांशिकाः पत्न्यः परस्परं समांशिका इत्यर्थः य
दि कस्यैचित्स्त्रीधनं दत्तं न दत्तं आन्या अपि तन्न समानधवन्त्यः कार्य्याः तत्र किं पूर्वदत्तस्त्री
धनं तुल्यमेव देयं किंम्वा अधिकं पूर्वस्यै अन्याभ्यश्च अधिकतरं दद्यादिति विशेषस्तु कर्त्तुरिच्छा
नियतः स्वार्जितधने पैतामहेपि तथैव कल्पयिष्यते नियामकाभावादिति च एडे श्वर
वाचस्पत्यादिसम्मतः पन्थाः अत्रेदमवधेयं यदि तु कस्मैचित् अपि स्त्रीधनं न दत्तं तदा
पि समानांशकर्मेणास्तवीभ्यः एव धनं यासामित्यस्य विषयसत्वात् इत्यादुः नरेतेषां अभि
प्रायः पूर्ववचने समांशिन इत्यत्र एतद्वचने समांशा इत्यत्र परस्परमित्युक्तं विशेषस्तत्र
स्त्रीधनेन परस्परांशतुल्यकरणमिति अत्र जीमूतवाहनमतं ॥ साधीयः स्त्रीणां पुत्र
तुल्यत्वेन भागनिर्द्दिष्टकथनात् पुत्रकृतविभागे मातुः पुत्रतुल्यांशदर्शनाच्च अन्यमते
स्त्रीभ्यः कतिधना[illegible] निदातव्यानीति धार्म्मिकस्यानध्यवसायः इति ध्येयं भर्त्राश्वशु
रेणवेति आर्य्यश्वशुरश्च श्वशुरादेरुपलक्षणं तस्यायं भावः ॥ यदि पतिसम्बन्धमेकस्मा
च्छिन्नमात्तं तदा एव तेन पूरणं कर्त्तव्यं यदि स्वपित्रादेः पतिमातुलादेश्च प्राप्तं तदा तु तस्या
धिकलाभाभावात् तेन पूरणं न कर्त्तव्यमिति अनुभविकः पन्थाः पूरणं याज्ञवल्क्यस्य एतद्व
चनान्नावगम्यते तेन च न दत्तं स्त्रीधनं यासामित्यनेन सामान्यतः पर्य्युदासान् किंतु दत्ते
धर्द्धमिति पुंलिङ्गार्द्धशब्दघटितवचनादेव तथा च पूर्णांशदान एव प्राप्तस्त्रीधनायाः प
र्य्युदासो याज्ञवल्क्येन कृतन इति भावः यदि कुर्य्यादिति अत्र यदि पदप्रयोजनं मिश्रैरु
क्तं यदा तु स्वयमधिकं गृह्णाति पुत्रेभ्यः किंचिद्दाति द्व्यंशं वा गृह्णाति स्वभागादेव तावद्
नं पत्न्यास्ताभ्यो देयं अतएव यदि कुर्य्यात् समानांशानिति समांशाकरणे वैपृथग्दा
नमुक्तं तस्यायमभिप्रायः यदि समानांशान् कुर्य्यात्तदा समांशा एव कार्य्याः यदि समानां
शान्न करोति तदा तु अंशं न दद्यादेव किन्तु स्वगृहीतधनादेवरावं समांशतां च पुत्राणां
आत्मनश्चेति तत्र चिन्त्यं विभागं चेत् पिता कुर्य्यादित्यनेन कल्पत्रयमुक्तं तत्र सर्वे वा स्युः
समांशिन इति चरमकल्पाभिप्रायकत्वस्यैव युक्तत्वान्न चात्र पितापुत्रयोः समांशित्वं वा
च्यं ॥ स्वार्जिते पितुर्भूयिष्ठग्रहस्योक्तत्वात् पैतामहे च द्व्यंशित्वस्य वक्ष्यमाणत्वात् यद
पि क्षेत्रजपितुः पुत्रेण समांशित्वं जीमूतवाहनेनोक्तं न तु न सर्वे वा स्युः समांशिन इति याज्ञ
वल्क्यवचनाभिप्रेतं तथा सति सामान्यप्राप्तविभागं मुख्यमपहाय क्षेत्रयादि पितुर्भाग
कथनस्यानुचितत्वात् तथा च सर्वे पुत्राः समांशिनः इत्यवार्थः पितुर्द्व्यंशित्वे एकांशि

त्वं च स्मृत्यंतरवचनादेवावगंतव्यं किंच यदि स्वगृहीतधनादेव नावहुनं तद्यात् तदां

शमेव किं न दद्यात्॥ एवं द्यंशग्रहणपक्षे बहुपत्नीकस्य प्रयोनिर्द्धनत्वापत्तिरिति चण्डेश्व

रस्तु॥ यदि पुत्रान् समानांशान् कुर्यात् तदा पत्नीरपि समानांशाः कार्य्याः। एतच्चैपैताम

हधने सवर्णमात्रविवाहे स्वार्जितधने भक्त्याद्यपेक्षया वा विषमविभागं कुरुते तदा प

त्नीनामपि जात्यपेक्षया भक्त्याद्यपेक्षया वा विषमविभागं कुर्यादिति एतच्च प्रामाणिकं तथा

हि यदि ब्राह्मणीपुत्राः पंच एका च क्षत्रिया भार्य्या तत्र यत्र एकोचितपुत्र अक्षमाः पत्न्य

श्च सर्वाः न भक्ता नाप्यभक्तास्तत्र यत्र वा एतद्वैपरीत्यं तत्र च अनुभवात् पुत्राणां समांशाभा

वे पत्नीनाम्पीएणं समांशस्य पुत्राणां समांशेपि पत्नीनां विषमांशस्य दानमुचितत्वादिति॥

अत्रेदं विभावनीयं॥ यदि समानांशान् कुर्यात् स्वस्यांशद्वयं अंशमेकं वा पुत्राणां च त

त्समसंख्यकान् यथाशास्त्रं गुणानुरूपेण अधिकान् एव वा समानांशान् कुर्यात् यदि

तु स्वार्जितधने स्वयं भूयिष्ठं गृह्णाति तदा कन्याविवाहादिकं पत्नीभरणं च स्वधने नैव

साधयेत् तदुपयुक्तमेव भूयिष्ठं गृह्णीयादित्यर्थ इति वाचस्पतिमिश्रोपदेशितः पंथाः॥

अत्र पत्नीपदं ज्येष्ठापत्नीति वचनात् ज्येष्ठाशब्दार्थसवर्णा भार्य्यापरं सामान्यभार्य्यापर

मिति केनापि ग्रंथकारेण न लिखितं परं तु कलौ असवर्णाविवाहनिषेधात् इदानीं तद्वि

षयउपस्थितिर्नभवतीति न तन्मया स्वतो लिखितं मुनिभिर्ग्रंथकारैर्वा यद्यत् प्रक

रणं विवेचितं॥ ग्रंथार्थज्ञानाय क्वचित् क्वचित् किंचित् किंचित् वचनव्याख्यानाय च

तत्तत्प्रकरणमेवमेव विविच्यते॥ अथात्र पुत्रसमानांशः सपत्नीसमानांशो वा योग्य

स्थने पत्नीभिः सकेवलो भोगार्हस्तासां न तु स्वातंत्र्यं वा इति संदेहे केचिदाहुः पुत्राणांपि

त्वने पूर्वस्वामित्वाभावेपि विभागेपि स्वत्वनाशात् यथा पुत्राणां स्वातंत्र्यं तथा पत्नीनाम

पि युक्तं दम्पत्योर्मध्यगतं धनमिति वचनात् एवमपि स्वामित्वाच्चेति तथा च सति तद

नं भर्त्रनुमतिं विना दत्तमपि सिद्ध्यति एवं तस्या उपरमे तत्पुत्रस्यैव भवति न सपत्नीपुत्रस्य

ननु॥ पिता रक्षति कौमारे भर्त्ता रक्षति यौवने॥ पुत्रस्तु स्थाविरे भावे न स्त्री स्वातंत्र्यमर्ह

ति॥ इति वचनात् दम्पत्योर्मध्यगं धनमिति वचनाच्च सत्यपि भर्त्तुः स्वत्वे तद्धने पत्न्याः स्वा

मित्वे अस्वातंत्र्यं च अतएव तदानीमपि स्वांशयोग्यं दातुं विक्रेतुं वा नार्हतीति न च स्वामिपत्नी

विभागस्य अनंगीकारात् स्वांशयोग्यत्वमप्यसम्भवदुक्तिकमिति वाच्यं। जीवत् पितृ

कविभागे दंपत्योर्भोगस्य अनेनैव वचनेन दर्शनादेकमात्रं निरूपितत्वविरोधितस्वत्व

स्यैव विभागपदार्थत्वात् यदि तु पुत्रानुरोधेन विभागे क्रियमाणे एवं पत्न्या धनदानदर्श रामः

नात् अपुत्रस्य पत्नीविभागादर्शनाच्च तस्य विभागो नास्ति किंतु पुत्राणां विभागउपस्थि 29

तेसर्वधनानांव्ययकरणात् कुत्रकिंभोक्तव्यंपत्नीतिरित्यपिदायाद्उपजीव्यमात्रंधनंदी
यतेतस्यदुर्द्धूसंख्यापुत्रसमांशानासपत्नीसमांशताचेतिउच्यतेतदात्तुतुनरांदानाध
नधिकारःभर्तैवतस्याःतद्धनानांचस्वामीएकत्रवसतिभिन्नस्थानेवातस्याउपरमेतमेत
द्धनंभर्तुस्तदुत्तराधिकारिणोवाभवतिस्वामित्वंचपूर्वदिदानीमपिभर्तुरनुमतव्यायार्थे
रक्षणाद्यर्थंचेतिचेन्नदंपत्योर्मध्यगतंधनमितिवचनेनस्वरमतःकृत्स्नपतिधनेप
त्नीस्वामित्वबोधितेएवंविभागानन्तरंतस्याश्चपतिनिरपेक्षस्वत्वेसिद्धेस्त्रीधनवदत्रापि
तयाकृतदानंसिद्धंबाधकाभावात्विभागबोधकयाज्ञवल्क्यवचनस्यउपजीव्यदानप
रत्वेप्रमाणाभावाच्चतथासतिपुत्राणामपितथात्वंकिंनस्यादितिअस्वातंत्र्यंचभर्तुरनुम
तिंविनादानन्नतादेपुण्यसिद्धिवारणार्थंपुरुषांतरसंसर्गयथेच्छगमनादिबाधार्थंचनन्वे
वंसतितस्याउपरमेतादृशनद्धनेसत्यपिसपत्नीपुत्रेगर्भजपुत्राभावेदुहितरे
वाधिकारःस्यादितिचेन्नदायादुर्द्धमाप्नुयुरितिवचनस्यविनिगमनाविरहेण
पत्नीसंक्रान्तपतिधनवत्संबंधप्रयुक्तपत्नीलब्धधनमात्रपरत्वात्पत्युनराधि
कारिणःएवसत्वबोधनात्एवंचपुत्रसपत्नीपुत्रयोंःतन्योःधिकारइष्यतएवम
चतथासतिस्त्रीधनस्यापितथात्वेनतद्विषयकाभृतापस्तुइतिवाच्यंयतःस्त्रीध
नेदाननिबंधनमेवस्वत्वंजन्मतेतत्रभर्तृस्वातंत्र्यमतिबंधकसंम्बंधिदानप्रयुक्तंस्व
त्वंनतुसंबंधादेवस्वत्वंजायतेनचअपुत्रधानाधिकारःविषयमेवदायादुर्द्धमा
प्नुयुरितिवाच्यंतादृशार्थकल्पनेप्रमाणाभावात्तद्वचनस्यापुत्रधनप्रकरणी
यत्वेपिसौदृष्टिकन्यायेननतत्सिद्धेःप्रत्युतत्वाच्चनचपत्नीभागस्यदत्तःप्राय
त्वात्स्त्रीधनतुल्यतैवयुक्तेतिवाच्यंअत्रसंबंधप्रयुक्तलाभेनसम्बनतुल्यत्वसे
वायुक्तत्वादितिध्येयेजीवतभर्तृकृतलब्धनएवभार्य्यायाःसत्वात्पत्युर्मरणेपु
त्राणांविभागउपस्थितेअपुत्रायाःसपुत्रायाश्चमातुरधिकारःअतएवताभ्योंशदद्या
दितिचरणेश्वरादिमतं॥अतएवदुर्द्धपितुश्चमातुश्चइत्यादिवचनेमातृसत्वेपु
त्राणांधनसम्भवाविनाभागकथनेनविभागानधिकारउक्तःनन्वेवंसतिपत्य
नुमतिंविनापत्युरपिविभागाधिकाराभावेनतदानींपितृकृतविभागोनस्यादिति
चेन्नपतिस्वत्वप्रयोजकत्वेनपत्न्याःस्वत्वस्यतदपेक्षयाःप्रकृष्टत्वात्अतएवपिता
महधनविभागकरणेपितामहीनांभागभागितोक्तातत्रापुत्रपिंतामह्येअपिभा
गोदेयइतिनव्यानाममतं॥ननुप्रपितामहधनविभागेप्रपितामह्येअपिभागोदी
यतामितिचेदिष्टापत्तिर्युक्तितौल्यात्पितामह्यश्चेत्यत्रचकारास्यानुक्तसमुच्चया

र्थत्वाच्चयच्चपुत्राणां विभागं विनापत्न्यै भागो न देय इति शास्त्रतो लभ्यते इति तत्र
बीजं श्रुते: स्वतंत्रत्वं अन्यथा भवन्मते अस्वामित्वात् विशेषात् पुत्रमुद्दिश्य विभाग
: कर्त्तव्य: मनुमार्थ्यामित्यत्र युक्त्युपन्यासापत्ते: न च सर्वत्रैव श्रुते: स्वतंत्रत्वमंगीकर
णीयमिति वाच्यं युक्तिसत्वे तु तत्त्यागस्यानुचितत्वापत्ते: अतएव याज्ञवल्क्य: ॥ स्मृ
त्योर्विरोधे न्यायस्तु बलवान् व्यवहारत इति यत्तु पतिस्वनाशे तन्निस्वत्वप्रयुक्तपत्नी
स्वत्वमपि नश्यतीति वाच्यं न तत्र कस्यचिदाभास: प्रतिपत्त्वे विद्यमाने पत्नीस्वत्वकस्य
कदंपत्योर्मध्यगतं धनमिति शास्त्रवत् शास्त्राभावात् स्वत्वजनकव्यापारनीश
स्य स्वत्वनाशकत्वाच्च अन्यथा दानप्रतिग्रहयो । नाशे प्रतिग्रहीतुः स्वत्वना
शापत्ते: एवं च पत्न्यै मात्रे पितामह्यै प्रपितामह्यै च विभागकाले दत्तधनस्य दान
विक्रयादिकं सिध्यतीत्याहु: एतच्च न भवदेवामंगीकृतं यथा वस्तुतस्तु दंपत्यो
र्मध्यगतं धनमिति वचनात्तासां पतिधने स्वत्वमस्त्येव तत्र वचनबलात् पार्वणपि
ण्डदातृत्वेन पुत्रपौत्रप्रपौत्रस्वत्वे तेषां भागकरणमात्रत्वमात्रत्वात् भागो देयस्तेषा
मभावे तासामेव सर्वधनाधिकार इति सुधीभिर्ज्ञेय: इति तत्र द्विरवनमात्रसत्वेपि पि
तृधने मुख्यस्वत्वनिरूपकपितृमरणोत्तरं पुत्रस्य स्वत्वं मातुः स्वत्वस्यापकृष्ट
स्य न किंचित्स्वत्वं प्रतिप्रतिबंधकत्वं प्रतिबध्यत्वं वा अतएव पत्नीस्वत्वं भवतीत्यव
धेयं ॥ मिताक्षराकारोपि ॥ पत्न्या: कृत्यति धनेस्वामित्वं स्त्री करोति एवं तस्माद्भर्त्तु
रिच्छया भार्य्याया अपि विभागो भवत्येव न तु स्वेच्छया इत्यनेन पत्न्या विभागमंगी
करोति च न तु पजीव्यमात्रदानमुक्तं तेन परं तु पारिभाड्यं च गृहे संस्कारो भार्य्याया
इत्यापस्तम्बवचनानुसारेण उद्धारदाने च तस्या उक्तमिति अत: पत्न्या: स्वांशदानवि
क्रयादिकं सिद्धमेवेति परं तु स्त्रीणामस्वातंत्र्यात्तद्दानं दुरदृष्टजनकमिति सिद्धम
तं तत्र पितामहचरणानां ॥ सम्मतं यतो भार्य्याभ्य: मात्रादिभ्यश्चांशदानं स्वत्व
निबंधनमिति यदुक्तं तन्न सम्यक् तथा सति पूर्वपूर्वपुरुषक्रमागतं धने वृद्धप्रपि
तामह्यादिभ्योपि दानप्रसक्त्यापत्ते: अतश्चांशाभ्यस्ताभ्यो: शदाने कथंचिदिष्टा
पत्तावपि अपुत्रब्राह्मणस्य वैश्याभावासत्वेपि सहोदरस्यैव दायाधिकारितया
सहोदराणां विभागकरणे तस्या अप्यंशग्रहणापत्ते: ॥ तथा च सति केनचिद
पि ग्रंथकालेनाखिलतन्नूतनव्यवहारप्रवृत्त्यापत्ति: मुनिवचनान्नुपदेशात् एक
पुत्रजननीवत् अंशग्रहणस्वीकारे तु प्रपितामह्या अपि नांशभागिता युज्यते। रामः
यच्चोक्तं दंपत्योर्मध्यगतं धनमिति वचनात् शेषपतिधने भार्य्यायां गौणं स्वत्वं तरति २८

श्लोकाः २३

रिक्तस्वत्वत्वादिमतेयथातथास्तुनतन्निवेधनोविभागः किंतुदम्पत्योर्विभागः
पितापुत्रयोरिवसमाधेयः पुत्राणांविभागेचमात्रेणदानेअनंशस्याशेषपुत्रभा
गासिद्ध्यर्थस्वातंत्र्यार्थंचइति अत्रभार्यादितिलब्धांशेणयदिभोगेनक्षयंजातंतदा
पुनःपत्यादिभ्योजीवनंग्रहीतुमर्हतिअवश्यकर्तव्यत्वात्यदितुभोगावशिष्यतेपति
धनेचभोगेनक्षीणंभवतितदाभार्यानोपिपुत्रादिधनंग्रहीष्यान्तुल्यन्यायात्किं
तुभार्यादिभ्योदत्तोंशःपुत्रेभ्योदत्तइवतासांयथेष्टविनियोज्योभवतिअतएव
स्त्रीधनवत्दानविक्रयादिकमपिसिद्धंपत्यादिदत्तत्वाविशेषात्इत्युभयमतएव
वसाध्वीव्यवस्थापरन्तुप्रपितामहैवप्रपौत्रादिभिरंशदानेयुक्तिनीत्त्यैवधेयं॥
तथाचपितृकृतविभागेःपुत्रभार्याभ्यःस्वपुत्रतुल्योंशःदातव्यःपुत्राणांप्रपुत्रा
णांचविभागेतेजनन्येचस्वांशतुल्योंशोदा तव्यःकस्मैचित्भर्तृकुलजेनस्त्रीध
नेदत्तेतुतेनैवपूरणंकर्त्तव्यंप्रपितामह्येतुअंशोनदेयःइतिजीमूतवाहनादीनां
मतं॥श्रीकृष्णतर्कालंकारस्तु॥पितुर्विभागेःप्यंशंदद्यादित्यनुमन्यतेपतत्रयुक्ति
रनुसंधातुमुभिनानचसर्वाइतिपदवैयर्थ्यापत्तेदुर्वारत्वात्पश्चाहपितामहधनेए
वपितामहधनेएवपितामह्याअंशस्तत्रापिपितामहधनएवइतिनियमेपितामह्या
कगोणांस्वत्वनिवंधनत्वातिरिक्तांयुक्तिंनलक्षयामहेभार्यादिकृतदानविक्रयादिसि
द्धिंचमनसीकरोतिइतिसंक्षेपः॥चण्डेश्वरादीनां॥अपुत्राभ्यःस्वपुत्राभ्यश्चसर्वा
भ्योभार्यादिभ्योंशदानंइतिशेषः॥अपरेतुपत्नीभ्योयद्भागदानमुक्तंयाज्ञवल्क्येन
॥तन्नपत्नीविभागायजायापत्योर्विभागोनविद्यतेइतिआपस्तम्बेनतन्निषेधा
त्भिन्नधनेनभिन्नस्थानेसत्यावैदिककर्म्मणिसहकारित्वस्यानुभवविरुद्धत्वात
इत्याजीनेसहभावस्यापस्तम्बेनवोधानात्वि[illegible]भक्तयत्सुपार्जितधनेपत्नीस्व
त्वस्यानिवारयितुमशक्यत्वेनतयोविभागनिष्पत्तेरसंभवाच्चनहिदिनंअंशंग्रही
यात्पत्नीनवातद्दानीयतिधनेपिविभक्तप्रभुर्भवितुमर्हतिनवाविभागदिनावधिद
म्पत्योर्म्मध्ययागतंधनमितिवचनंमूकापितंतस्मात्पित्र्यधनेसमांशकरणपक्षेपत्नी
भरणस्यस्वांशमात्रेणासंभवात्पत्नीनामप्येकैकमंशंग्रहीयात् ताभिश्चधन
रतीभिःसहैकएवासतपुत्रैश्चसहतासांविभागएवजातःअतएवदंपत्योर्विवविभा
गाभावप्रसंगादितिजीमूतवाहनोक्तिः॥संगच्छतेतन्नचेजीमूतवाहनादिमतेप
रिकुर्यान्नसमानांशानुइत्यस्यविरोधःपैतामहधनेपितुर्द्ध्यंशित्वादितिचेन्नयतः
समानांशानित्यनेनांशानांपरस्परंसमानत्वमुक्तंतेनचपरिमाणस्यपरिच्छेदउक्तः

नतु संख्यायां तथाच पित्र्यांशद्वयभ्रा[illegible]त्रीयांशानां समानत्वमेव कथितं नतु पि
तापुत्रोभयतुल्यस्वामितावादिमतेभूर्यादित्यादिवक्ष्यमाणवचनवै[illegible]र्थ्यां उभ
यस्वामित्वमात्रपरत्वात् सर्वेवास्युसमांशिन इति वचनस्य च विभागतात्पर्यकत्वा
त् इति बहुतरनिबन्धकारविरुद्धायुक्तिमुनिवचनस्वलम्बादिमीनवीनपरविता
हुः अत्र यदि कस्यचित् त्रिभार्य्यस्तत्र एकस्याः द्वौ पुत्रौ अन्यस्याश्चत्वारः पुत्रास्तस्मि
न्मृते तत्र भ्रातॄणां सहोदरवैमात्रेयाणां यथोक्तो विभागः तन्मात्रोस्तु कीदृशो भा
गः अत्र चण्डेश्वरादयः॥ अष्टभागाः कर्त्तव्याः द्वौ भागौ मातृभ्यां द्वयोरपि तत्पत्नी
त्वाविशेषात् तत्रयादिकादन्यवर्णा भवति सास्वपुत्रस्य विद्यमानस्य स्वरूपयो॰
ग्यसवा अंशानुसारेणांशं गृह्णीयात् षट् च भ्रातरः षड्भागानित्याहुः दीपकलि
कीस्पतुसपुत्रायै मात्रे॰ प्रदानं न कर्त्तव्यमित्याशयो वगम्यते यतस्तेन विशेषमा
हृदन्यनेन असुतास्त्विति व्यासवचनं मुस्थापितं इति श्रीकृष्णतर्कालंकारस्तु॥ जी
मूतवाहनग्रंथटीकायां भक्तवान् द्वयोरेव सर्वजननीत्वाभावात् जननीमात्रस्यां
शहारित्ववादी जीमूतवाहनादीनां मतेनांशाधिका इति॥ अत्रेदमवधेयं॥
धनिपत्न्याः एकस्या विभागकर्तृजननीत्वादंशप्राप्तिः उत्कस्यचीरजननीत्वा
न्नांशप्राप्तिरितिविवारः तत्र जीमूतवाहनादीनां मतेपुत्राणां सकाशात् तत्स[illegible]
तोंशंहरेदिति स्थिते सपत्नीपुत्राणां सकाशादंशप्राप्तेरसंभावितत्वात् स्वपु
त्रसकाशादेवांशप्राप्तिनतथासति भ्रांत्वंतरेयेक्ष्यातद्भागस्य न्यूनत्वाप[illegible]त्तिरि
ति वाच्यं विभागकरणकालेमातृयुक्तस्यांशः द्विधास्थापनीयः तत्र एकोंशः पुत्र
स्यापरोंशः स्वखण्डः मातुः एवंरीत्यैव समभागसंभवात् यथाप्रकृतस्थले यदि स
सविंशतिसहस्रसुवर्णाधनंतदाद्विपुत्रापुत्रस्य सार्द्धचतुःसहस्रसुवर्णात्मक
भागस्य कर्त्तव्यं त्वेत्रिसहस्रसुवर्णा एकत्र सार्द्धसहस्रसुवर्णा अपरत्रस्थापनी
याः तत्र च द्वावंशखण्डौ एकस्यांशः एवमपरस्यापि एवं मातुरपि द्वावंशखण्डे
शइति समाधायदिपुत्रो जननंशं दातुं नेच्छति तदा जननीवलादपिहर्त्तुं शक्नोती
ति अन्यथाशास्त्रवैयर्थ्यात् तत्रापि दायार्थप्रयुक्तासमपदवैयर्थ्याच्चइतिजन
कस्यापि विरुद्धः पंथाः किंतु तदानीं मातुर्दयायैव तच्छ्वहरणाभावः अत्र केचित् जीव
त् पित्रैकविभागेपि नास्यपत्नीभ्यः सपुत्राभ्यो मर्म्भ्यागतं धनमित्यनेन मृतवि
भागस्यापि वैयर्थ्याकरणात् एवमपुत्रायैः पितुः पत्न्यै पितामह्यैव स्वांशतुल्यांश राम:
तुल्यांशो देयः पौत्राणां विभागकालेनतु सपुत्रायै असुतास्तुपितुः पत्न्य इति व्यास 28

वचनात् जननी च महागुरुः स्वशरीरसंपादिका सर्वस्वेन सर्वयत्नेन च पूजनीया इ
ति युज्य[ ]ते चैतत् जीवति भर्त्तरि न तु सहभावे नैव पत्नीनां स्वत्वानभ्युपगतत्वात्ता
सां जीवनाय वृद्धेन पित्रांशाः स्थापनीयाः स्वयं यथेष्टधनेऽग्रहणपक्षे तु न ह्येषा
नास्ति पितुरूर्द्ध्वं वि[ ]भागे च मातुः सर्वस्वाधिकारत्वात् स्वांशेनैव तज्जीवनेऽपु
त्राया विमातुस्तु भागाग्रहणं विना भिक्षालब्धमात्रभागित्वात् स्वांशेनैव तज्जीवनं
अपुत्राया विमातुस्तु भागाग्रहणं पितुः परत्वाद् इदानीन्तनजनानां विपरीतचेतसां
मातृपूजनमतिदुष्करमिति शिष्टैः किञ्चिद्दूनं काल्पनिकभागरूपं कुत्रचिद् दृश्य
ते तत्र च पत्नीप्रभृतीनां दृष्टार्थकदानस्वारसिकविक्रयादिकं न सिध्यतीति भो
गार्थं पुण्यार्थं च दानविक्रयादिकं कर्त्तुं युज्यते तदर्थमेवार्पितत्वात् इत्याहुः यत्र
च एकपुत्रकस्य च भार्य्या वर्त्तते एतत् ग्रासाच्छादनमेव अगत्यादानं तत्र यं तदानीं अंश
दानबोधकशास्त्राभावात् पुत्राणां विभागकरणे एव मातुर्विमातुर्वा अंशदानस्य
शास्त्रेणोक्तत्वादिति एवं पितृकृतविभागस्थले यदि पितुर्माता विद्यते तस्या अं
शः शास्त्रेणोक्तः पुत्राणां परस्परविभाग एव मातुरंशदानबोधनात् न च पौ
त्राणां विभागेऽपि पितामह्यै अंशदानबोधकशास्त्रेणैव न ह्यूह्यतामिति वाच्यं नायं हि
पौत्रकृतविभागः किन्तु तत्पुत्रकृत एव स्वपुत्रविभाग इत्यवधेयं ॥ पैतामहधने
पितापुत्रयोस्तुल्यस्वामित्ववादिनां मते पुत्रेच्छयापि विभागस्यानुमतत्वात् पि
तामह्यै अपि भागो देय इति विशेषः। पितृकृतपित्रर्ज्जितधनविभागप्रस्तावप्रसं
गात् पत्न्यंशदानादिकं विविच्य प्रकृतमभिधीयते पित्र[ ]र्ज्जितं पिता स्वेच्छया वि
भजेत् ज्येष्ठाय वा श्रेष्ठं भागं दद्यात् सर्वान् वा समांशान् कुर्य्यादिति कल्पत्रयं जीव
त्पितृकविभागपरमिति रत्नाकराभिप्रायः ॥ पैतामहधनविषयकं वचनं वक्
ष्यते इति नात्र यल्लक्ष्यते केचित्तु आद्यकल्पः पितार्ज्जितधनपरः तत्र इच्छया
एव नियामकत्वेन सर्वकल्पानां संभवात् तेन च कल्पेन पितुर्भूयिष्ठद्रव्यग्राहि
त्वं भक्तत्वाद्यपेक्षया पुत्राणां विषमविभागश्चोक्तः द्वितीयकल्पेन च ज्येष्ठायाधि
कांशदानं तृतीयकल्पश्च समानभक्त्यादिमत्पुत्रपरः पैतामहधनःपरश्चेत्या
हुः तत्र पितार्ज्जितं किमुच्यते पित्रा स्वपितृद्रव्यमनुपहत्य प्रतिग्रहादिना शस्त्र
धारणादिना कृषिवाणिज्यादिना सेवया द्यूतादिना यदर्ज्जितं एतत् प्रपंचितं अ
परमपि स्वार्ज्जितमाह ॥ वृहस्पतिः ॥ पैतामहं कृतं पित्रा स्वशक्त्या यदुपार्जितं ॥
विद्याशौर्य्यादिनाप्तं च तत्र स्वाम्यं पितुः स्मृतं ॥ प्रदानं स्वेच्छया कुर्य्याद् भागं चैव

श्लोकः २५

तोधनात्। तनभावेतुतनयाः समानांशाः प्रकीर्त्तिताः॥ पैतामहं कृतं द्रव्यं परैरितिशेषः
॥ अत्र च पितामहेनाशक्त्यानोद्धृतमिति चण्डेश्वरमिश्रौ॥ पिता चस्वशक्त्येवोपा
र्ज्जितमुद्धृतं तत्र पितुः साम्यं विद्याशौर्य्यादिनाप्राप्ते च धने पितुः स्वाम्यमित्यर्थः च
ण्डेश्वरादिमते पितृद्रव्योपश्लेषेण उद्धृते पैतामहवद्व्यवहार इत्युक्तौ साधु संगति
: स्यात् तन्मते चस्वशक्तेति सावधारणं बोध्यं अतएव पैतामहधनानुपश्लेषेणाभ्यु
द्धृते चेति॥ मिश्रास्त्वयः॥ ननु अत्र पितुः साम्यमित्युक्तं तत् किंपक्षानपक्तं पैताम
हद्रव्ये पितुः साम्यं नास्ति अ अथवा अस्ति किं तु न तावन्मात्रस्य परं तु अन्यस्यापि क
स्यचिदित्यपेक्षायामाह प्रदानमित्यादि तथा च तस्येच्छयैव प्रतिकूलावरोधेनिरंशित्वं
भक्तत्वाद्यपेक्षया धिकदानं स्वेच्छानियतकाले विभागः भूयिष्ठद्रव्यग्रहणादिकं च
परायक्तं तपित्र्यद्धृतं पैतामहद्रव्ये तु पितुः शास्त्रपारतंत्र्यमिति जीमूतवाहनादीनामम
ते विज्ञानेश्वरादीनां मते तु परानपक्तं पैतामहद्रव्ये पितापुत्रयोस्तुल्यं स्वामित्वं परा
क्तं तपित्र्यद्धृते तु॥ पितुरेवस्वाम्यमितिबोध्यं॥ मनुर्विष्णुः॥ पैतृकं तु पिताद्रव्यमनवाप्यं
यदाप्नुयात्॥ न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्ज्जितं॥ अनवाप्यमित्यनेनापचैरपकृ
तमित्याद्यातं एवं भूतं यत्पैतृकं द्रव्यं पिता श्रोभुयात् तत् पितुः स्वयमर्ज्जितं भाक्तं तत्
न अनिच्छन्पुत्रैर्विभजेदित्यर्थः॥ ननु यदि स्वयमुपार्ज्जितेर्थे स्वेच्छा तदा पैतामहे ऽ
स्मादृशी व्यवस्था विधेतेतदाह याज्ञवल्क्यः॥ भूर्य्या पितामहोपात्ता निबंधो द्रव्यमेव
वा॥ तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः॥ निबंध आकारेण द्वौरा जादिद
त्तं निलभ्यं द्रव्यं सुवर्णादि त्रेषु भूम्यादिष्वपि पितुः पुत्रस्य च तुल्यं स्वाम्यं अत्र पुत्रेच्छया
पि विभागोंऽशोपि समएव न दाहवद्ध्रस्वति॥ द्रव्ये पितामहे पात्रेस्थावरे जंगमे तथा
सममांशित्वमाख्यातं पितुः पुत्रस्य चैव हि॥ इति दीपकलिका॥ जंगमोऽत्रस्थावरभिन्नो
द्विपदसुवर्णादीति तदाशयः॥ भूर्य्येत्यादिवचनव्याख्याने रत्नाकरः॥ निबद्धे इति नि
बंधः आकरादौ नियतलभ्यं सदृशं स्वाम्यं नात्राशाधिकं न वा पितुरपीच्छया दानं॥ व्यासः
॥ क्रमागते गृहक्षेत्रे पितापुत्राः समांशिनः॥ पैतृकेन विभागार्हाः सुताः पितुरनिच्छतः
॥ इत्याह गृहक्षेत्र इत्युपलक्षणं पैतृके पित्रा स्वयमुपार्ज्जिते एतद्वचनस्वरसात् पितु
रनिच्छतो पि पैतामहधनविभागो भवतीति व्यज्यते मा च्छेो कीदृशी तद्दृश्यते जीमूतवा
हनादिमत विवेचनावसरे तथा च पितामहादिक्रमागत धने स्थावरे सुवर्णादौ च पुत्रस्य
इच्छया विभाग पितापुत्रयोस्तुल्यमेव कांशित्वमिति दीपकलिकाकारादीनां मतं लिंग
तन्त्रा॥ मणिनुक्तामवालानां सर्वस्यैव पिता प्रभुः॥ स्थावरस्य समस्तस्य न पिता न पितामहः

रामः
30

इतिजीमूतवाहनादिवचनेनपिताइत्यंतभागः पितुःस्वार्ज्जितविषयकः नपितामह इति
तुप्रपितामहादेरुपलक्षकंनचनपितामह इत्यस्यैवेयंप्पितामहादेरपिस्वपुत्रपि
तृत्वादितिवाच्यंपितामहेनजीवतामह्यंस्थावरंद्रव्यंइत्युक्तानन्तपौत्राणांसहविवा
द उपस्थितेतद्दानासिद्ध्यर्थमितिकेचित्।तद्दानासिद्धेर्वग्नेवक्ष्यमाणत्वात्‌न्यथाव्या
ख्येयमिदंवाक्यंयथापितामहेजीवतिपित्रायदुपार्ज्जितंतत्रयदुपार्ज्जितंतत्रभा
र्य्यापुत्रश्चेत्यादिवचनेनपितामहस्वात्वात्तत्र्यभुत्वमाशंक्येदमुक्तंपित्रर्ज्जितवि
षियकमित्यन्येस्थावरेपुत्रपारतंत्र्यमिवपौत्रादिपारतंत्र्यमपिभवतिइतिसूचना
यनपितामह इत्युक्तमित्यपरेषांतथाचेतन्मतेपितामहमणिमुक्तादौस्वार्ज्जिते
पिस्थावरेपितनीस्वाच्छन्द्यंअतएवस्थावरंद्विपंदंचैवयद्यपिस्वयमर्ज्जितं॥अ
संभूयसुतान्सर्वान्नदानंनचविक्रयः॥इत्यादिवचनंसाधुसंगच्छतेद्विपदंदा
सादिः एवंपितुःप्रसादाद्भुज्यंतेवस्त्राण्याभरणानिचस्थावरात्तुभुज्यतेप्र
सादेसतिपैतृके॥इत्यादिकमपिस्मार्त्तधृतवचनंसंगच्छतेननुवचमिदमेतन्मते
पैतामहधनगोचरंवानाद्यःपैतामहवस्त्राभरणादावपि।पितुरस्वाच्छन्द्यात्‌नद्वि
तीयःपैतामहधनस्यापिप्रसादाद्दानस्यशिष्टाचारसिद्धत्वादत्रोच्यतेपैतामहेतु
पितापुत्रयोस्तुल्यंस्वामित्वमित्यनेनसत्येवपितरितत्पितृधनेस्वामित्वमुक्तंतस्य
पूर्व्वमेवनिरस्तत्वात्परन्तुपितुरेवस्वत्वंतत्रचविभागवैलक्षण्याभावायतुल्यं
स्वामित्वमित्युक्तंतथाचस्वामिकृतंदानंनसिद्धंतत्स्वामिनोमत्तादिभिन्नत्वादि
तिएवंचनभनुरित्यनेनापिकारणंवनाविषमविभागनिवृत्तिरेवकृता॥एवंदानवि
क्रयकरणनिषेधश्च अधर्म्मज्ञापनार्थःनतुदानाद्यनिष्पत्तिःएतच्चजीमूतवाह
नेमतेव्यक्तिभविष्यतिप्रसादात्तवस्त्राभरणादिदानंचननिषिद्धंअथवावस्त्रंयच्चा
गयोजितमिति।पत्न्यौजीवतियःकश्चिदलंकारोधृतोभवेदितिवक्ष्यमाणवचनो
क्तत्ववत्‌अदत्तमपिभुक्तंवस्त्रालंकारादिकंभोक्तुरेवनतत्रपितुर्निषेधातिक्रमित्वं
तेनादत्तत्वात्स्थावरन्तुभुक्तंनसिध्यतीतिएवतदुक्तंपितुःप्रसादादित्यादिनातथा
चएतद्वचनंपैतृकपैतामहोभयधनपरमितिभावः॥अथास्वतंत्रस्तत्रगृहीतस्य
यत्स्यात्क्रमागतं इतिस्मार्त्तधृतवचनेनपैतामहधनेःस्वातंत्र्यात्।वाक्यमदा
स्वातंत्र्यात्तमत्तोरन्मत्तापवर्ज्जितमितिनवेदेनस्वातंत्र्यकृतदानसिद्धिकथनाच्च अ
त्रपित्राप्रसादादपिकृतंपैतामहधनदानंअसिद्धमस्तुयच्चोक्तंदानविक्रयंनिषेधश्च
अधर्मज्ञापनार्थःननुदानानिस्पत्तिरितितन्मतंनभुज्यतेइत्यनेनदानासिद्धेरेवयं

जनात् ॥ न हि स्वाम्यसिद्धौ भोगाभावः दृष्टो भवति अदृष्टकल्पनायां प्रमाणाभावः
नवानुभवविरोध इति निरस्तं द्वितीयकल्पेन अस्वतंत्रास्तत्र गृहीति वचनं च दृष्टा
प्रदानिके ऽन्यथा व्याख्यातं एवं च यः कश्चित् पिता शास्त्रमुल्लंघ्य कस्मैचित् पुत्राय अ
न्यस्मै वा स्वपैतृकं स्वार्जितं वा समस्तमर्द्धं वा स्थावरमन्यं तं तं ददाति तत् तद्दानं सिध्यत्ये
व दृष्टं कामक्रोधपक्षपातादिविमुक्तत्वे सत्येव परं तु शास्त्रोल्लंघनजन्यं दुरदृष्टं भवति
अधिकमग्रे जीमूतवाहनादिमते वक्ष्यते ॥ अत एव पुराणादिभ्यः श्रूयते कचिद्
श्यते कदाचित् तथा व्यवहारो नृपतेर्गुणज्येष्ठाय वयोज्येष्ठाय वा पुत्राय राज्यसमर्पणं
॥ यद्येकपुत्रस्यात् द्वौ भागावात्मनः कुर्यादिति शंखलिखितस्मृत्या तु एकपुत्रस्यापि
तुर्यांशित्वमित्येतत्परमेव ॥ द्व्यंशप्रतिपादकं विजत आत्मनः पिता द्व्यंशिति नार
दवचनं ॥ जी॰ द्विभागे तु पिता गृह्णीयादंशकद्वयं ॥ बृहस्पतिवचनमपीति एतत्
पर्य्यन्तः दीपकलिकादिमतपरिष्कारः ॥ अथ जीमूतवाहनादिमतं पैतामहे तु पि
ता तापुत्रयोस्तुल्यं स्वामित्वमित्यनेन यत्र जीवति पितरि एकः पुत्रो मृतो ऽनन्तरं पि
तामृतस्तत्र विभागसमये पौत्रैरपि स्वपितृसमानोंशो लब्धव्यः नत्वतिसन्निक
र्षात् धनिने यपिण्डद्वयदातृत्वाच्च पुत्रैरेव सर्वं लब्धव्यमिति प्रतिपादितं तत्र च पि
तामहपदं प्रपितामहपदं प्रपितामहस्यापि तेति च पितामहस्योपलक्षणं अन्वय
स्य शक्यार्थेन शक्यार्थेन शक्यार्थस्य लक्षणार्थेन लक्षणार्थस्य ज्ञेयः एतच्चाविभक्ते
ः मृते पुत्रे इत्यादिकात्यायनैकवाक्यत्वाल्लभ्यते अथवा ऽधारम्भ्वरपुरस्कृतो ऽर्थो
ऽवसेयः यथा स्वार्जिते भक्तत्वाद्यपेक्षया न्यूनाधिकविभागदानं नाधर्म्म पैतामहे
तु न तद्धर्म्यमेव इति पैतामहधने पि न्यूनाधिकविभागदानेन पुनर्विभागः किं तु पितु
रधर्म्य एव यदुक्तं जीमूतवाहनेन न्यूनाधिकविभागः पितृकृतपितृधन एवायं धर्म्य
इति तथा च पितृधने प्रभुत्वात् कृतो न्यूनाधिकविभागो धर्म्यः पैतामहे तु अधर्म्य इ
ति न दाशयोः वगम्यते पैतामहधने ऽस्वातंत्र्यबोधकवचनानां सामान्यतः स्थावरजं
गमधनविषयकत्वे बाधकं विशेषमाह ॥ इति याज्ञवल्क्यः ॥ भूर्या पितामहोपात्तेत्या
दि तथा च पैतामहे पि मणिमुक्तादौ पितुः प्रभुत्वात् न्यूनाधिकदाने पि न क्षतिः तान्नि
षेधश्च भूम्यादाविव अत्र च द्रव्यं द्विपदं दासादि भूसाहचर्यात् स्थावरं द्विपदं चेत्यादि
प्रागुक्तवचने भूम्यादिरूपस्थावरस्य द्विपदस्य चोपादानादिति स्मार्ताः ॥ ० ॥ एवं च क्र
मागते गृहक्षेत्रे इत्यादिव्यासवचने पि गृहक्षेत्रपदं स्थावरवन्निबन्धद्विपदानां स राम:
र्वेषामुपलक्षणं द्रव्ये पितामहोपात्ते इत्यादिबृहस्पतिवचने पि जंगमपदं द्विपद ३१

परमित्येवज्ञेयं एतच्चस्पष्टमाह वचनान्तरं ॥ मणिमुक्ताप्रवालानामित्यादि अत्रपि
तामहइतिश्रुतेस्तद्दनविषयमेतदिति जीमूतवाहनः ॥ अत्र च सर्वस्येति समस्त
स्येतिपदद्वयश्रवणात् पैतामहस्यमण्यादेः सर्वस्यैव दानंनाधर्म्मं स्थावरस्य तु स
र्वस्यदानमधर्म्म्यं अत्र च स्वार्जितेपिस्थावरे स्थावरे स्थावरं द्विपदं चेत्यादिवचनात्
दानादिकमधर्म्म्यमित्यपिवक्तुं युक्तं न तु तर्हि पित्र्ये पैतामहस्थावरयोः को विशेषः इ
ति चेत् भक्तत्वाद्यपेक्षया विषमविभागस्य दानादानेभ्यो मित्यवेहि अत्र च समस्तस्था
वरदाने कुटुम्बभरणाभावएवाधर्मबीजं न तु दानाद्यनिष्पत्तिः अनुमत्यादिस्वामि
कृतत्वात् कुटुम्बभरणस्यावश्यकत्वमाह ॥ मनुः ॥ भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसा
धनं ॥ नरकं पीडने चास्य तस्माद्यत्नेन तं भवेत् ॥ इति प्रसंगादधिकमुच्यते ॥ स्याव
रस्य समस्तस्य गोत्रसाधारणस्य च ॥ नैकः कुर्यात् क्रयं दानं परस्प रमतं विना ॥
विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः ॥ एकोह्यनीशः सर्वत्र दानाधमनविक्रये
॥ इति जीमूतवाहनकृतवचनद्वयमपि अधर्म्मज्ञापनार्थं न तु विक्रयाद्यनिष्पत्त्यर्थं
तत्र सर्वस्यैवानिर्णीतस्वत्ववत्त्वात् वचनार्थश्च हि हेतौ यतः सर्वधनदानादेरेको
ऽनीशः ॥ अतएव विक्रयादिकं न कुर्यात् अत एव विभक्ता वा सर्वे समाने पां परस्प
र न्यूनाधिकस्वं इत्यर्थः विभक्ता इति तु यत् किंचित् स्थावरं मध्यगमासीत्तद्विषय
कं एतन्मते च स्थावर इति किमर्थमिति न निश्चिन्मः ॥ अत्रेदं चि[illegible]न्त्यं प्रादेशिक
स्वत्ववादिनो जीमूतवाहनस्य भवतु इत्यकारिकायाः स्वत्वनाशकत्वाकल्पने
पि न क्षतिः किंतु दत्ताः प्रदानिके विवादपदे नारदेनादत्तप्रकरणे गणयित्वा अदे
यप्रकरणएव साधारणद्रव्यस्य गणनस्वरसादेन दुत्तमिति तथा च विभागादिना
निर्णीतस्वत्वाभावस्य साधारणस्वत्वकस्य असाधारणस्वत्वकस्य वा धनस्य एके
न कृतं दानादिकं अन्येषामननुमतौ तस्यैव स्वत्वं नाशयति अनुमतौ तु सर्वेषां न च
पुण्यभागित्वं स्वत्वभागित्वादिकं च सर्वेषामेव अननुमतौ अधर्म्मभागित्वन्तु कर्त्तुरे
व अपचयभागित्वन्तु सर्वेषामिति सिद्धान्तः किंतु अदेयदानेन तस्य दण्डो भवतीत्यनु
भवः ॥ अथ स्मार्त्तः ॥ पितुः प्रसादाद्भुज्यन्ते वस्त्राण्याभरणानि च इत्यादि पैतामहधन
गोचरमेतत् पित्रा तु स्वोपार्ज्जितं दत्तं भुज्यत एव अन्यथा मूलभूतश्रुत्यं नरक
स्यनापत्तेः इत्याह ननु इदानीं कुटुम्बवचनोपपत्तिः न च पितामहः स्थावरं न दद्यादि
ति श्रुत्या स्थावरस्य समस्तस्य न पिता न पितामह इति वचनकाल्पितया उपपत्तिरिति
वाच्यं स्थावरं द्विपदं चैवेत्यादिवचनेन स्वार्जितस्थावरदाने निषेधकश्रुतेरपिक

स्यनीयत्वात् स्थावरं तु न भुज्येत इत्यनेन दानासिद्धिबोधनेन पैतामहस्थावरदा
ननिषेधकं तत् श्रुत्यैकवाक्यत्वं संभवातीति अत्र उच्यते स्मार्त्तग्रन्थेन तन्पूर्वरत
स्थविभागविवेचनात् वचनमेतत् विभागविषयकमिति स्मार्त्तमतं ॥ तथा च पितुः
प्रसादान् भ● क्तव्वहुपोष्यत्वाक्षमत्वनिबंधनप्रसादात् पैतामहं स्थावरं विभा
गरूपेण दत्तं भुज्यते ॥ पितापुत्रयोस्तुल्यं स्वामित्वमित्यैकवाक्यत्वात् पैतामहम
ण्यादिकं तु नादृशं द● त्तं भुज्यते ॥ मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुरित्येकवा
क्यत्वादिति ॥ केचित्तु ॥ पैतामहास्थावरातिरिक्ते धने पितुः स्वाच्छन्द्यात् दानविक्रया
दिसिद्धिरभ्यनुज्ञैव न तु पैतामहस्थावरे इति पितुः प्रसादादिति वचनस्य तात्पर्या
र्थमुक्तमुत्प्रस्याम इति तन्न स्वेच्छया स्वयमुपात्तेर्थे इति विशेषकस्वेच्छयाउद्दा
मरूपायाद्युक्तिनियंत्रणानर्हत्वात् किं तु नारदवचनं पितामहादिधनपरं इत्युप
क्रम्य पितुः प्रसादादित्यादिवचनं पितामहादिधनगोचरमिति लिखनस्य दत्ताप्रदा
निकपरत्वे संदर्भविरोधापत्तेः यथेष्टविनियोगार्हत्वरूपस्वत्वद्रव्यांतरइवात्राप्य
विशेषादिति वक्ष्यमाणलिखनविरोधापत्तेश्च तथा हि यद्यन्नदत्तास्पदं तत्तेन द
त्तेन दत्तं सिद्ध्यतीति नियमादेव पंचमी संगतिः स च नियमोऽवभज्य तेस्वत्वास्पदीभू
ते पैतामहधने दानासिद्धिः न च ● मत्तादिकृतदानमात्रव्यत्तथेनावरोक्तपोऽप्यन्य
त्वनिवेशावश्यकत्वेन अत्रापि न नियमभंगः अस्वतंत्रस्तत्र गृहीत्यनेन अत्रापि षो
डशांतभीवादिति वाच्यं तथा सति पैतामहमण्यादावपि अस्वातंत्र्यप्रसंगात् न च ता
स्वातंत्र्यस्तत्र गृहीति वचनं मणिमुक्तेत्यादिवचनैकवाक्यत्वात् मण्यादीपरत्वं वा
च्यं संकोचे प्रमाणाभावात् अस्वतंत्रस्तत्र गृहीति वचनस्यान्यथोपपत्तेर्दत्ताप्र
दानिके उक्तत्वात् अत एव पैतामहे तु पितापुत्रयोस्तुल्यं स्वामित्वं अन्यथा व्याख्या
तवानयं मिताक्षराकारोपि ॥ नात्र दानासिद्धिमाह किं तु पितामहस्य स्वार्ज्जितमपि
पुत्रे पौत्रे च सत्यदेयं इत्याह दत्ताप्रदानिके च षोडशाद त्ताएव दानासिद्धिं स्पष्टमा
ह तथा भूर्यैतिवचनव्याख्याने पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति पुत्राणां
निषेधाधिकारोऽस्तीति विशेष इत्याह एवं ॥ चण्डेश्वरादिकोपि क्रमागतधनदाना
सिद्धिं स्पष्टाक्षरेण नालिखितवान् स्मार्त्तसंप्रदायं तु जीमूतवाहनः ॥ मणिमु
क्तेत्यादिवचनं दाननिषेधमाह इति विभावनीयं अथ पैतामहधनविभावकस्वेच्छा
प्रवर्त्तिका ॥ अत्रोच्यते ॥ पितुरिच्छयैव विभागदानेन तस्य धनस्वामित्वात् तथा च वि
ष्णुवचने स्वच्छयापदं न्यूनाधिकविभागविषयकेच्छापरं न तु विभागो भवत्विति

श्लोकः 37

च्छापरं॥एवंचतुल्यंस्वामित्वमित्यपित्यनेनतदिच्छायाएवव्यावर्त्तनंकृतंनतुविभा
गेच्छायाः एवंपैतृकन्त्वित्यादिनामनुवचनेपिविषमविभागविषयेच्छायाअभावएव
वबोध्यः क्रमायातेइत्यादिव्यासवचनेपिअनिच्छन्तइत्यत्रापितथेतितपितुरनुम
त्याभ्दागभागइतिजीवतिपितरिरिक्थविभागोनुमतेतिजीवतिचेच्छतीत्यादिवच
नेषुपित्र्यपैतामहधनयोर्विशेषानभिधानमत्रबीजंअत्रेदंचिंत्यतेदिक्ष्वादिवचने
कीदृशीच्छाविवक्षितइत्यत्रविनिगमकाभावः इति॥एवंनाकामोविभजेदितिस्वे
च्छयास्वयमुक्तेइतिपितुरनिच्छितइत्यादेइच्छायांविभागविषयकत्वमेवालंवंने
उपस्थितत्वेनसान्निध्यात् एवंस्वामिनइच्छयैवविभागइत्यत्रापिप्रमाणताभावः अ
णशोधनस्यलेशाज्ञोगृह्णीतुर्वेच्छयादानदर्शनात्॥नचतथासतिउदासीनेच्छया
पिविभागोदानंवाभवत्वितिवाच्यंधनधनिनोरुदासीनपरतंत्रत्वाभावात्अतए
वक्रेतुरिच्छयाविक्रयानभवतिननुतर्हिअत्रापिकर्थीपितुःपैतामहधनस्यवापुत्र
परतंत्रत्वमितिचेदेतदर्थमेवस्वामित्वाबोध्यइतितथाचयथागंगापांयोषइ
त्यादौगंगाभिन्नेगंगातीरेगांगहारोपात्गंगागतशैत्यपावनत्वादिकंलभ्यतेतथा
अस्वामिनिपुत्रेस्वामित्वारोपात्स्वामिगतधर्म्मएवलभ्यव्यःसर्वधर्म्मविभागेस्व
तंत्रत्वंजीमूतवाहनादिमतसिद्धंविषमविभागनिवर्त्तकत्वंचविनिगमनाविरहा
त्नतुपितृतुल्यांशग्राहित्वंजीमूतवाहनेनतथाऽनंगीकारादिसर्वंयथायोग्यंच
एडेश्वरादिमतजीवनंपरंतुचएडेश्वरादिमतेपैतामहधनेपुत्रस्यस्वामित्वमेवास्ती
तिविशेषः॥इतिध्येयं॥अथैतन्मतेपैतामहधनेपुत्रस्यापितुःकीदृशोंशः अत्रनार
दः॥द्वावंशौप्रतिपाद्येतविभजन्नात्मनःपिता॥विभजन्पिताआत्मनः आत्मसम्ब
न्धिनौद्वावंशौकुर्य्यादित्यर्थः॥एतद्वचनंपितुःस्वार्जितेधनेन्यूयिष्ठमाददायवसेदि
तिवचनेनकवलीकृतेऽवलंम्वनमलभमानंपैतामहधनमेवावलम्वयतीतिव्रह
स्पतिः॥जीवद्विभागेतुपितागृह्णीयादिशकद्वयं॥इतियद्येकपुत्रःस्यात्द्वावंशौ
गृह्णीयादितिशंखलिखितवचनमपितद्विषयमेककल्पनीयंतत्रचएकस्यपुत्रः
एकपुत्रइतिनतपुरुषबहुव्रीह्योस्ययेस्यानतपुरुषस्योत्तरपदस्यपुंस्त्वेनोत्कृ
ष्टत्वात्एतेनत्विपितृकस्यव्यावृत्तिःद्विपितृकाश्चक्षेत्रजाःतेषामेकस्यक्षेत्रेऽन्य
स्यबीजेनजनितत्वात्तथाच॥नारदः॥क्षेत्रिकानुमतेक्षेत्रेबीजंयस्यरमकीर्य्यते
तदपत्यंत्वयोरेवबीजिक्षत्रिकयोर्मतं॥इतिएवदत्तकादयोपि॥अयुक्तिसत्त्वे
ऽपुत्रीहेरपिस्वीकर्त्तव्यतयाएकपुत्रस्यपितुर्द्व्यंशित्वंअनेकपुत्रस्यसमांशित्वमिति

चरणेश्वराद्युक्तं पुत्रकामिच्छेत् पुत्रगतसंख्यावैलक्षण्येन पितृभागवैलक्षण्ये का युक्ति
रित्यपेक्ष्यते॥ न च सममंशित्वमाख्यातमिति बृहस्पतिवचनेन अंशगतसमानत्व
कथनात् द्व्यंशभागित्वमगत्या एकपुत्रकपितृसम्बन्ध्यव वाच्यमिति वाच्यं तद् बृह
स्पतिवाक्यस्य क्षेत्रजपितृविषयकत्वकल्पनेपि संगतिविरहात् एवं च पैतामहध
नेपि स्वार्ज्जितवत् पितुरेव स्वामित्वं न स्वेच्छया विभागश्च धर्म्यं द्व्यंशभागित्वं च [illegible] ज
स्यापि तु जनकाभिन्नवंशकारित्वेनाविकृष्टत्वात् द्व्यंशभागित्वमिष्येत तु स्थावरे
मणिमुक्तादौ तु भूयिष्ठद्रव्यग्रहणं न्यूनाधिकविभागदाने च इति जीमूतवाहनादि
मतं॥ अत्र च दुर्वृत्तः पुरुषगोचरदानादिना पुत्रपीडाभयादुक्तं स्थावरं द्विपदं चै
व इत्यादिना स्वार्ज्जितेपि स्थावरादौ दानस्य निषेधनं तथा च पुत्रानुमत्या दाना दो न
पि तु दोषः पितुः प्रसादाद् भुज्यन्ते इत्यादिना तु प्रसा[illegible]द् द्रव्यभोगमात्रेण स्वत्वसि
द्धेः स्थावरास्थावरयोर्विशेष उक्तः उदासीनवत् पुत्रादिभ्योपि दत्तं स्थावरादिकं सिद्ध
त्येवेति॥ न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृत इति याज्ञवल्क्यवचनं॥ समन्यू
नाधिका भागाः पित्रा येषां प्रकल्पिताः॥ तथैव ते पालनीया विनेयास्ते स्युरन्यथा॥ इति
बृहस्पतिवचनं च पित्रर्ज्जितधनपरं॥ पित्रैव तु विभक्ताय समन्यूनाधिकैर्धनैः॥ ते
षां स एव धर्म्यः स्यात् सर्वस्य हि पिता प्रभुः॥ इति नारदवचनस्य पिता प्रभुरित्यनेन पि
तृधनविषयकत्वेन तदेकवाक्यत्वात् परं तु स्वार्ज्जितेपि पितुः न्यूनाधिकभागदानं भ
क्त्याद्यपेक्षया भवेदुक्तं प्राक् पैतामहे तदपि नास्तीति ध्येयं॥ अपरे तु॥ न तत्पुत्रै
र्भजेत् सार्द्धमकामः स्वयमर्ज्जितं॥ इति वचनेन स्वोद्धृतपैतामहे अनिच्छातो भागनिषेधा
त् अन्यत्रानिच्छातोपि भागकरणं प्रत्याय्यते॥ पैतृके न विभागार्हाः सुताः पितुरनिच्छ
त इति व्यासवचनमपि॥ तथैव संगच्छते स्वत्वं स्वाम्यं पितुः पुत्रस्य चोभयोर्विति या
ज्ञवल्क्यवचने सममंशित्वमाख्यातं॥ पितुः पुत्रस्य चैव ही ति बृहस्पतिवचने समसह
शपदाद्यांस्वामित्वगततुल्यत्वमुपस्थाप्यते तत्त्वतन्यत्वं पुत्रविभागप्रयोजके च्छास
हचरितत्वं एवं च यथा पितुः स्वामित्वात् तदिच्छया धनविभागः तथा पुत्रस्यापि स्वा
म्यात् तदिच्छयापीति व्यवहारः न तु मत्स्यादिना तुल्यद्रव्यसम्बन्धितुल्यत्वं यावद्
नं पितुरंशस्तावदेव पुत्रस्येति पर्यवसितं तस्य नारदादिवचनैर्भागद्वयोवोधनात् य
द्येकपुत्रः स्यादिति शंखवचने एकपुत्रपदसार्थक्यं जीमूतवाहनादिरित्या वोध्यं अथ
वा बहुपुत्रस्थले पुत्राणामेकैकभागग्रहणं पितुर्भागद्वयग्रहणेन च पुत्राणामल्पधन राम:
भागित्वं प्राप्तं एकपुत्रस्थले किं अधिकं गृह्णीयादित्याशंकायामेव एकपुत्रपदं अनेकपु ३३

त्रस्याप्युपलक्षणं बोध्यमिति यद्वा एके मुख्यान्यकेवला इत्यमरकोशात् एकः मुख्यज्येष्ठः
पुत्रः हूवंशौ गृह्णीयात् जन्मविद्यागुणज्येष्ठो द्व्यंशः दायादवाप्नुयात् इति बृहस्पत्येकवा
क्यत्वादिति पारिजातसम्मतः पंथाः साधीयान्॥ यद्वा एकः श्रेष्ठः जनार्जकः पुत्रो यस्य
इति बहुव्रीहिः तथा च तात्पर्य्यं वर्णात् पुत्रार्ज्जितवित्तात् पितुर्द्व्यंशहरत्वं॥ द्व्यंशोहरो
ईहरेवापुत्रवित्तार्ज्जनात् पिताइति कात्यायनोक्तमेवास्यार्थः यत्तु द्व्यंशबोध
कबृहस्पत्यादिवाक्यानि पितुः स्वार्ज्जितपराण्येव पैतामहे तु सममंशित्वमाख्यातमित्या
दिभिर्बृहस्पत्यादिवाक्यैर्व्यवस्थानं च स्वल्पेन वासं विभज्य भूयिष्ठनाशायवसेदिति हारी
तवाक्यविरोधः स्वेच्छयाउद्धारनरूपयाद्व्यं। शनियंत्राणानर्हत्वादिति वाच्यं भयः
बृहस्पत्यादिमहर्षीणां हिरण्यादिपर्य्यंतप[illegible]रत्वेन अनध्यवसायापत्तेः द्व्यंशित्वकथ
नेन तस्यैव पर्य्यवपर्य्यवसानकथनादिति तन्न जन्मविद्यागुणज्येष्ठो द्व्यंशकथनेन तस्ये
वपर्य्यवसानकथनादिति तन्न अंशंदायादवाप्नुयात्॥ समांशभागिनस्त्वन्येतेषां पितृसम
स्तु सः इति बृहस्पतिवचनस्याविशेषात् पैतामहस्वार्ज्जितोभयविषयकस्य द्व्यंशग्राहि
त्वे पितृसमत्वहेतूपन्यासस्वरसेन पितुर्द्व्यंशित्वस्ययुक्तत्वात् न चैनद्वचनं गुणव
त्पितृपरं गुणवतां भ्रातॄणां गुणवत्पितृसमत्वाभावात्॥ एकेषां गुणेनापरस्यंसम्ब
न्धेन समत्वस्यैवयुक्तत्वादित्यवधेयं॥ पुत्राश्च स्वयं भजेरन् मातुर्निवृत्ते रजसीति गौ
तमवचनस्य ऋक्थभागं भजेरन् प्राप्नुयुरित्येवार्थः कल्पनीयः ननु यदि पुत्रस्य इच्छया
पि विभागः स्यात्तदा जीवति पितरि पुत्रो विभागं कुर्य्यादिति चेन्न कुत्रापि वचने जीव
ति पितरि पुत्रस्य कर्त्तृत्वाबोधनात् तस्मात् पुत्रेच्छयापि प्रवर्त्तितः पिता विभागं कुर्वन्
स्वकीयमंशं गृह्णीयादिति अत एव जीवति चेच्छतीत्युत्तरस्वत्वजनकत्वेन च पुत्र
त्वादिसम्बंधादित्यं तत्र्यर्थं तथा च दानविभागेच्छयोर्देकधर्मे वास्तामिति वाच्यं तथास
ति उदासीनगोचरदानवत् तद्गोचरविभागस्यापि सिद्ध्यापत्तेः स्यात् पृथक्सकृदादिवचनेन
सुतानित्यादिवैयर्थ्यापत्तेः परंतु कामक्रोधाद्यभिभूतेनदत्तमपि नासिद्ध्यतीति तत्राप्र
माद्दानिवृत्तमित्याहुः॥ अथ पैतामहधनविभागकालश्च गौतमोक्तः यथा॥ ऊ
र्ध्वं पितुश्च पुत्राश्च ऋक्थं भजेरन् निवृत्ते रजसि रजस्विमातुर्जीवति चेच्छति॥ मातुर्नि
वृत्ते रजसीति पितामहधनविषयं मातृरजोनिवृत्तिं विना जनिष्यमाणानामपि पिता
महधने स्वामित्वाकांक्षाया विद्यमानानां विभागानुपपत्तेः योक्तिकत्वात् एतच्च पितृत्वनि
शक्तिनिवृत्तेरप्युपलक्षणं अन्यथा विमातृपुत्रस्य भागभागित्वानुपपत्तेः तच्च॥ मातु
र्निवृत्ते रजसि दत्तासु भगिनीषु च॥ निवृत्ते वापि मरणे पितर्य्युपरतस्पृहे॥ इति ना

रदवचने॥ स्फुटमेव पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः॥ मातुर्निवृत्ते रजसि जी
वतोरपि शिष्यते॥ इति बृहस्पतिवचनमपि पैतामहधनपरं। ननु यदि मातृरजोनिवृ
त्तिं विनैव भागः कृतस्तत्र किं स्यादिति चेत् किं तत्र विभागोत्तरं पुत्रो जातः उत न तत्राद्य
कल्पे भक्तं वर्जयित्वावशिष्टधनं मिश्रयित्वा पुनर्विभागं कुर्यात् विभागोत्तरजातानां
मपि पैतामहधनाकांक्षित्वात् द्वितीयकल्पे तु स एव विभागः सिद्धः न च मातृरजोनिवृ
त्तेर्विभागाधिकारात् अनधिकारिकृतः स विभागो सिद्धः उदासीनकृतविभागवदि
ति वाच्यं मातुर्निवृत्ते रजसीत्यस्य भाविपुत्रविभागाशंकया उक्तत्वकल्पनेनैवोपपत्तौ स्व
तंत्राधिकारकाकयत्वकल्पनेन मानाभावात् परंतु द्विर्विभक्तं पुनर्विभजेत् इति नन्वेवं पि
त्रा सह विभक्ता ये सापत्ना वा सहोदराः॥ जघन्यजाश्च ये तेषां पितृभागस्तु वा स्तते॥ अनी
शः पूर्वजः पित्र्ये भ्रातृभागे विभक्तजः पयाधने तथारीच्छे दानाधानक्रमेषु च॥ इति स्मा
र्त्तादिधृतवचने स्य पूर्वजः विभागात् पूर्वं जातः पित्र्ये पुत्रैः सह विभागेन पित्रा लब्धे
भ्रातृभागे विभागे न च भ्रातृभिर्लब्धेऽपि धने क्रमणादिषु अनीशः स्वहरणेशो धना
धनधिकारीति रूत्यर्थकस्य ऊर्द्धं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं इति जीमूतवाहना
दिधृतवचनस्य च का गतिः। विभागानन्तरं पुत्रे जाते पुनर्विभागोपदेशाद्गतिश्चेन्न
पितृस्वार्जितधनगोचरतयैव तद्वचनयोरुपपत्तेः न च वैपरीत्ये यथा मातुर्नि
वृत्ते रजसीति पित्र्यधनगोचरमस्तु ऊर्द्धं विभाज्जातस्त्वित्यादिकं तु पितामह
धनगोचरमिति वाच्यं पैतामहधने नियंत्रितत्वं श्मात्रस्य पित्राग्रहीतस्य विभा
गेन विनाशे विभक्तजानां निर्धनत्वापत्तेः स्वोपार्जितेषु भूयिष्ठद्रव्यग्रहणेनाव
शिष्टधनेन तेषामपि धनवत्त्वसंगतेर्वैपरीत्याभावस्यैव युक्तत्वात् जीमूतवाह
नस्तु॥ अनिवृत्ते रजसि क्रमागतधनविभागे पश्चाज्जातानां वृत्तिलोपापत्तेः न
चासौ युक्तः॥ ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः॥ वृत्तिं तेऽपि हि कांक्षन्ति
वृत्तिलोपो विगर्हितः॥ इति मनुवचनादित्याहुः क्रमागतजीवनोपाय एव वृ
त्तिशब्देनोच्यते इति तेषामभिप्रायः॥ अपरे तु॥ रजोनिवृत्तिबोधकवचनेषु सर्व
त्रैव मातृपदद्दर्शनेन पुत्रेच्छाजनितभाग एव मातृरजोनिवृत्तिरपेक्षणीया सत्त्वे पै
तामहधन एव नन्वेवं॥ पित्रिच्छोपपन्ने पैतामहधनविभागे रजोनिवृत्तिर्नापे
क्षणीयास्त्विति चेदिष्टापत्तिः न च वृत्तिं तेऽपि हि कांक्षन्ति वृत्तिलोपो विगर्हित इ
ति वचनविरोध इति वाच्यं वृत्तिशब्देन पैतामहस्थावरधनात् स्थावरनिबन्धादे राम:
स्वोपार्जितेऽपि वृत्तिशब्दस्य इदानीन्तनशिष्टैः प्रयोगात् विज्ञानेश्वरस्वरसा ३४

च्चनस्मारेतद्वचनंस्थावरद्विपदंचेत्यस्यसमानविषयकंएवंचराद्विविभागार्थिपु
त्राणांनिवेदनेतेनमातरजोनिवृत्तिरन्वेषणीपामिथ्यानतत्प्रकटनेनभागग्रह
णेपितृविभक्ताविभागानन्तरोत्पन्नस्यभागंदद्युरितिविष्णुसूत्रात्भ्रातरएवतत्
द्भागंदद्युर्नपितानापराधित्वात्वक्ष्यमाणयाज्ञवल्क्यवचनस्यापितथैवार्थः पितुः
स्वेच्छयाविभागेअनीशः पूर्वजः पित्र्येभ्रातृभागे विभक्तजइत्यादिनक्षमीत्याहुः॥
तथाचपितुःस्वत्वेविद्यमानेपितुःस्वार्जितेपितुरिच्छाकालएवकालःपैतामहेतुमा
तृवजोनिवृत्तिरप्यपेक्षितादृच्छतुःपितुरेवपितापुत्रयोरन्यतरस्यवायथामतंवे
दितव्यं॥पितृस्वत्वनाशकालश्चउभयधनएवइतिकालत्रयमिति॥जीमूतवाह
नाभिमतं॥विज्ञानेश्वरस्तु॥तथाचसरजस्कायांमातपिसंस्पृहेचपितरिविभागम
निच्छत्यपिपुत्रेच्छयापैतामहद्रव्यविभागोभवतीत्याहमातुर्निवृत्तेरजसीतिपितुः
स्वार्जितपरइतिनतदभिप्रायः॥मातुर्निवृत्तेरजसीत्यादिनारदवचनेतृतीयच
रणेविनेष्ठेवाप्यशरणेइतिपाठकल्पेमातुर्निवृत्तेरजसीत्यनेनपुत्रांतरसंभावा
नाराहित्यंसूचितमितिवक्तव्यंअशरणेगृहस्थाश्रमरहितेइतिव्याकारः निबंध
कारैःकृतःतेनचउपरतस्पृहेइत्यनेनपौनरुक्त्यंनाशंकनीयंयतःगृहएववस
नस्येष्टदेवताचरणारविन्दमात्रावलम्बीयदिविषयमुपेक्षतेतदाउपरतस्पृहः य
दितुचतुर्थाश्रममाश्रयतितदाशरणइतिउभयथैवस्वत्वनाशेउपेक्षामात्रवीजंतथा
चस्वत्वनाशस्त्रिधाभवतीत्यपातित्येनउपेक्षयामरणेनचअत्रचकुष्ठीचिन्त्यइति॥
अत्रेदंविचारणीयं॥यदिविषयमुपेक्ष्यवर्त्तमानःप्राक्तनादृष्टप्रेषितःस्त्रियंसंगम्य
पुत्रंजनयतितत्पूर्वंचपुत्रधनंविभक्तंतत्रकिंस्यादितिअत्रोच्यते॥दानेनैवोपेक्ष
यापितुःस्वत्वेनाशितेपुत्राणांचेष्टांविनैवस्वत्वेजातेविभक्तेषाधनेऽनन्तरंजातःपु
त्रकथमधिकर्त्तुंनशक्नोतितत्रपितृधनत्वाभावात्उरजस्कायांमातरिसत्यांविभा
गस्यक्लेशात्स्ववलात्तविभागदानेअन्यथामातुर्निवृत्तेरजसीत्यस्यवैयर्थ्यादिस्यवधे
यंदत्तासुभगिनीष्वेतिचतासांमतेऽपिपितरिअवश्यंदानार्थकंनतुभगिनीदानंवि
नानाधिकारोनभवतीतिज्ञापनार्थमितिजीमूतवाहनः॥ननुद्व्यंशहरोर्द्धहरोर्द्धह
रोवापुत्रवित्तार्जनात्पिता॥मातात्वपितरिप्रेतेपुत्रतुल्यांशहारिणी॥इतिकात्याय
नवचनविहितःषचनपूर्वार्द्धस्यकोविषयःपितृद्रव्योपघातेनतदनुपघातेनवापुत्रार्जि
तधनेइतरत्वाअत्रजीमूतवाहनः॥पितृद्रव्योपघातेनपित्रार्जितवित्तस्यार्द्धंपितु
रर्जकस्यपुत्रस्यद्व्यंशःइतरेषामेकैकांशिनातदनुपघातेतुपुत्रार्जितवित्तस्यद्व्यं

शः पितुरर्जकस्यापि द्व्यंशः इतरेषामनंशः इतरेषामनंशित्वमित्याह ॥ अथ पु
त्रेणापि स्वार्जनाद्धेतोरित्येवार्थस्तथा च पुत्रार्जितवित्तस्यैवार्द्धं द्व्यंशं वा पिता प्राप्नोती
ति तात्पर्य्यं न तु क्तः इत्यभिहितो भावो द्रव्यवदिति न्यायात् अर्ज्जनस्य वित्तांशे प्रकार
विधयान्वयेन पुत्रार्ज्जितवित्तादित्यर्थ इति उदीव्यरामक्तस्वव तुभ्रमः स्वीकर्त्त
व्यः न हि द्रव्यसामान्यस्य भावीयत्तत् षष्ठीपुरुषसमासे उत्तरपदोपस्थितं तत्प्रकार
तया पूर्वपदार्थेऽन्वेति पूर्वोक्ताय इत्यादौ तु पूर्वादिपदमाहात्म्यात्तथा न द्रव्यत्वा
त् प्रकारविधयान्वयश्च क्रियायाः स्वाभाविक एव ननु तदर्थे द्रव्यतुल्यार्थत्वस्वीका
रो मुख्यनेनन व्याख्यानार्थं क्रियायास्तथात्वभावात् क्तः इत्यभिहितस्य द्रव्यतुल्यत्वं स्वी
कार्य्यमिति चेत् क्तः इत्यभिहितो भावः कारकक्रियावदिति वक्तुं किंतज्जसे तस्मात् क्त
इत्यभिहितक्रियाया द्रव्यतुल्यत्वात् द्वित्वबहुत्वे एव स्वीकार्य्ये इति ॥ यत्तु क्रियाणां व्यापा
रनिचयानां स्वाभाविकबहुत्वेनैव बहुवचनोपपत्तिः तदतीव तुच्छं तथा सति आ
ख्यातार्थक्रियाया अपि बहुत्वं स्यात् न हि स्वरूपतो भिन्नानां तुषक्षेपणानामनादी
नामेकत्वं वैयाकरणाः स्वीकुर्वन्ती न वा एकव्यापारकूटवन्निगृहे अत एव पा
का इति व्यवहारः साधुरित्यवधातव्यं ॥ सर्वभ्रातृसाधारणधनोपघातेन पितृ
धनानुपघातेन पुत्रेण यदर्ज्जितं तत्र पितुर्द्व्यंशमात्रलाभार्थत्वादिति स्मार्त्तः अपरे
तु अर्द्धहर इति पितृद्रव्यानुपघातस्थले पुत्रस्यार्ज्जकत्वात् पितुश्च पितृत्वात् पितृद्र
व्योपघातस्थले पितुः सर्वधनद्व्यंशित्वं अर्जकांशापेक्षया धनस्वामित्वात्तत् पितृत्वा
च्च अर्जकस्यैकत्वे द्वित्वे बहुत्वे पितृतीयांशमात्रभाक् पितृतीयांशमात्रभागित्वं अ
थ पुत्राणामपि पितृधनस्वामित्वात् अर्द्धहरत्वमेव युज्यते न च तथा सति इति चे
न्न तदानीं धनस्वामित्वस्वीकारेऽपि यथेष्टविनियोगे प्रभुत्वात्तच्च नादरणस्य नेत इतरे
षामंशो भवति न वा इति चेत् भवत्येव तेषामंशः एतदर्थमेव जीवत् पितृधनेऽपि
पुत्रस्वामित्वांगीकारादित्याहुः कल्प्यांतरं चाह ॥ जीवन्नवा हरनः ॥ विद्याशौर्य्या
दिगुणयुक्तस्य पितुरर्द्धहरत्वं जनकत्वमात्रेण च द्व्यंशित्वमिति एतन्न कल्पे च पितृ
द्रव्योपघातेन वा इत्यत्र निश्चायकं किमपि स्पष्टं नोक्तं किं तु पितुः स्वपार्ज्जिते भा
गभागी यथा पुत्रस्तथा पुत्रस्यापि स्वमात्रोपार्ज्जिते पितुर्भागभागित्वं भवितुमर्हतीती
त्यवसेयं इदमेव मतं सम्यक् ॥ ननु अधनपुत्रवादिमतविरोध इति चेत् अर्ज्जनका
ले तदुत्तरं च सर्वस्मिन्नेव पितुः स्वामित्वेऽपि विभागकाले शास्त्रबलात् पुत्रस्यार्ज्ज
न निबंधनांशो भवत्येवेति हृदयं केचित्तु पुत्रवित्तयोर्द्वयोर्वर्ज्जनात् पितुर्द्व्यंशित्वं न रामः

34

श्लोकः ३४

थाचपुत्रेसति धनार्यथितापिताद्व्यंशंप्राप्नोतीतिभावः ॥ एवंचपितुःस्वार्ज्जितधन
विभागेपितृकृतेः द्विहरत्वंद्व्यंशहरत्वंद्व्यंशहरत्वंवापितुरिच्छयाउद्धारमरूपायाद्व्यं
शाद्धीनियंत्रणानर्हत्वंपुत्रेचार्ज्जितत्वंभाक्तमेवसर्वस्वदानेतथादर्शनादितियुज्यते
पुत्रार्ज्जितधनेपितुर्भागभागित्वंपित्रर्ज्जितधनेपुत्रस्येवतथाचकीदृशोभागः त
त्रपित्रालब्धस्यःइत्याकांक्षायानिवर्त्तकत्वेनैववचनस्योपपत्तेःकुसृष्टिकल्पनायांमाना
भावादितिपरंत्वत्रेदंचिन्त्यंपुत्रेयदिस्वत्वंनास्तितदेवभाक्तमर्ज्जनंभवतितच्चस्वयंपु
त्रेस्वीकार्य्यमेवअन्यथानस्यप्रदानविक्रयत्यागेषुमातापित्रोःप्रभवतइतिस्मृतिस्मृ
त्रमनर्थकंस्यात्स्वत्वंविनादानादीनामसंभवात् स्वाम्यंयस्यनिजंजगत् इत्यत्र ज
नितेष्वित्यादिन्यायाचार्य्यवाक्यमपिपुत्रेष्वत्वंविनानसंगच्छतेमार्कण्डेयपुराणेह
रिश्चन्द्रस्यराजचक्रवर्त्तिनःविश्वामित्रमुनयेराज्यस्यदक्षिणादानायदारविक्रयः
पुत्रविक्रयश्चप्रकाशनेशुनःशेफमुनेश्चततपितृकृतविक्रयश्चपुराणादिभ्यःश्रु
यतेइत्यादिवस्तुतस्तुधनवत्स्वामित्वंदाराःपुत्रादेःस्वीक्रियतेतथासतिपितृमरणो
त्तरंपुत्राणांपरस्परंस्वामित्वंस्यान्नचभवत्येवस्वामित्वंकिंतुयुक्त्यास्वस्मिन्नेवातः
मृतपितृकस्यस्वदानंसंगच्छतेइतिवाच्यंतथामात्रादेःस्वामित्वापत्तेःनहितासांपुत्राः
स्वामिनइतिएवमदत्तानांभगिनीनांभ्रातरएवदानंकुर्य्युःपितामहस्वत्वेपिइत्यपिवा
च्यतापत्तेरित्यपिवोध्यंअर्धंचात्रसममेवग्राह्यंआनादेरेसमइतिन्यायात्तच्चार्द्ध
द्व्यंशस्यैकांशरूपंअथवासमुदायधनस्येतिसंदेहे ॥ जीमूतवाहनः ॥ समुदायध
नस्येवार्द्धमित्याह यतोद्व्यंशस्यार्द्धतात्पर्य्यसत्वेएकांशहरएवेतिकथंनोक्तमितिद्व्यं
शंपदार्थस्यापिससम्बन्धिकत्वात्तकस्यद्व्यंशइत्याकांक्षायांपुत्रार्जिता वित्तस्यैवद्व्यं
शोवक्तव्यः तथाचभागप्रतियोगित्वेनोपस्थितत्वादवधारद्धमपिनस्यैवेतियुज्यतेइ
ति ॥ ननुयदिभ्रातृधनेनपुत्रापिअर्जकस्यद्व्यंशित्वमितिस्यात्तमतं ॥ भ्रातृद्रव्योप
घातेतुपितुर्द्व्यंशौनेपामध्येकैकांशइतिन्निखनादितिवदन्तितन्मन्दं यदि
वार्जकेनरेणसोश्रौलब्धस्तदासमभागोयुक्तःएकस्यायासेनापरस्यानायासे
नार्ज्जकत्वादितिनच्छिखनस्येवविरोधात्भ्रातृद्रव्योपघातेइत्यर्थइतिस्मार्त्ताभिप्रा
यः स्वायासेनचकेनचित्पुत्रेणवित्तमर्ज्जितंतदाकीदृशोभागःउच्यते ॥ तत्रपितु
र्द्व्यंशीत्वपुत्रयोश्चैकांशित्वंयदितुभ्रातृधनेनस्वधनेनचस्वायासेनचार्ज्जितंतदा
र्ज्जकस्यद्व्यंशःपितुर्द्व्यंशधनदातुरेकांशःउभयत्रैवइतरेषांभ्रातृणामनंशित्वंइ
तिशास्त्रानुमतयुक्तिसिद्धःपंथाः ॥ अथाजीवतःपुरुषस्ययत्रपुत्राःपौत्रादौहित्राः

पुत्रदौहित्रश्च वर्त्तते तत्र यदि पौत्रेण पैतामहधनोपघाते न किंचिदर्ज्जितं तत्र का
व्यवस्था अत्र केचित् पुत्रार्ज्जनादिति श्रवणात् पौत्रार्जितं उदासीनार्जितमिव भव
ति तस्मात्तत्र धनपुरुषयोः रूपकारं समानत्वे अर्द्धं पितामहस्य अर्द्धं पौत्रस्य भव
ति पितृव्याणां च तत्रांशित्वे वचनाभावात् तत्र पैतामहमर्द्धं धनं द्वारा तस्य स्वोपा
र्ज्जितमेव तथा च क्रमागतधनद्वारोपार्ज्जितस्यापि पितुरिच्छया विभागः ननु बीजिपु
रुषस्य पुत्रेण यदर्ज्जितं पितृधनोपघातेन तत्र मृतपितृकपौत्रस्यांशित्वं भवति मृ
तपितृकपौत्रेण यत्तथार्ज्जितं तत्र पितृव्यस्यनांशित्वमिति विशेषस्यमिति चेन्न तत्रापि
मृतपितृकपौत्रस्यांशित्वे प्रमाणाभावात् ॥ साधारणं समाश्रित्य यत्किंचित् किंचि
त्वाहनायुधं शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः इति व्यासवचने भ्रातर इति
श्रवणात् भ्रातुष्पुत्रपितृकोदरं शित्वानवगमात् इत्याहुस्तन्न स्मार्त्तसम्मतं य
तस्तेव्यासवचनं व्याख्याने भ्रातर इत्युपलक्षणं तेन पितृव्याद्यापि बोद्धव्याः इत्युक्तं
बीजिपुरुषधनप्राप्तिसंभावनाभागित्वेन पुत्रपौत्रप्रपौत्राणां युक्तितुल्यत्वम् अत्र बी
जं द्वासहास इत्यपुत्रपुत्रेपि स्वत्वं एवं प्रपौत्रेपि इत्यपि युक्तिर्भवति नन्वेवं दौहित्रा
देरपि तथात्वं अस्त्वेवेति चेत् पुत्रस्वत्वे तेषामनुपकारित्वेन दुर्बलत्वान्न तुल्यत्वं
अथ जीवत्पितृकप्रपौत्रस्यापि अनधिकारित्वात् न तुल्यत्वमिति चेन्न पितृम
रणे तस्य तथात्वं संभवतीति स्वरूपयोग्यतामादायैव एतदुक्तं तस्मात् पौत्रार्ज्जि
तेपि पैतामहधनपरत्वम्भसत्वे पितामहस्याईहरत्वं पितृव्यादीनां चैकैकांशित्वं अ
र्जकस्य पौत्रस्य द्व्यंशित्वं पैतामहधनानुपघाते तु पितृव्यादीनां शित्वं पितामहस्य
तु द्व्यंशित्वमितिसंक्षेपः ॥ ननु द्व्यंश इति वचनं पुत्रार्ज्जितं वित्तपरं वक्तव्यं तथा च त्र
पितामहस्य द्व्यंशहरत्वे प्रमाणाभावः इति चेन्न पितामहस्य स्वोपार्ज्जितधने पौ
त्रोंशी भवति पौत्रस्य स्वोपार्जिते पितामहो नांशीति विषमशिष्टत्वापत्तेः पुत्रपद
स्योपलक्षणत्वात् अन्यथा इच्छया विभजेत् सुतानिति याज्ञवल्क्यवचने सुतपदस्यो
पलक्षणत्वं न स्यात् ॥ ननु पौत्रस्य धनं गृह्णातीत्यस्यापि सधनं गृह्णीयादिति चेन्नि
यमः तदा पितामहधनग्रहणयोगसमरणे सत्यपि पितरि पितामहे धनाधिकारि
स्यात् एवमविभक्ते मृते पुत्रे इत्यादि वचनैकवाक्यत्वात् याज्ञवल्क्यवचने सुतपद
स्योपलक्षणेत्वमस्तु अत्र पदस्योपलक्षणत्वे प्रमाणाभाव इति चेत् पितृधनानुप
घातेन पुत्रार्ज्जिते पितान्यधिकारि न स्यात् द्व्यंशहद्व इति वाक्यस्य च निर्गुणपितृपर रामः
त्वेन कथंचिदन्यथैवोपपत्तिसंभवात् ननु पुत्रार्ज्जितधनबोधकस्य संकोचे प्रमाणा ३६

श्लोकः २४

भावः न च विभक्तपुत्रार्ज्जिते तु विभागकालीनद्व्यंशहरणस्याप्रसक्तेरिति चेन्न अ
त्र केचित् ज्ञापग्रहणे पौत्रप्रपौत्रयोः पुत्रतुल्यत्वदर्शनेन स्वार्ज्जितस्य भागद्वानेपि
तयोस्तुल्यत्वं युज्यते इत्याहुः दौहित्रार्जिते तु मातामहधनोपष्टम्भसत्वे मा
तामहस्य उपष्टंभानुसारेणांसहरत्वं मातुलादीनां नांशित्वं अनुपष्टम्भेनार्ज्जि
ते तु मातामहस्य नांशित्वं पुत्रदौहित्राद्यार्ज्जितेप्येषा रीतिरवलम्बनीया॥ अथ यो
यस्य धनं गृह्णाती स तस्यापि इति नियमस्य भंग उक्तः न च जीवत इति विशेषणा
न्न नियमभंग इति वाच्यं॥ जीवत्पितृकपौत्रस्य धनं भवन्मते पितामहो गृह्णाति इति
तस्यापि पितामहधनग्राहित्वापत्तेः अथ जीवत्पितृकपौत्रार्ज्जितं न पितामह
गृह्णीयाद् पितुः पितेव तस्यैव अर्ज्जकपुरुषप्रधानस्वामित्वात् एवं च धनपष्टम्भ
निमित्तार्ज्जनात् उधनानुसारेणैकांशः पितामहो गृह्णीयात् तत्र च स्वार्ज्जित
वद्व्यवहारः अनंतरं च पितापि यदि जीवन् विभजनेतदा यथामतं द्व्यंशमर्द्धं वा गृ
ह्णीयात्॥ न तु पितृधनेनार्ज्जितत्वादिति वाच्यं॥ तथा सति पुत्रेभ्यो स्वधनोपष्टंभे
न पौत्रार्ज्जिधनांशमपि इदं हरेत् अर्ज्जकं पौत्रमुद्दिश्य तदंशयोर्मध्ये किंचित् पुत्राया
धिकं दद्यात् पितामहचरणोत्तरं धनस्य विभागे कर्त्तव्ये पितृव्यादिभ्यस्तद्धनांश
दानापत्तेः पितृव्यार्ज्जितधनस्याग्रहणे न च विषमाशिष्टत्वापत्तेरिति चेन् विभाग
कालेयो यस्य जीवतो धनं गृह्णाति स जीवति तस्यैव धनं दद्यादित्येव नियमः अथ द्वा
सइत्र पुत्रपौत्रेपि पितामहस्वामित्वं वर्त्तते एवं तिन द्व्यंशादिकं गृह्णीयादिति चेन्ना
त्र स्वामित्वनिबंधनमंशग्रहणं तथासति पुत्रार्ज्जितस्य सर्वस्यैव ग्रहणं स्यात् परंतु
शास्त्रबलात् नियमबलाच्चेत्सतो जीवत्पितृकोपुत्रार्जितधनग्रहणं न अयात्र मधि
युक्तिमूलं तथा हि पुत्रार्ज्जितसर्वस्वाम्यपि पिता पुत्राय दद्यात् नियमस्मै स्वधनं तदा
नीतस्मै तदर्ज्जितं दद्यादित्यत्र का विप्रतिपत्तिस्तदर्ज्जने चायाससत्वात् आयासवैत
नेभ्यायमंशाधिक्यं व्यवस्थाप्यते ग्रंथकारैरिति चेदेवं तावत्पर्य्यन्तस्य स्मानुधावने
केचित् पुत्रद्वारा अर्ज्जकाय भागद्वयं इतरेभ्यश्चैकमेकमंशं स्वयं च द्व्यंशादिकं यथायो
ग्यं गृह्णीयादित्याहुः॥ अपरे तु॥ जीवतोपि पुत्रपौत्रप्रपौत्राणां स्वामित्ववादिमते
पुत्रद्वारा पौत्रस्वामिपि पितामहो दायं विभजन् उपष्टम्भाद्यनुसारेण द्व्यंशादिकं गृ
ह्णीयात् न तत्रापि तादृविभागकर्त्तृत्वाभावात् अर्जकस्य च अवशिष्टं सकलं धनं पैतामह
हधनोपष्टम्भ सत्वे अंशद्वयं च पुत्रद्वारैव दद्यात् यथा चार्ज्जकस्य पितुः पुत्राय इति च
त्वारः पितामहपुत्राश्च त्रयः तत्र पंच भागान् अर्ज्जकपित्रे दद्यादितराभ्यां च त्वा

रश्चात्वादित्यनंतरमर्जकस्यपितापियदिजीवन्नविभजतेतर्हिनंचतुर्भागान्
स्वयंयथायोग्यमंशद्वयंगृहीत्वाएकैकमंशद्वयंगृहीत्वाएकेकमंशंदद्यादितिपंच
मांशंतुअर्जकेणसहसमंभजेत्तर्हिनस्यस्वार्ज्जितत्वपित्राद्यर्जितत्वयोरभावा
त्समंस्याद्दश्रुतत्वादितिन्यायात्तदानीमर्जकस्यमरणेतुतत्पुत्रपौत्राभावेस
त्यपिपत्न्यादौपितैवस्वार्जितवत्पुत्रेभ्योविभजेदित्याहुः॥ननुपितृकृतविभागेपि
त्रादुहितृपर्य्यन्तराहित्तमातामहदायोयोलब्धःतत्रकीदृशोभागःपैतामहधन
वत्पितुर्द्व्यंशित्वादिकंयद्वापितुःस्वोपार्ज्जितवत्भूयिष्ठद्रव्यग्रहणादिकमिति
सन्देहेकेचित्स्वयमुपात्तैःर्थैरितिविष्णुसूत्रेस्वयमुपात्तेरित्यत्रस्वयंकर्तृकउपा
दानविषयइत्यर्थः॥मातामहधनोत्तरलब्धेतुःपितुःकृतिंविनैवार्ज्जनात्न
स्वयंकर्तृकमुपादानंअत्रसामान्यप्राप्तद्व्यंशग्रहणादिकंकार्य्यंनचैपैतामहेतु
पितापुत्रयोस्तुल्यंस्वामित्वंवचनात्अत्रतुल्यस्वामित्वानुपपत्तिःरितिवाच्यंपैतामह
पदस्वोपलक्षणतयाआवश्यकत्वात्अन्यथाजन्मान्धपुत्रस्यपितुःप्रपिताम
हादागतावनेद्व्यंशग्रहणादिनियमनस्यात्नचस्वयंकर्तृकमुपादानंस्वीयव्यापा
रजन्यमुपादानंएववक्तव्यंअन्यथाप्रतिगृहीतधनस्यसंग्रहमध्येप्राप्तनिषेधेश्च
स्वयमुपादानंनस्यात्व्यापारश्चात्रयथायथंजीवनादिरेवतथाचात्रापिभूयिष्ठद्र
व्यग्रहणादिकमितिवाच्यंपैतामहेइत्यनेनसम्बन्धात्लब्धेइत्यर्थःकरणात्मे
वयुक्तंपैतामहधनस्यविशेषशास्त्रेणाव्याधिनत्वात्द्व्यंशग्रहणादिकमितिवाच्यं
पैतामहेइत्यनेनसम्बन्धात्लब्धइत्यर्थःकरणात्प्रपितामहादितोमातामहादि
तश्चलब्धएवपितापुत्रयोस्तुल्यस्वामित्वान्नचक्रमागतधनानामेवपैतामहधनेनो
पादानोतदितरेषांमातामहाद्यागतधनानांप्रतिग्रहादिलब्धानांचभूयिष्ठद्रव्य
ग्रहणादिरूपाव्यवस्थाइतिवाच्यंमातामहाद्यागतधनानामपिक्रमागतत्वाभा
वेप्रमाणाभावात्संक्रान्तधनस्यचातिरिक्तस्यमुनिभिरपरिभाषणात्इत्याहुस्त
न्नमनोरमंसहाध्यायित्वात्श्रोत्रियब्राह्मणदाद्दालब्धोयोनिर्वन्धुदायस्तत्रापि
पितापुत्रायास्तुल्यस्वामित्वापत्तेःदौहित्रपुत्रस्यसंक्रान्तधनानधिकारित्वकल्पेतु
सुतरांपुत्रस्यनस्वामित्वंपितुर्म्मरणेपिजीवनेतुतद्वार्त्तापिनास्तिएवंचवृद्धप्र
पितामहदायस्यापिक्रमागतत्वाभावात्किंतुप्रपितामहदायस्यपितामहादिपर
स्परयाप्रपौत्रेणलब्धस्यतुक्रमागतत्वमितितत्रपितापुत्रयोस्तुल्यंस्वामित्वमित्य गमः
नेनैवव्यवस्थाऽवगहनीया॥यदितुप्रपितामहधनंमृतपितृपितामहकःप्रपौत्रःमा ३१

प्रो ऽनितद्दापिक्रमागतत्वात् पितापुत्रयोस्तुल्यस्वामित्वमितिमंतव्यं॥ एवंचपैताम
हेइत्यस्यस्वर्गजनकजन्मरूपसम्बन्धाद्धनाव्धेइत्यर्थइतिनाकोऽपिदोषः॥ लोका
न ऽऽनंत्यंदिवःप्राप्तिःपुत्रपौत्रप्रपौत्रकैइतिवचनेन॥ पुत्रेणलोकानुजनयतिपौत्रे
णानन्त्यमश्नुते॥ अथपुत्रस्यपौत्रेणव्रध्नस्याप्नोतिविष्टपं॥ इतिवचनेनचपुत्रपौ
त्रप्रपौत्रजन्मनास्वर्गप्राप्तिवोधनात्॥ वचनयोरर्थश्चलोकनामाआनन्त्यनामा
दिवनामाचस्वर्गविशेषः॥ व्रध्नपदेनसूर्य्यउच्यतेविष्टपशब्देनचस्थानंदिवनामा
चस्वर्गःसूर्य्यस्थानंवचनयोरेकवाक्यत्वादवगम्यतेइतिकेचित्॥ परेतुलोकशब्दः
स्वर्गवाचकःपुत्रेणस्वर्गगमनंभवतिपौत्रेणचतत्राऽऽनन्त्यंचिरसमयवासःप्र
पौत्रेणचसूर्य्यलोकस्यस्वर्गविशेषस्यपूर्वापेक्षयापूर्वापेक्षयाउत्कृष्टस्यगमनं
भवतिदिवशब्देनात्रसूर्य्यलोकएवउच्यतेसामान्यशब्दस्यविशेषपरत्वात् अतए
ववचनयोर्नविरुद्धार्थत्वमित्याहुः॥ इतिपरैवपरिशीलितःपन्थाः अन्यथाएकाश्र
ताधिकारणाभविष्यतिकनीयसी॥ येनदौहित्रजातलोकात्रीण्योपंपतिप्पम॥ इ
तिमहाभारतस्वरसात् दौहित्रस्यापिस्वर्गजन्मसम्बन्धेनलब्धत्वात् तत्रापिपैतामह
वत्पितापुत्रयोस्तुल्यस्वामित्वमस्तुइतिचेत्विज्ञानेश्वरमतेकारणंनरविजन्मा
सहजन्मसम्बंधाद्धनाव्धेइत्येववक्तव्यंपुत्रादेर्जन्मनैवस्वत्वंदौहित्रादेस्तुपुत्राद्यभा
वसापेक्षजन्मनाइतिअन्यमतेपिपुत्रादिसामान्यभावनिरपेक्षजन्मसम्बंधाल्लब्धे
इत्यर्थःनन्वेतावत्पर्य्यन्तःकुतोलभ्यतेइतिचेदनुभावात्पितामहइत्यत्रपिता
महपदस्यप्रपितामहपरत्वस्यावश्यत्वेमातामहस्यावश्यव्यावर्त्तनीयत्वेचस्वयमेव
पन्थाइतिजानीहियरेतुसम्वंधानधीनार्जनमेवस्वयनुपादानंसम्वन्धादर्जितमे
वपैतामहंश्रोत्रियत्वात् सहाध्यायिताद्यालब्धेदन्येपितापुत्रयोस्तुल्यस्वामित्वेपिक्ष
तिविरहा॥ अथवाजन्मसम्बन्धादर्जितमेवपैतामहंअन्यथापित्र्यधनंपरित्यज्य
लोभादिनाकथंचित् मातामहमरणोत्तरंमातामहवासमाश्रितस्यपितुःभोगादि
नाक्षीणधनस्यस्वकृतविभागानंतरंजातस्यपुत्रस्यवृत्तिलोपापत्तिःननुयस्यपैता
महंमातामहियादिकंवाधनंनास्तिकिंतुस्वोपार्जितमेवतत्राप्येषवीतिःसमानान
चमातामहधनलोभात्पितृधनलोभात्पितृधनत्यागेतस्यचैनेनपुत्रेणप्राप्तेपि
तुःस्वेच्छाकृतोवृत्तिलोपइतिनसमानताइतिवाच्यंक्रमागतधनस्यपित्राःगृही
तस्यापिभूयोद्यायविभागःस्वादाच्चतुर्थादितिवचनात् इच्छद्भिःपौत्रादिभिर्ग्रहि
तुःशक्यत्वात्पित्रास्वपितृधनस्यउपेक्षादानादौतुततएववृत्तिलोपजन्योऽधर्म्मः

इतिवचनेन पित्रादिधनस्य स्वभावतोः सत्त्वं शतो मातामहादिधनस्य विभागेन विना
शरणतत्वहृदयं न समानमित्याहुस्तच्चिन्त्यं ॥ पितृकृतविभागे मृते न पितृकपौत्रस्य पितृ
पितामहकप्रपौत्रस्य अंशित्वं कात्यायनवचनेन न बोधितम् अतः पितामहकृतवि
भागः प्रपितामहकृतविभागश्चासुतरां सिद्धः अतो यत्र बीजिपुरुषस्य पुत्रो नास्ति
किन्तु पौत्राः प्रपौत्रा वा तद्धेमिति तत्र विभागः पितामहेन प्रपितामहेन च कर्त्तव्य
एव न च पारीभागवत्पुत्रार्थे विभागे क्रियमाणे एव पौत्रादिभ्योऽपि भागं दद्यात् न तु तद
र्थे विभागः कर्त्तव्यः याज्ञवल्क्यादिवचनेषु तानि स्यादि दर्शनात् कात्यायनवच
नस्य तथैवापपत्तिसंभवात् इति वाच्यं पुत्रपौत्रप्रपौत्राणां स्वजन्मा द्वारा सर्वसम्पा
दनरूपोपकारसमानत्वे विशेषकल्पने प्रमाणाभावात् पत्न्याश्च पुत्रविनिर्मोकेन भा
गस्य केनचिदपि वचनेन बोधनात् तथा कल्पमिति युक्तत्वा मातामहादिकृतद्वौहि
त्रादिविभागश्च न शास्त्रसिद्धः किन्तु पितृकृतभागदर्शनानुसारेण यदि कश्चि
त्करोति तदा सर्वेषां स्वीकारे सिद्ध्यत्येव अस्वीकारे तु न सिद्ध्यतीति संक्षेपः ॥ पि
तृकृतभागमुपक्रम्य याज्ञवल्क्यः ॥ शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रि
या ॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः ॥ इति पक्षद्वयेऽप्यपवादमाह इ
त्यनेनावतावितं रत्नाकरे तथा च शक्तिसत्त्वे ऽनीहमानस्य स्वबलस्य किंचिज्जी
वनोपायमात्रदानं न तु श्रेष्ठभागसमभागदानम् इति तत्कर्मीकरणं पितुरनुम
तेन भवतीति भावः एतच्च पितुरनिच्छायामपि शास्त्रीयत्वात् परं तु पुत्रार्जिते धन
मात्रेऽयं नियमः न तु पित्राद्यर्जिते इति बोध्यं प्रकाशकारस्तु किंचिद् सारम
पि दत्वा पृथक्क्रिया विभागः कर्त्तव्यः पुत्राणां विवादपदनिवृत्त्यर्थमित्याह ॥
भवदेव मिताक्षरादयो ऽप्येवं ॥ अनीहमानस्य पित्र्यधनमनिच्छतः ननु पित्र्य
धनं विनास्य जीवनोपायः कथं भवेदित्यत आह शक्तस्येति पित्र्यधनं विनापि
जीवनोपायं कर्तुं शक्तस्येत्यर्थः ॥ इति परिशेषः अत्र परमते इह धातो आह
शक्तस्येति पित्र्यधनं विनापि जीविनोपायं कर्तुं शक्तस्येत्यर्थः इति परिशेषः अत्र
परमेहधातोश्चेष्टार्थकत्वकल्पनमते किंचिद्दत्वा पृथक्करणेऽपि दुर्विभक्तमि
ति पुत्राणां विवादसंभवः तदा स्वेच्छात्यक्तविभागो द्वावने नापि भवतीति चिन्त्य
तेनत्र स्वेच्छाकृतविभागो यः पुनरेव विसंवदेदित्यत्र स्वेच्छागृहीतमूलविभागस्यै
व राजदण्डादिकमुक्तं न तु स्वेच्छापरित्यक्तविभागस्येति यथाश्रुतशास्त्रार्थमालं
व्य परमतमवधेयेयं अन्यत्र पितृकृतविभागिकस्मैचित् पुत्राय पातित्यापि दोषरहि

एमः
३८

श्रीक: २४

तायभागाद्दामेविभागासिद्धिः स्पष्टीकृताइतिसमर्जनीयं॥ एतद्वचनं प्रामीनपितृ
कविभागापिनेयंयाज्ञवल्क्येन वचनानंतरानुपदेशात् मनुना सामान्यतो ऽभिधा
नाच्चयथा॥ मनुः॥ भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा स निर्भाज्यः स्वका
दंशात् किंचिद्दत्वोपजीवनं॥ तत्र प्रकाशकृः॥ भ्रातॄणां मविभक्तानां मध्ये यः
कश्चित् आलस्यकौटिल्यादिना धनं नेहेत प्राक्तनं धनं वर्द्धयितुं कृष्यादिनान्तर
र्ज्जयितुं वा न चेष्टेत स निर्भाज्यः अन्यैर्भ्रातृभिरुपार्जितधनात्॥ वहिः कार्य्य
ः किंतु प्राक्तनधनांशलाभेवाधकं नास्ति अत स लब्धस्यः परंतु किंचिदुपजी
व्यं दद्यादिसाहतश्च किंचित् भ्रातृभिर्वर्जितधनादेव धनसंपर्कमूलमिदं हानं
धनानुपसारेणांशप्राप्तिस्तु कौटिल्यफलमिति भावः॥ अत्र शक्तस्येति दर्शना
दशक्तस्य अंततोधनानुसारेणांशदानं प्रतिभाति अत्र हलायुधेनतु यः॥
स्वयोग्यतया भागं न गृह्णाति तस्यापि किंचिद्दत्वा नत्पुत्राणां विवादनिवृत्य
र्थं विभागः कर्त्तव्य इत्यस्यार्त्तव्याख्यायते तदाह तिकृत्वा भ्रातॄणां यस्तु नेहे
त इत्यादिपनुवचनमवतारितं इति रत्नाकरः॥ जीवनवाहनस्मात्तीदयो ऽ
प्येवं परंतु किंचिद्वृत्तोपजीवनमित्यस्य तण्डुलप्रस्थादिकं दत्वेतु व्याचक्रुः॥ यः
स्वकर्म्मणा स्वव्ययसायेन जीवितुं शक्तः साधारणं धनं विभज्य गृह्णीयात् किंतु
त्यजेत् स भ्रातृभिर्गृहीतभागैः स्वस्वभागात् धनमाहृत्य पूरणीय इत्यर्थः
॥ कुटुम्बार्थेषु चोद्युक्तस्तत्कार्य्यं कुरुते तु यः। स भ्रातृभिर्वृहणीयो ग्रासाच्छा
दनवाहनैः इति नारदवचनमपि तत्र दर्थ्यकमिति॥ हलायुधइति मिश्राः॥ तेषा
मयमाशयः यदि कश्चिद्विभागकाले आग्नहं कृत्वा भागं नागृह्णात् उत्तरकालं च
भागमाकांक्षते तदर्थं पुनर्विभागं सर्वं मिश्रयित्वा न कुर्य्यात् किंतु तद्भागपूरणा
न स्वस्वभागादुद्धृत्य तद्भागं पूरयेत् इति तथा च तत्रेण सर्वेणव वचनार्थी
आदरणीयाः तत्र प्रकाशे मिश्रयोरयं भावः पुत्रत्वादिसंबन्धस्यैतत्साहात्म्यं
विभागकाले ऽग्रहणे उत्तरकालं स्वयमेव पुत्रेणावाइच्छतावश्यं भागप्राप्ति
रिति रत्नाकराशयस्तु वक्ष्यते ऽन्यपरं॥ निर्भाज्य इति निर्भागशब्दात् करोत्यर्थे णिः
ततो अभन्तुकतेन च प्रकृत्यस्थानं अतो गकारस्य जः॥ कुटुम्बार्थेष्वित्यादि कुटु
म्बानि अत्र स्वस्य तदर्थं उद्युक्तः स न तु तत्कार्य्यं कुटुम्बभरणोपयुक्तं कार्य्यं कुरु
तेन तु पित्र्यधनं गृह्णाति स उत्तरकाले भागमाकांक्षमाणः ग्रासाच्छादनवा
हनैरुपलक्षणैर्भर्त्तव्यः अन्येनापि भ्रात्रा रूप्यसुवर्णालंकारादिनावृंहणी

(श्रीकृः २०)